5

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 579

Title Vedāntādhikaraṇamālā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 579 Subject: Vedānta

Title: Vedāntādhikaraṇamālā

Author: -- Scribe: Mādhavatīrtha

Date of the work: -- Date of the Ms.: V.S. ३६५९

Place of the work: -- Place of the Ms.: --

Size: 11.4" by 4.7" Extent: 129 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: --

वैयासिकन्यायमाला

श्रीनृसिंहाय नमः ॥ श्रीपरमात्मने नमः ॥ प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं ॥ वैया
सिकन्यायमालाश्लोकैः संगृह्यते स्फुटं ॥१॥ चिकीर्षितस्य ग्रंथस्याविघ्नेन परिसमाप्ताय
२३ प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टदेवतातत्त्वं गुरुमूर्त्युपाधिकं नमस्कुर्वन् ग्रं
थं प्रतिजानीते ॥ प्रणम्येति ॥ व्यासनाम्नाकृता वैयासिकी ॥ वेदांतवाक्यार्थनिर्णायकान्यधिक
रणानि न्यायास्तेषां मन्त्रक्रमेण ग्रथनं माला ॥ यद्यप्येषा सूत्रभाष्यादिभिः प्रपंचिता तथापि
मंदादीनां मतिप्रज्ञविषयत्वान्मंदबुद्ध्यनुग्रहाय श्लोकैरेषा मालास्फुटं संगृह्यते ॥ तत्रैकै
कमधिकरणं पंचावयवं विषयः ॥१॥ संदेहः ॥२॥ संगतिः ३ पूर्वपक्षः ४ सिद्धांतः ॥५॥ इति पंचा
वयवास्तेषां संग्रहप्रकारं दर्शयति ॥ एको विषयसंदेहपूर्वपक्षावभासकः ॥ श्लोकोऽपरस्तु सि १
द्धांतवादी संगतयः स्फुटा इति ॥१॥ एकस्याधिकरणस्य संग्राहकौ द्वौ श्लोकौ तयोराद्यश्लो

कस्य पूर्वार्द्धेन द्वाववयवौ संगृह्येते उत्तरार्द्धेनैकः द्वितीयश्लोकेनैकः यद्यपि संगत्याख्य एको
ऽवयवः शिष्यते तथापि नासौ प्रत्यधिकरणं पृथक् संगृहीतो भवति स्पष्टत्वात्तत्र तत्र तद्रूप
स्य स्वयमप्यूहितुं शक्यत्वात् ॥ संगतिं विभज्य स्फुटत्वादयति ॥ शास्त्राध्यायतथापादे न्यायसं
गतयस्त्रिधा शास्त्रादिविषयज्ञाते तत्र संगतिरूह्यतां ॥ इति शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यं पा
दप्रतिपाद्यं चार्थमवगत्य शास्त्रसंगतिरध्यायसंगतिः पादसंगतिश्चेति ॥ तिस्रः संगतयः ऊहि
तुं शक्यंते ॥ शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यं च दर्शयति ॥ शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्यु
श्चतुर्विधाः ॥ समन्वयाविरोधौ द्वौ साधनं च फलं तथा इति ॥ सर्वेषां वेदांतवाक्यानां ब्रह्मणि
तात्पर्येण पर्यवसानं प्रथमेनाध्यायेन प्रतिपाद्यते ॥ द्वितीयेन संभावितविरोधः परिह्रियते ॥

३॥ तृतीयेन विद्यासाधननिर्णयः॥३॥ चतुर्थेन विद्याफलनिर्णय इत्यध्यायार्थाः॥ तत्र प्रथमा
ध्यायगतपादार्थान् विभजते॥ समन्वये स्पष्टलिंगमस्पष्टत्वेऽप्युपास्यगं॥ ज्ञेयगं पदमात्रं च चिंत्यं
पादेष्विदं क्रमात्॥ स्पष्टब्रह्मलिंगयुक्तं वाक्यजातं प्रथमपादे चिंत्यं तद्यथा॥ अंतस्तद्धर्मोपदेशा
वि ४ त्॥ इत्यत्र सार्वात्म्यसर्वपापोदयादिकं ब्रह्मणोऽसाधारणतया स्पष्टब्रह्मलिंगं॥ अस्पष्टब्रह्मलिं
गत्वसत्त्वेऽपास्यविषयवाक्यजातं द्वितीयपादे चिंत्यं तद्यथा प्रथमाधिकरणविषये शांडिल्योपा
स्तिवाक्ये मनोमयत्वप्राणशरीरत्वादिकं सोपाधिकब्रह्मणो जीवस्य च साधारणत्वादस्पष्टं
ब्रह्मलिंगं॥ तृतीयपादे त्वस्पष्टब्रह्मलिंगत्वेऽपि ज्ञेयब्रह्मविषयं वाक्यजातं चिंत्यं तद्यथा प्र २
थमाधिकरणे मुंडकगतब्रह्मतत्त्ववाक्ये द्युपृथिव्याद्यंतरिक्षाद्योतत्वं स्वात्मनः परस्य

ब्रह्म॰ १

साधारणत्वात्॥ अस्पष्टं ब्रह्मलिंगं॥ यद्यपि द्वितीयपादे कठवल्ल्यादिगतब्रह्मवाक्यानि विचा
रितानि तृतीयपादे च दहराद्युपासनवाक्यं विचारितं तथाप्यवांतरसंगतिलाभेन तद्विचारस्य प्रा
संगिकत्वान्न पादार्थयोः सांकर्यापत्तिः॥ इत्थं पादत्रयेण वाक्यविचारः समापितः चतुर्थपादे त्व
व्यक्तपदमजापदं चात्यवमादिसंदिग्धपदं चिंत्यं॥ द्वितीयाध्यायगतपादार्थान्विभजते॥ द्वितीये
स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता॥ भूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धता॥१॥ प्रथमपादे
सांख्ययोगकणादादिस्मृतिभिः सांख्यादिप्रयुक्ततर्कैश्च विरोधाभाववेदांतसमन्वयस्य परिहृ
तः॥ द्वितीयपादे सांख्यानां दिमतदुष्टत्वं प्रदर्शितं॥ तृतीयपादे पूर्वभागेन पंचमहाभूतश्रुतीनां
परस्परविरोधः परिहृतः॥ उत्तरभागेन च जीवश्रुतीनां॥ चतुर्थपादे लिंगशरीरश्रुतीनां वि
रोधपरिहारः॥ तृतीयाध्यायगतपादार्थान्विभजते॥ तृतीये विरतिस्तत्त्वंपदार्थपरिशोधनं॥
गुणोपसंहृतिर्ज्ञानबहिरंगादिसाधनमिति॥ प्रथमपादे जीवस्य परलोकगमनागमने विचा

र्यवैराग्यं निरूपितं ॥१॥ द्वितीयपादे पूर्वभागेन त्वंपदार्थः शोधितः ॥ उत्तरभागेन च तत्पदार्थः ॥२॥ तृती
यपादे सगुणविद्यासु गुणोपसंहारो निरूपितः ॥३॥ चतुर्थपादे निर्गुणज्ञानबहिरंगसाधना
श्रमयज्ञादीन्यंतरंगसाधनानि शमदमनिदिध्यासनादीनि च निरूपितानि ॥ चतुर्थाध्यायगतपादार्थाश्चित्र
जात ॥ चतुर्थे जीवतो मुक्तिरुत्क्रांतिर्गतिरुत्तरा ॥ ब्रह्मप्राप्तिर्ब्रह्मलोकाविति पादार्थसंग्रहः ॥१॥
इति प्रथमपादे श्रवणाद्यावृत्त्या निर्गुणं ॥ उपासनया सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पाप
पुण्यालेपविनाशलक्षणा मुक्तिरभिहिता ॥१॥ द्वितीयपादे म्रियमाणस्योत्क्रांतिप्रकारो निरूपि
तः ॥२॥ तृतीयपादे मृतस्य सगुणविद उत्तरमार्गो निदिष्टः ॥३॥ चतुर्थपादे पूर्वभागेन निर्गु
णब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकस्थितिर्निरू
पिता ॥४॥ एवं पादार्थः संग्रहीतः ॥ संत्वेवं शास्त्राध्यायपादप्रतिपाद्यार्थाः किं तत इत्यत आ ३
ह ॥ जहित्वा संगतीस्तिस्रस्तथावांतरसंगतीः ॥ आक्षेपदृष्टांतप्रत्युदाहरणादिकाः ॥१॥ इ

ति ॥ तद्यथा ईक्षत्यधिकरणे तदैक्षतेति वाक्यं प्रधानपरं ब्रह्मपरं वेति विचार्यत्वात् तस्य विचार
स्य ब्रह्मसंबंधित्वात् ब्रह्मविचारशास्त्रे संगतिः ॥ वाक्यं ब्रह्मणि तात्पर्यवदिति निर्णयात् समन्व
याध्यायसंगतिः ॥ ईक्षणस्य चेतनब्रह्मण्यसाधारणत्वेन स्पष्टब्रह्मलिंगत्वात् प्रथमपादसं
गतिः ॥ एवं सर्वेष्वप्यधिकरणेषु यथायोग्यं संगतित्रयमूहनीयं ॥ अवांतरसंगतिस्त्वनेकधाः
त्रिद्यात ॥ आक्षेपसंगतिः १ दृष्टांतसंगतिः २ प्रत्युदाहरणसंगतिः ॥३॥ प्रासंगिकसंगतिरित्येव
मादि ॥४॥ सेयमावांतरसंगतिः ॥ कृत्स्नेनाभिहितं शाक्येतेनस्तां प्रत्युत्पादयति ॥ पूर्वन्यायस्य सिद्धांत
युक्तिं वीक्ष्य परे न ये पूर्वपक्षोक्तयुक्तिं च तन्नाक्षेपादियोजयेदिति ॥ तद्यथा प्रथमाधिकरणस्य
ब्रह्मविचारशास्त्रमारंभणीयमिति सिद्धांततत्र युक्तिर्ब्रह्मणः संदिग्धत्वादिति ॥ द्वितीयाधि
करणस्य जगज्जन्मादि ब्रह्मलक्षणं न भवतीति पूर्वपक्षः ॥ तत्र युक्तिं जन्मादेर्जगन्निष्ठत्वा

र्यवैराग्यं निरूपितं॥१॥ द्वितीयपादे पूर्वभागेन त्वंपदार्थः शोधितः॥ उत्तरभागेन च तत्पदार्थः॥२॥ तृती
यपादे सगुणविद्यासु गुणोपसंहारो निरूपितः॥३॥ चतुर्थपादे निर्गुणज्ञानबहिरंगसाधनाश्र
मयज्ञादीन्यंतरंगसाधनशमदमनिदिध्यासनादीनि च निरूपितानि। चतुर्थाध्यायगतपादार्थान्विज
जातः॥ चतुर्थे जीवतो मुक्तिरुत्क्रांतिर्गतिरुत्तरा॥ ब्रह्मप्राप्तिब्रह्मलोकाविति पादार्थसंग्रहः॥१॥
इति प्रथमपादे श्रवणाद्यावृत्त्या निर्गुणं॥ उपासनया सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पाप
पुण्यालेपविनाशलक्षणा मुक्तिरभिहिता॥१॥ द्वितीयपादे म्रियमाणस्योत्क्रांतिप्रकारो निरूपि
तः॥२॥ तृतीयपादे मृतस्य सगुणविद उत्तरमार्गो निदिष्टः॥३॥ चतुर्थपादे पूर्वभागेन निर्गु
णब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकस्थितिर्निरू
पिता॥४॥ एवं पादार्थः संगृहीतः॥ सांप्रतं शास्त्राध्यायपादप्रतिपाद्यार्थाः किं तत उच्यत आ ३
ह॥ जहित्वा संगतीस्तिस्रस्तथावांतरसंगतीः शास्त्राद्याक्षेपदृष्टांतप्रत्युदाहरणादिकाः॥५॥६

ति॥ तद्यथा ईक्षत्यधिकरणे तदैक्षतेति वाक्यं प्रधानपरं ब्रह्मपरं वेति विचार्यत्वात्॥ तस्य विचार
स्य ब्रह्मसंबंधित्वात् ब्रह्मविचारशास्त्रसंगतिः॥ वाक्यं ब्रह्मणि तात्पर्यवदिति निर्णयात् समन्व
याध्यायसंगतिः॥ ईक्षणस्य चेतनब्रह्मण्यसाधारणत्वेन स्पष्टब्रह्मलिंगत्वात् प्रथमपादसं
गतिः॥ एवं सर्वेष्वप्यधिकरणेषु यथायोग्यं संगतित्रयमूहनीयं॥ अवांतरसंगतिस्त्वनेकधा
भिद्यते॥ आक्षेपसंगतिः१ दृष्टांतसंगतिः२ प्रत्युदाहरणसंगतिः॥३॥ प्रासंगिकसंगतिरित्येव
मादि॥४॥ सेयमवांतरसंगतिः॥ व्युत्पन्नेनादितं शक्यते तस्तां व्युत्पादयति॥ पूर्वन्यायस्य सिद्धांत
युक्तिं वीक्ष्य परेण न्यायेन पूर्वपक्षोक्तयुक्तिं च तत्राक्षेपादि योजयेदिति॥ तद्यथा प्रथमाधिकरणस्य
ब्रह्मविचारशास्त्रमारंभणीयमिति सिद्धांते तत्र युक्तिर्ब्रह्मणः संदिग्धत्वादिति। द्वितीयाधि
करणस्य जगज्जन्मादि ब्रह्मलक्षणं न भवतीति पूर्वपक्षः॥ तत्र युक्तिः जन्मादेर्जगन्निष्ठत्वा

दिति॥ तदुभयमवलोक्य तयोरापेक्षेसंगतिंम्याजयेसंदिग्धत्वाद्ब्रह्मविचार्यमित्येतदयुक्तं।
जन्मादस्यनिष्ठत्वेन ब्रह्मणोलक्षणानावेस्यतिब्रह्मैवनास्तिकुतस्तस्यसंदिग्धत्वंविचार्य
त्वंवत्याद्वेपसंगतिः॥ दृष्टांतप्रत्युदाहरणसंगतीचात्रयोजयितुंशक्येते॥ यथासंदिग्धत्वेन
हेतुनाब्रह्मणोविचार्यत्वंजन्माद्यन्यनिष्ठत्वहेतुनाब्रह्मणोलक्षणंनास्तीति॥ दृष्टांतसंगतिः॥
यथाविचार्यात्वाद्धेतुरस्तिनतथालक्षणसज्ञावाहेतुंपश्यामइतिप्रत्युदाहरणसंगतिः॥ ए
तद्दृष्टांतप्रत्युदाहरणसंगतीसर्वत्रसुलभे॥ पूर्वाधिकरणसिद्धांतवक्ष्यमाणाधिकरणपूर्व
पक्षहेतुमत्वसाम्यात्सानराधिकरणसिद्धांतादेतुभूत्यत्वविलक्षणस्यचमंदिरस्त्युत्वेद्वि
तुंवाक्यवादा…देपसंगतिर्यथायोग्यमुन्नेया॥ प्रासंगिकसंगतिरुदाह्रियते देवताधिक ५
रणस्याधिकारविचाररूपत्वात्समन्वयाध्याये ब्रह्मवाक्यविषये तृतीयपादे संगत्यभावेपि

बुद्धिस्थावांतरसंगतिरस्ति तथाहि पूर्वाधिकरणेंऽगुष्ठमात्रवाक्यस्य ब्रह्मपरत्वात् अंगुष्ठमात्रत्वं
ब्रह्मणोमनुष्यहृदयापेक्षंमनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तंतत्प्रसंगेनदेवताधिकारो बु
द्धिस्थःसेयंप्रासंगिकीसंगतिः॥ तदेवंन्यायसंगतिर्व्युत्पादिता॥ अथेदानीमत्यधिकरणमव
यवचतुष्टयंश्लोकाभ्यांसंगृह्यात॥ तत्रशास्त्रस्यप्रथमसूत्रमथातो ब्रह्मजिज्ञासेति॥ प्रथ
माधिकरणमारचयति॥ ॥अविचार्यंविचार्यंवाब्रह्माध्यासानिरूपणात्॥ असंदेहाफल
त्वाभ्यांनविचारंतदर्हति॥१॥ अध्यासादेर्बंधसिद्धिःसंगं ब्रह्मश्रुतिरित॥ संदेहान्मुक्तिना
वाज्ञविचार्यंब्रह्मवेदतइति॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य…या ६
लदर्शनफलंउद्दिश्यतत्साधनत्वेनश्रवणंविधीयते श्रवणंनामवेदांतवाक्यानांब्रह्मणि ता
त्पर्यनिर्णेतुमनुकूलोन्यायविचारः तदेतद्विचारविधायकंवाक्यंविषयः नचायंविषयस्त्रो

कायाः संगृहीताः॥ संदेहस्तं यद्धेणिवा यौ संदेहस्य दृप्रतीतेः॥ ब्रह्मविचारात्मकं न्यायनिर्णयात्
कं शास्त्रमनारभ्यमारभ्यं वा भवतीति संदेहः॥ पूर्वोत्तरपक्षहेतुक्तिद्वयं सर्वत्र संदेहबीजमुन्नेयं अ
त्रानारभ्यमिति तावत्प्राप्तं विषयप्रयोजनाभावात् असंदिग्धं हि विचारस्य विषयो भवति॥ ब्र
ह्मतु न संदिग्धं तथा हि तत् किं ब्रह्माकारेण संदिह्यते आत्माकारेण वा नाद्यः॥ सत्यं ज्ञानमनं
तं ब्रह्मेति वाक्येन ब्रह्माकारस्य निश्चयात्॥ न द्वितीयः अहंप्रत्ययेनात्माकारस्यापि नि
श्चयात्॥ अध्यस्तात्मविषयत्वेन भ्रांता इदं प्रत्यय॥ इति चेन्न अध्यासस्यानिरूपणात्॥ तमःप्र
काशवत् विरुद्धयोर्जडाजडयोर्देहात्मनोः शुक्तिरजतवदन्योन्यतादात्म्याध्यासो निरूप
यितुं न शक्यते॥ तस्माद् भ्रांता च्यांश्चक्षत्यहंप्रत्ययान्यं निश्चितस्यासंदिग्धत्वात् न विचार ५
स्य विषयोऽस्ति नापि प्रयोजनं परमः उक्तप्रकारेण ब्रह्मात्मनि निश्चितेऽपि मुक्त्यदर्शना

ब्रह्मवेदस्य कर्तृत्वं विनतुमर्हति कुतः निश्वसितन्यायेनाप्रयत्नोत्पत्त्यवगमात्॥ तस्माद्यज्ञात्सर्व
हुत ऋचः सामानि यज्ञिरे इति यार्वेर्याज्ञिरुच्यमानाद्यज्ञशब्दवाच्याद्ब्रह्मणो विस्पष्टमवदो
ति३ त्पत्तिश्रवणाच्च॥ अप्रयत्नोत्पत्त्येवार्थं बुद्ध्वा रचितिः कालिदासादिवाक्यैर्विलक्षणपादपौरुषे
य[illegible]वं प्रतिसर्गं पूर्वसाम्येनोत्पत्तेः प्रवाहरूपेण नित्यता॥ सर्वजगद्व्यवस्थाबनासिवदकर्तृ
त्वनिरूपणेन ब्रह्मणः सर्वज्ञत्वं निरूपितं भवति॥ २॥ द्वितीय वर्णकमाह॥ अस्त्वन्यमेयताप्य
स्य किंवा वैदिकमेयता घटवत्सिद्धवस्तुत्वाद् ब्रह्मान्येनापि मीयते॥ रूपलिंगादिराहित्यान्न
स्यमां[illegible]तरयोग्यता॥ तं त्वौपनिषदमित्यादिश्रोक्ता वैदिकमेयता॥ तं त्वौपनिषदं पुरुषं पृच्छा
मीति शाकल्यं प्रति याज्ञवल्क्येनोक्तवाक्येऽपर ब्रह्मरूपस्य पुरुषस्योपनिषदेकवेद्यत्वं प्रतीयते ७
तद्वाक्यं विषयः॥ तत्र ब्रह्मणः प्रत्यक्षादिगम्यत्वमस्ति न वेति संशयः॥ पूर्वपक्षस्तु विस्प

सु१

द्विशब्दानामखंडपर्यवसायित्वेस्वरूपलक्षणसिद्धिरि…नयमप्युपपन्नं॥शास्त्रयोनित्वात्।
तृतीयाधिकरणस्यप्रथमवर्णकमाह नकर्तृब्रह्मतावदस्यकिंवाकर्तृनकर्तृतत्।विरूप
नित्ययावाचेत्येवंनित्यत्ववर्णनात्कर्तृनिःश्वसिताद्वाक्यान्नित्यत्वंपूर्वसाम्यतः॥सर्वाव
ज्ञास्तिवेदस्यकर्तृत्वात्सर्वविद्वावादति॥३॥अस्यमहतोभूतस्यनिश्वसितामेतदृग्वेदोयजु
र्वेदःसामवेदइतिवाक्यंविषयः॥यतऋग्वेदादिकमस्ति…दस्यनित्यसिद्धस्यब्रह्म
णोनिश्वासइवायत्नेनसिद्धमित्यर्थः॥ ब्रह्मवेदंनकरोतिकरोतिवेतिसंदेहः नकरोतिवे
दस्यनित्यत्वात्वाचाविरूपनित्ययेत्यस्मिन्मंत्रेविरूपतिादवतांसंबाध्यनित्ययावाचा
स्तुतिंप्रेरयेत्येवंप्रार्थ्यतेनित्यावाग्वेदएव॥अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा।
आदौवेदमयीदिव्यायतःसर्वाःप्र..त्तयइतिस्मृतेः॥अतोनवेदकर्तृब्रह्मेतिप्राप्तेब्रूमः॥

निचभूतानिजायंतेयेनजातानिजीवंति यत्प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेति
सत्यंज्ञानमनंतंब्रह्मेतिवाक्यद्वयंविषयः॥प्रयंतिम्रियमाणानीत्यर्थः॥तत्रश्रूयमाणंब्रह्मल
क्षणंनघटतेघटतेवेतिसंशयेनघटतेतथाहिकिंजन्मादिकंतटस्थलक्षणमुतसत्यादिकंना
द्यः तस्यजगन्निष्ठत्वेनब्रह्मसंबंधाभावात्॥द्वितीयपिलोकप्रसिद्धस्यसत्यज्ञानादिस्वीका
रेभिन्नार्थत्वादखंडंब्रह्मनसिध्येदप्रसिद्धस्यसत्यादेर्लक्षणत्वमप्ययुक्तंतस्मात्तटस्थल
क्षणंस्वरूपलक्षणंचनविद्यते॥अत्रोच्यते॥जन्मादेरन्यनिष्ठत्वेपितत्कारणत्वंब्रह्मणिक
ल्पनयासंबद्धंतटस्थलक्षणंनविघ्नतियोज्ञंडंशःसास्त्रश्वितिवत्तयतज्जगत्कारणंतद्ब्र
ह्मेतिकल्पितलनापिवस्तुनोपलक्षयितुंशक्यत्वात्भिन्नार्थानामपिपिष्टस्तुतजामात्रादि ६
शब्दानामिवदेवदत्तपर्यवसायित्वमप्यानविरोधः तथालोकसिद्धभिन्नार्थवाचित्वा।

तस्माद्ब्रह्मनविचारमर्हतीति शास्त्रमनारंभणीयमिति पूर्वःपक्षः॥ अत्रोच्यते शास्त्रमारं
भणीयं कुतः विषयप्रयोजनसद्भावात् तथाहि अस्मत्प्रत्यययाविप्रतिपत्त्या संदिग्धं ब्रह्मात्मव
स्तु अयमात्मा ब्रह्मेति श्रुतिः सर्वंगं ब्रह्मात्मनो [illegible] प [illegible] दिशति अहं मनुष्य इत्याद्या देहादि
र्देहादितादात्म्याध्यासेनात्मानं गृह्णाति तदध्यासस्य च दुर्निरूपत्वमलंकारायत स्मात्
संदिग्धं वस्तु विषयः तन्निश्चयेन मुक्तिलक्षणं प्रयोजनं श्रुत्यादिहृदनुभवेन च प्रसि
न४ द्धं तस्माद्वेदांतवाक्यविचारमुखेन ब्रह्मणो विचारार्हत्वात् शास्त्रमारंभणीयमिति सिद्धां
तः॥ ॥जन्माद्यस्य यतः॥ द्वितीयाधिकरणमारचयति॥ लक्षणं ब्रह्मणो नास्ति किं वा
स्ति न हि विद्यते॥ जन्मादिरन्यनि[illegible]ष्ठत्वात् सत्यादिश्चाप्रसिद्धितः॥ ब्रह्मनिष्ठं कारणत्वं
स्याल्लक्ष्यस्य सर्पभुजंगवत्॥ लौकिकान्येव सत्यादीन्यखंडं लक्षयंति हि॥२॥ यतो वाऽस्मा

त्॥ रूपरसाद्यभावान्नेन्द्रियग्राह्यता॥ लिंगसादृश्यादिराहित्याद्यनानुमानोपमानादियोग्य
ता॥ उपनिषत्स्वेवाधिगत इति व्युत्पत्त्या नावेदविन्मनुते तं बृहंतमिति प्रतिषेधश्रुत्या च वेदै
कमेयत्वं भाष्यकारैर्जन्मादिसूत्रे श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणमि
ति नानामेयत्वमंगीकृतमिति चेद्बाढं प्रथमतः श्रुत्यैव प्रमिते ब्रह्मणि पश्चादनुवादरूपेणा
नुमानानुभवयोरंगीकारात् अतो वेदैकमेयं ब्रह्म॥ तत्तु समन्वयात्॥ ॥चतुर्थाधिकर
णस्य प्रथमवर्णकमाह॥ वेदांताः कर्त्रादिवादिपरा ब्रह्मपरा उत॥ अनुष्ठानोपयोगित्वात्क
र्त्रादिप्रतिपादकाः॥ भिन्नप्रकरणाल्लिंगषट्काच्च ब्रह्मबोधकाः॥ यतिप्रायाजानर्थदाने॥ नु
घातादि किं। स्पष्टौ विषयसंदेहौ॥ जीवप्रकाशकवाक्यानि कर्तृपराणि॥ ब्रह्मप्रकाशकवाक्य
नि देवतापराणि स्तुतिप्रकाशकवाक्यानि साधन[illegible]पराणि॥ तथा यतिवदांतनामनुष्ठा

नोपयोगित्वं भविष्यति। ब्रह्मपरत्वे त्वनुष्ठानार्थं न वाप्तिः प्रयोजनं च स्यात् तस्माद्वेदांताः कर्त्रादिदेव
तासाधनप्र[illegible]तिपादकाः॥ अत्रोच्यते॥ ब्रह्मपरा वेदांताः कुतः भिन्नप्रकरणपठितानां तेषां
कर्त्रादिप्रतिपादकतया कर्मांगशेषत्वासंभवात् तात्पर्यनिश्चयहेतुलिंगषट्केन ब्रह्मपरत्वसंभवा
च्च लिंगषट्कं तु वृद्धैर्दर्शितं। उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं। अर्थवादोपपत्ती च लिं
गं तात्पर्यनिश्चये इति सदेव सोम्येदमग्र आसीदित्युपक्रमः। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आ
त्मा तत्त्वमसीत्युपसंहारः। तयोर्ब्रह्मविषयत्वेनैकरूप्यमेकं लिंगं। असकृत्तत्त्वमसीत्युक्तिरभ्या
सः॥ मानांतरागम्यत्वमपूर्वत्वं॥ एकविज्ञानेन सर्वविज्ञानं फलं। उत्पत्तिस्थितिप्रलयप्रवेशनि
यमनानि प्रपंचार्थवादाः॥ मृदादिदृष्टांता उपपत्तयः। एतैर्लिंगैर्ब्रह्मपरत्वं निश्चेयं॥ न चानुष्ठानमं ८
तरेण प्रयोजनाभावः। नायं सर्प इत्यादावविवाबाधसदनर्थनिवृत्तेः संभवात्। द्वितीयवर्णकमाह।

[illegible] प्रतिपत्तिविधिसंति ब्रह्मण्य[illegible]वसिता उत शास्त्रवात्ते विधातारो मननादेश्च कीर्तनात्
नाकर्तृतंत्रेऽस्ति विधिः शास्त्रत्वं शंसनादपि। मननादिस्तु राबोधाद्ब्रह्मण्यवसितास्तत इति॥२
एकादशीमध्यात ब्रह्मपरत्वेपि वेदांताः न ब्रह्मण्येव पर्यवस्यंति किं तर्हि पारोक्ष्येण ब्रह्मतत्त्वं
प्रतिपाद्य पश्चादपरोक्षप्रतिपत्तिं विदधति तथा च सति वेदांतानां शासनाच्छास्त्रत्वमुपपद्य
ते किं च श्रोतव्य इति श्रवणं शाब्दज्ञानात्मकं विधाय यथा मंतव्यो निदिध्यासितव्य इत्यनुमननवज्ञाना
वि५ त्मकं मननादिकं स्पष्टमेव विधीयते तस्मात्प्रतिपत्तिविधातारो वेदांता इति प्रथमवर्णकः। न प्रतिप
त्तिविधिः संभवति क[illegible]र्तुमकर्तुं [illegible]न्यथा वा कर्तुमशक्यत्वाद्वस्तुरूपतंत्रत्वात्।
शास्त्रत्वं तु नोपदेष्टृशासनादेव नियतं सिद्धवस्तुशंसनेनापि तदुपपत्तेः॥ शाब्दज्ञानजाते प
श्चादनुभवात्मकं मननादिकं विधीयते इति वक्तुं न शक्यं। दशमस्त्वमसीति वाक्याच्छाब्दस्यैवापरोक्षा

नु श्रवणजनकत्वेन शास्त्रबाधस्तद्वारेवास्तां नैवनादिनिर्देशाय व्यापाररूपस्य कर्तृत्वं तत्रस्य मननादे
र्विधानात् तस्मात्तत्त्वमसीत्यादयो वेदांता ब्रह्मण्येव वासिताः॥ ईक्षतेर्नाशब्दं॥ ॥पंचमाधिकर
णमाह। तदैक्षतेति वाक्येन प्रधानं ब्रह्म वोच्यते। ज्ञानक्रियाशक्तिमत्त्वात्प्रधानं सर्वकारणं।
१। ईक्षणाच्चेतनं ब्रह्म क्रियाज्ञानं तु मायया। आत्मशब्दात्मतादात्म्ये प्रधानस्य विरोधिनी॥
इति।२। छांदोग्य षष्ठाध्याये सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमिति प्रस्तुत्य तदैक्ष
त बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति श्रूयते तत्र सांख्या मन्यंते सच्छब्दवाच्यं सर्वजग
त्कारणं प्रधानं न तु ब्रह्म प्रधानस्य सत्वगुणांशकतया परिणामितया च ज्ञानशक्तिक्रिया
शक्तिसंभवान्निर्गुणस्य कूटस्थस्य ब्रह्मणः तदसंभवादिति। अत्रोच्यते। ईक्षितृत्वश्रवणा
च्चेतनं [illegible] ब्रह्म लक्षणि मायया संज्ञ विषयतः किंचानेन जीवेनात्मनानुप्रविश्य नामरूपे व्या ५
ब्रह्म सच्छब्दवाच्यं अचेतनस्य प्रधानस्येक्षितृत्वायोगात् ज्ञानक्रियाशक्ती १

६
वे करवाणीति नामरूपव्याकरणं जगत्कारणदेवतास्ववाचकेनात्मशब्देन चेतनं जीवं व्यपदिशति। त
त्त्वमसीति चेतनस्य श्वेतकेतोर्जगत्कारणतादात्म्यं गुरुरुपदिशति। तदुभयमपि अचेतन
स्य प्रधानस्य जगत्कारणत्वे विरुध्यते। तस्माच्चेतनं ब्रह्म सच्छब्देनोच्यते॥ आनंदमयोऽभ्यासात्
॥ षष्ठाधिकरणमेकादशभिर्मातृभी रचयति। संसारी ब्रह्म वानंदमयः स्यात्संसार्ययं भवेत्।प्रा। विका
रार्थमयट्शब्दात्प्रियाद्यवयवोक्तितः। अस्मादात्मनः प्रक्रमादिभ्यां ब्रह्मानंदमयो भवेत्।प्रा
चुर्यार्थे मयट्शब्दः प्रियाद्याः स्कंधरूपाधिगाः।२। इति। तैत्तिरीयके देहप्राणमनोबुद्ध्यानंदरूपाः
अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयसंज्ञकाः पंचपदार्थाः क्रमेणैकस्मादांतराः प
ठिताः प्रतिपादिताः। तत्र सर्वांतर आनंदमयः संसारी परमात्मा वेति संदेहः संसारीति प्राप्तं कुतः
आनंदस्य विकार आनंदमय इति व्युत्पत्तेः संसारिणि संभवात्। अविकृते तु परमात्मन्ययोन

संभवति किंच तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं
प्रतिष्ठेत्यानंदमयस्य पंचावयवा उच्यंते। अपेक्षित विषयदर्शनजं सुखं प्रियं तल्लाभजन्यो
मोदः तद्भोगजन्यः प्रमोदः सुषुप्त्यादौ सर्वसमानमज्ञानोपहितं सुखसामान्यमानंदः निरुपा
धिकं सुखं ब्रह्म प्रियादीनां पंचावयवानां शिर आदिरूपत्वं प्रतीत्यौपाकर्णीयकल्पात् पक्षि पत्ति ४
त्वेन कल्पितस्यानंदमयस्य शिरःपक्षौ चैतदवयवत्रयमात्मशब्देन मध्यशरीरं चतुर्थावयवत्वे
नोच्यते पुच्छमपरभागः प्रतिष्ठा पादौ अयं पंचमावयवः॥ न च निरंशस्य परमात्मनोऽवय
वा युक्ताः तस्मात् संसार्येवानंदमय इत्येवं प्राप्ते ब्रूमः॥ आनंदमयः परमात्मा कुतः अभ्यासा
त् तस्यैषानंदस्य मीमांसा भवति एतमानंदमयमात्मानमुपसंक्रामति इत्यादिना आनंदमयो १०
ऽभ्यस्यते तस्यात्र श्रूयते तात्पर्यलिंगं तात्पर्यं चाद्वदतां नां ब्रह्मण्येवावगम्यावाचाम किंच सत्यं ज्ञान

मनंतं ब्रह्मेति ब्रह्मोपक्रमादिदं सर्वमसृजत इति सर्वजगत्स्रष्टृत्वादिश्रवणात् आनंदमयो ब्रह्म न च ८१
ब्रह्मणि मयट् विकारार्थानुपपत्तिः प्राचुर्यार्थस्य संभवात् प्रियाद्यवयव अपि विषयदर्शनाद्युपाधिक
तास्त्विष्यंतिस्तु तस्मात्परमानंदमय इत्यक्तादद्विनां मतं॥ ॥इदानीं स्वमतानुसारेणाधिकरणं उ
च्यते। अस्यांगं प्रधानं वा ब्रह्म पुच्छमिति श्रुतं॥ स्यादानंदमयस्यांगं पुच्छे गवत्वप्रसिद्धितः॥१॥ लांगू
लासंभवादत्र पुच्छं नाधारलक्षणा। आनंदमयजीवास्मिन्नाश्रितातः प्रधानतेति॥२॥ ब्रह्म पुच्छं
प्रतिष्ठेति यदुक्तं ब्रह्म तत् किमानंदमयस्यांगत्वेन निर्दिश्यते उत स्वयं प्राधान्येन प्रतिपाद्यत इति
तत्र संशयः। आनंदमयस्यावयवत्वेन तितावल्याँ तालाकि पुच्छशब्दस्यावयववाचित्वप्रसिद्
त्वात् तदुच्यते। न पुच्छशब्दोऽवयववाची किंतु लांगूलवाची न चानंदमयस्य लांगूलं संभवति
लांगूलस्य गवादिलक्षणान्नामयावयवत्वात् अतः पुच्छशब्दस्य पुच्छत्वाधारस्तिं लक्षयतीति यो

स्यनावकाशादत्राधारो लक्ष्यते ब्रह्मानंदमयस्य जीवस्याधारः तत्कल्पनाधिष्ठानत्वात् न चानंदम
यः परमात्मा प्राचुर्यार्थस्वीकारेप्यल्पदुःखस्य जीवस्य प्रतीतेः तस्मा जीवाधारो ब्रह्मणाधा
त्वेन प्रतिपाद्यते तत् यथा असन्नेव स भवति असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद संत
४ब्र मेनं ततो विदुरित्यादि ब्रह्मात्मा यो ब्रह्मविदाप्नोतीति ब्रह्मोपक्रमस्यानुकूलो भवति॥ ॥अं
तस्तद्धर्मोपदेशात्॥ अष्टमाधिकरणमारचयति। हिरण्मयो देवतात्मा किं वाथो परमेश्वरः
मर्यादाधाररूपोक्तेर्देवतात्मैव नेश्वरः॥ सार्वात्म्यात्सर्वदुरितराहित्याच्चेश्वरो मतः॥ म
र्यादाद्युपास्त्यर्था ईशस्यापि स्युरुपाधिगाः॥ छांदोग्यस्य प्रथमाध्याये उद्गीथोपासना
यां उपसर्जनास्तु पास्यान्य निधाय प्रधानमुपास्यमभिधातुमिदमाम्नायते अथ य एषोंत ११
रादित्ये हिरण्मयः पुरुषो दृश्यत इति॥ तत्रादित्यमंडलविद्याकर्मातिशयवशात्कश्चि

ज्जीवो देवभावमुपेत्य जगदधिकारं निष्पादयन्नवतिष्ठते॥ ईश्वर[illegible]स्य सर्वगतत्वान्मंडले
पि वर्तित्वात्तस्यायाः संशयः॥ तत्र देवतात्मेति तावत्प्राप्तं कुतः मर्यादाधाररूपाणां श्रुत्य
मानत्वात् य चामुष्मात्परांचो लोकाः तेषां चाष्टे देवकामानां चेति ऐश्वर्यमर्यादो
क्तिः अंतरादित्य इत्याधारोक्तिः हिरण्मय इति रूपोक्तिः॥ नहि सर्वेश्वरस्य सर्वाधारस्य नी
रूपस्य परमेश्वरस्यैश्वर्यमर्यादाधाररूपाणि संभवंति तस्माद्देवतात्मेति प्राप्ते उच्यते हि
रण्मय ईश्वर एव भवति कुतः॥ सर्वात्मत्वश्रवणात् तस्यैवर्क्साम तदुक्थं तद्यजुस्तद्ब्रह्मेति
वाक्ये तत्त्वबहिःश्रुतं तं हिरण्मयं पुरुषं परामृश्य तस्य सकलसामाद्यात्मकत्वजगदात्मकत्वमुपदि
श्यते तच्चाद्वितीये परमेश्वरे मुख्यमुपपद्यते न तु सद्वितीयायां देवतायां तथा स ए
ष सर्वेभ्यः पाप्मभ्य उदित इति श्रूयमाणं सर्वपापराहित्यं ब्रह्मणोऽसाधारणं लिंगं॥

यद्यपिदेवतायाःकर्मण्यनधिकारात्क्रियमाणाकरिष्यमाणपापयोरश्लेषःतथापिस्थूरा
दिजनितदुःखसद्भावात्तादृशभूतंजन्मांतरसंचितदुरितमनुवर्त्तत एव॥मर्यादाधारकरू
लि३ पात्उपाधिधर्मतयासोपाधिकपरमात्मनउपास्यवर्त्तित्वमर्हतितस्मादीश्वरोहिरण्मयः
आ[illegible]शस्त[illegible]गात्॥८॥अत्राधिकरणमाह॥आकाशइतिहोवाचेत्यत्रखंब्रह्मवा
छि४ त्रखं[illegible]शब्दस्यतत्ररूढत्वाद्वाय्वादेःसर्जनादपि॥१॥आकाशाज्जगदुत्पत्तिहेतुत्वाच्छ्रौ
तस्तद्वितः॥एवकारादिनाचात्रब्रह्मैवाकाशशब्दितं॥२॥पूर्वोक्तात्हिरण्मयवाक्याद्
उत्तरस्मिन्वाक्येशालावत्येनमहर्षिणासर्वलोकाधारेवस्तुनिपृष्टेसतिप्रवाहणो
राजोत्तरमाहातत्रत्यंवाक्यमेतत्॥आकाशइतिहोवाचसर्वाणिहवाइमानिभूतानि १२
आकाशादेवसमुत्पद्यंतआकाशंप्रत्यस्तंयंतीतिआकाशोह्येवैभ्योज्यायानाकाशः
या१

परायणमितितत्राकाशशब्दार्थविषयःसंदेहोभवतिसंदेहरूढित्वाद्वियदितिप्राप्तंसर्वभू
तोत्पत्तिलयहेतुत्वंचवियतउपपद्यतेआकाशाद्वायुर्वायोरग्निरित्यादौवाय्वादीनांस
र्वभूतानांवि[illegible]कार्यत्वश्रवणात्॥अत्रोच्यते॥ब्रह्मैवात्राकाशशब्दार्थः॥सर्वाणिहवेत्यत्रा
संकुचितसर्वशब्देनवियत्सहितसर्वभूतोत्पत्तिहेतुत्वश्रवणात्॥नचवियतोवियद्धेतु
त्वंसंभवतिनहितत्रलौकिकीवियत्पुत्रवाच्युत्पत्तिब्रह्मण्यपि॥आकाशोवैनामनामरू
पयोर्निर्वहितेतिप्रयोगदर्शनात्॥किंचाकाशादेवेत्यवकारःकारणांतरंव्युदस्यति
नचितद्वियतस्संभवतिघटादिषुवियद्व्यतिरिक्तानांमृदादिकारणानामुपलंभात्॥ब्र
ह्मपक्षेतुब्रह्मणःस्वरूपस्यसर्वानन्यतयाकारणत्वंसदासदुपपद्यते॥ज्यायस्त्वपराय
णत्वंचश्रुत्यंतरेब्रह्मणःश्रूयेतेज्यायान्पृथिव्याज्यायानंतरिक्षात्॥दिवाननमानंदंब्रह्म

रातद्धेतुः परायत्तमिति कर्मफलं दातुं समर्थमित्यर्थः॥ तस्माद्ब्रह्मैवाकाशशब्देन विवक्षि
तं॥ अत एव प्राणः॥ नवमाधिकरणमारचयति॥ सुरवस्तु वा सुरीशा वा प्राणः प्रस्तावदेव
ता॥ वायुर्भावतत्र मुख्यान्नोच्छूतमात्रिन्द्रियस्य हयात्॥९॥ संकोचोऽहपरत्वस्या सर्वच्छेतत्वय
श्चातः॥ आकाशशब्दवत्प्राणशब्दस्तानब्रह्मवाचकः॥२॥ आकाशवाक्यादुत्तरस्मिन्वाक्ये प्र
स्तावनाम्नः सामभागस्य देवता यां प्रस्तोता त्राहष्टाया मुषस्तिरुत्तरं ददौ तत्रत्यं वाक्यमेतत्
। प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते
सैषा देवता प्रस्तावमन्वायत्तेति॥ तत्र प्राणशब्दोक्ता मुखबिलान्तर्वर्तिवायुर्भवतु स
र्वभूतलयस्य तत्र सुसंपादत्वात्॥ सुषुप्तिकाले भूतसाराणामिन्द्रियाणां प्राणवायौ १६
प्रविलयादिति प्राप्ते उच्यते॥ इन्द्रियमात्रलयपरत्वेन व्याख्यायमाने सर्वाणि ह वा इत्यसो

वि

र्वशब्दः संकुचितः स्यात् आकाशशब्दवत्प्राणशब्दोऽपि प्रसिद्धोनरूढ्यवकाशाभ्यां ब्रह्मवाचकः अ
स्ति हि घ्राणशब्दस्य ब्रह्मणि प्रसिद्धिः प्राणस्य प्राणमित्यत्र ब्रह्म [illegible] विवक्षया द्वितीयप्राणश
ब्दप्रयोगात्॥ तस्मादीश्वरः प्राणः॥ ॥ज्योतिश्चरणाभिधानात्॥१०॥ दशमाधिकरणमाह॥ कार्यं
ज्योतिरुत ब्रह्म ज्योतिर्दीप्यत इत्यदः॥ ब्रह्मणः संनिधेः कार्यं तेजो लिंगबलादपि॥१॥ चतुष्पा
त्त्वं ब्रह्मयच्छब्दानुवर्तितात्॥ ज्योतिःस्याद्भासकं ब्रह्म लिंगं [illegible] त्वपाधियोगतः॥२॥ छांदोग्य
स्य तृतीयाध्याये गायत्रीविद्यायां हृदयच्छिद्रोपासनमभिधाय इदमाम्नायते अथ यदतः परो दि
वो ज्योतिर्दीप्यते इति॥ तत्र द्युलोकात्परं दीप्यमानं वस्तु किं कार्यरूपं तेज उत
ब्रह्मेति संशये कार्यमिति तावत्प्राप्तं ब्रह्मणोऽसंनिहितत्वेन वाक्यस्य ब्रह्मपरत्वायोगात्ते
जः परत्वं तूपपद्यते॥ तल्लिंगयच्छ्रवणात् इदं तावद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति श्रूयमा

णे जाठराग्नेर्दृष्टेतेजोलिंगं॥ अतोच्यते॥ अभिहितोऽयंनिधिःपूर्वस्मिन्गायत्रीखंडपादोस्यसर्वा
भूतानित्रिपा दस्यामृतंदिवीतिचतुष्पादाब्रह्मणःप्रकृतत्वात्तस्यचात्रप्रकृतवाचिनाय
च्छब्देनानुवर्तनादस्यब्रह्मणःसर्वाणिभूतान्येकांशःपादत्रयोपलक्षितमनेनतंस्वरूपंद्योतना
त ४ त्माकस्वस्मिन्ननतिष्ठदित्यर्थः।नचज्योतिःशब्दस्यब्रह्मणिवृत्त्यनुपपत्तिःभास्यकत्ववाचित्वाद्ब्र
ह्मणोजगद्भासकत्वात्तेजोलिंगत्वो पाधिकेब्रह्मण्येवकल्प्यते।तस्माज्ज्योतिर्ब्रह्म॥ ॥प्राण
स्तथानुगमात्॥२८॥एकादशाधिकरणमारचयति॥प्राणोस्मीत्यत्रवाय्वि ंद्रजीवब्रह्मसुसं
शयःचतुर्णांलिंगयत्कात्पूर्वपक्षस्तुनिर्णयः॥ब्रह्मणोनेकलिंगानितानिसिद्धान्यनन्यथा॥
अन्येषामन्यथासिद्धत्वाद्ध्येयंब्रह्मनेतरत्॥३॥कौषीतकीनामुपनिषदिइंद्रप्रतर्दनाख्यायिका १४
यांप्रतर्दनंप्रतीद्रावक्तिप्राणोस्मिप्रज्ञात्मानंमामायुरमृतमित्युपास्वेतितत्रचतुर्विधलिंग

वत्वाच्चतुर्द्धासंशयः॥इदंशरीरंपरिगृह्योत्थापयतीतिप्राणोवायोर्लिंगंमस्मीतिवक्तुरिंद्रस्याहं
कारत्वा दिंद्रलिंगं।वक्तारंविद्यादितिवक्तृत्वंजीवलिंगं॥आनंदोऽजरोऽमृतइतिब्रह्मलिंगं॥तत्र
प्राबल्यदौर्बल्यविवेकाभावादनिर्णयइतिपूर्वपक्षः॥सिद्धांतस्तुसंत्यत्रब्रह्मणोनेकलिंगानि
तद्यथात्वमेववृणीष्वयंत्वंमनुष्यायहिततमंमन्यसेइतिहिततमत्वामकंलिंगंयामांविज्ञानीया
न्नास्यपापकंचनकर्मणालोकामीयतेनमातृवधेननपितृवधेनेतिज्ञानमात्रेणमहापातका
द्यलोपापरंलिंगं।एवमन्यान्यपिलिंगान्युदाहर्त्तव्या निनचैतानिप्राणेंद्रजीवपक्षेषुकथं
चिदुपपादयितुंशक्यंतत्।प्राणादिलिंगानितुब्रह्मण्युपपद्यंते॥प्राणादीनांब्रह्मबोधकार
त्वात्तथाचसतिब्रह्मलिंगानामनन्यथात्वादनन्यथासिद्धत्वाच्चप्राबल्यंतस्माद्ब्रह्मैवात्रस्तु त्याद्यं।
नप्राणादिति सिद्धं॥ ॥इतिप्रथमाध्यायस्यप्रथमःपादः॥ ॥सर्वत्रप्रसिद्धोपदेशात्॥१॥

द्वितीयपादस्य प्रथमाधिकरणमारचयति मनोमयोयं शारीर ईशो वा प्राणमानसो हृदयस्थितः अणी
यस्त्वजीवस्तु सैन न जीवगीः ॥१॥ शमवाक्यगतं ब्रह्म तद्धितादिरपहतो ॥ प्राणादियोगश्चिंता
प्र३ र्थश्चिंत्यं ब्रह्म प्रसिद्धितः ॥२॥ छांदोग्यस्य तृतीयाध्याये शांडिल्यविद्यायामिदमाम्नायते मनोमयः प्रा
णशरीरो भारूप इति तत्र जीव ईशो वा इति देही जीव इति प्राप्तं मनःसंबंधादीनां जीवस्य संपादत्वा
न्मनसो विकारो मनोमय इति मनःसंबंधः प्राणः शरीरमस्येति प्राणसंबंधः न चेदं ह्ययमीश्वरे
स्तु संपादं अप्राणो ह्यमनाः शुभ्र इति निषेधात् तथा एष म आत्मांतर्हृदये अणीयानिति श्रूय
माणं हृदयमेवस्थानं अणीयस्त्वं च निराधारस्य सर्वगतस्य न कथंचिदुपपद्यते तस्माज्जीव इ पं३
ति प्राप्ते ब्रूमः । सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति एतस्मिन् भविधिपरे पूर्ववाक्ये १५
श्रूयमाणं यद्ब्रह्म तदेव मनोमयः प्राणशरीर इत्युत्तरवाक्ये तद्धितवद्व्रीहिभ्यां विशेषत्वेना

वा१
पेक्ष्यते शमवाक्यस्यायमर्थः ॥ यस्मात्सर्वमिदं ब्रह्म तज्जत्वात् तल्लत्वात् तदनत्वा[illegible]त्तस्मात्सर्वात्मके
वानु२ ब्रह्मणि रागाद्यविषयासंभवादुपास्तिकाले शांतो भवेदिति एतद्वाक्यगत ब्रह्मणि विशेषत्वे
नान्वितं मनोमयवाक्यमपि ब्रह्मपरं भविष्यति न च ब्रह्मणो मनःप्राणसंबंधाद्यनुपपत्तिः निरु
पाधिकतदनुपपत्तावपि सोपाधिकस्योपास्यस्य चिंतनार्थतया तदुपपत्तेः तस्मात्सर्वेष्वपि वे
दांतवाक्येषु परमात्मा उपास्यत्वेन प्रसिद्धस्तादेवात्राप्युपास्यं न हि कचिदपि वेदांते जीवस्योपास्य
त्वं प्रसिद्धं तातात्मा ब्रह्मैवेति राद्धांतः ॥ अत्ता चराचरग्रहणात् ॥ ॥२॥ द्वितीयाधिकरणमारच
यति ॥ जीवोऽग्निरीशो वात्तास्योदने जीव इष्यतां स्याद्वृत्तीति श्रुतेर्वह्निर्वाग्निरन्नाद इत्यतः ॥१॥
ब्रह्मक्षत्रादि जगतोऽत्त्वात्मस्यादिहेश्वरः ईश्य प्रश्नोत्तरत्वाच्च संहारस्तस्य चाट्टता ॥२॥ कठव
ल्लीषु द्वितीयवल्ल्यवसाने पठ्यते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसे

चनं कश्चावेद यत्र स इति न्यायमर्थः॥ ब्राह्मणक्षत्रियजातीयस्यौदनस्थानीयेयस्य मृत्युश्चोप
दंशनस्थानीयः स पुरुषो यत्र प्रवर्तते तत्स्थानमिदमित्थमिति को वेद न कोपि जानातीत्यर्थः अ
ओदनोपसेचनशब्दाभ्यां कश्चिदत्ता कः प्रतीयते स जीवोग्निर्वा यो वेति त्रेधा संदेहे न जीव इति ना
त्माहं कुतः तयोरन्यः पिप्पलं स्वाद्वत्तीति जीवस्यात्तृत्वश्रवणात्। अथवा वह्निर्नाव...
दग्निरन्नाद इत्यत्तृत्वावगमादिति प्राप्तं ब्रूमः॥ ब्रह्मक्षत्राद्यायारूपलक्षणात्वन चराचरं जगदिह
ज्ञोद्यत्वे नावगम्यते न हि तादृशस्य भोज्यस्य परादन्योत्ता संभवति किं चान्यत्र धर्मादन्यत्रा
धर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति धर्माधर्मकार्यकारणकाल
त्रयातीतपरमेश्वरं नचिकेता आह क्षेमतियस्य ब्रह्म च क्षत्रं चेति वाक्येन यमउत्तरं ददौ तस्मादीश्व १९
रोत्र प्रतिपाद्यः। अनश्नन्नन्यो अभिचाकशीतीति ईश्वरस्यात्तृत्वं निषिध्यत इति चेन्न कर्मात्र
दन्यस्मा ३

॥ नमोश्री नासंकृताद्वं १
नमोस्तु वेनविष्यति तदीश्वरस्य सर्वसंभवे दांत पुनरसिद्धं॥ ॥गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्॥११॥
ततीयाधिकरणमारचयति॥ गुहां प्रविष्टौ धीजीवौ जीवेशौ वाक्षदिस्थितः॥ छायातपाख्य
तौ दृष्टांताद्धीजीवौ तौ विलक्षणे॥१॥ पिबंतावितिचितनं दायाजीवेश्वरौ ततः॥ हृत्स्थानमुपल
ब्धिस्थानि लक्षणमुपाधितः॥२॥ कठवल्लीषु तृतीयवल्यादौ श्रूयते ऋतं पिबंतौ सुकृतस्य
लोके गुहां प्रविष्टौ परमे परार्धे छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेता इ
ति अयमर्थः॥ सुकृतस्य फलभूतं यद्ब्राह्मणादिशरीरं तस्य परस्यार्धे परं ब्रह्मणउपलब्धिस्था ॥३॥
नत्वात्परमं विद्याधिकारहेतुशमदमाद्युपेतत्वात्तादृशस्य शरीरस्य मध्ये वस्थितं हृदयपुंडरी
कं गुहातां प्रविष्टौ यद्वा कृतस्य... वाच्यं कर्मफलं पिबंतौ छायातपावत्परस्परविलक्षणौ वेद २३
विदो वदंति तौ हि बुद्धिजीवौ जीवेश्वरौ वेति संदेहे बुद्धि... वा वितिप्राप्ते तयोः परिच्छिन्नयो गुहा

प्रवेशासंभवाज्जडाजडरूपत्वेनछायात्मपदवाह्निलक्षण्याच्चत्रयोरन्ततेपिवंता [illegible]
[illegible] विति हि वचनेन हृदयोश्चेतनत्वं प्रतीयते ततश्चेतनाविदुजीवेश्वरौन्नव
तः।।सर्वगतस्यापीश्वरस्य हृदये वस्थानमुपलब्धेव वक्ष्यते हृदयोश्चेतनत्वसाम्येपि सोपाधिक
त्वनिरूपाधिकत्वाभ्यां वैलक्षण्यमुपपद्यते।। ।।अंतर उपपत्तेः।।१४।। चतुर्थाधिकरणमा
रचयति।।छायाजीवो देवता वा सो यो क्षिणि दृश्यते। आधारदृश्यतो क्तेशादन्ये त्रिशुक
स्वनः।।१।।कं खं ब्रह्मयत्कं तत्प्राकृतदेवादिरेकपास्यते। वामनी वादिनान्येष्ठुनाम्नतवादिसं
नवः।।२।।छांदोग्यस्य चतुर्थाध्याये उपकोशलविद्यायामुपकोशलं शिष्यं प्रति सत्यकामो गुरु १९
त: राहं त्वं वाक्यमेतत्। य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तत्र च
नुर्द्धासंशयेसति अक्षिणि सविधिदृश्यमाना छायेति तावत्प्राप्तं अद्धारेधो दृश्यवायास्याम

पिस्पष्टत्वात्तयद्यपि जीवो यं न विनु मर्हति रूपदर्शनवेलायां तस्य चक्षुष्यवस्थितत्वेनात्रयम
तिरकाभ्यां दृश्यमानत्वाद्यथवा देवता [illegible] स्यादादित्यस्य चक्षुर्नूत्वाद्रश्मिभिरादित्यादिति दर्शनाव स
र्वथान परमात्मा तस्याधारदृश्यत्वासंभवात्तस्माच्छायाजीवदेवेष्वन्यतमः कोप्यक्षिणीति प्राप्ते ब्रूमः कं
ब्रह्मखं ब्रह्मेति श्रुतस्वरूपमाकाशवत्परिपूर्णं य ब्रह्म पूर्ववाक्ये नाक्तं तदेव य एषोक्षिणीति प्र तर
त्यतवाचाकानेतच्छ्रेन परामृश्याक्षिण्युपास्यात्वेनापदिश्य वामनीत्वभामनीत्वसंयद्वामत्व
गुणानुपासनायोपदिशतीति वामनीत्वं कामप्रापकत्वं भामनीत्वं जगत्प्रकाशकत्वं संयद्वामत्वम
सकामत्वं एते गुणा रुपास्य ब्रह्मणः सोपाधिकत्वादस्याधारत्वं शास्त्रेष्वादृश्यमानत्वं च नवि
रुध्यते छायाजीवदेवतेष्वमृतत्वाभयत्वादीनि न संभवंति। तस्मादीश्वरोक्षोपास्यः।। ।।अंतर्याम्य
धिदेवादिषु तद्धर्मव्यपदेशात्।।१ ।।१५।। पंचमाधिकरणमारचयति। प्रधानं जीवईशो वा कोंत

र्यामीजगत्कर्त्ता॥कारणत्वात्प्रधानत्वंजीवोवाकर्मणोगुरुत्वात्॥१॥जीविकत्वान्मृ[illegible]दितर्या
मीपरमेश्वरः॥हृहत्वादिर्नप्रधानंनजीवोपिनियम्यतः॥२॥बृहदारण्यकेपंचमाध्यायेयाज्ञव
ल्क्यउद्दालकंप्रत्याहयःपृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृतइतितत्रपृथिव्यादिजग
त्कर्त्तृत्वियोंतर्यामीश्रूयतेतस्मिंस्त्रेधासंशयःस्यात्तन्नियामकत्वसंप्रधानमितिप्राप्तंतस्यसक
लजगदुपादानत्वेनस्वकार्यप्रतिनियामकत्वसंभवात्॥अथवाजीवोंतर्यामीसहिधर्माधर्म
रूपंकर्माधिष्ठितवान्तच्चकर्मस्वफलदानायफलभो[illegible]ग्यसाधनंजगदुत्पादयतिअतःकर्म
द्वाराजगदुत्पादकत्वाज्जीवोंतर्यामीतिप्राप्तेब्रूमः॥एषतआत्मांतर्याम्यमृतइतिअंतर्या
मिणोजीवत्वात्म्यममृतत्वंचश्रूयतेतथाहपृथिव्यांतरिक्षादिषुसर्ववस्तुषुअंतर्यामित्वोपदे १८
शात्सर्वव्यापित्वंप्रतीयतेतेन्योहत्वेन्योंतर्यामीपरमेश्वरःनतुप्रधानस्यांतर्यामित्वंसंभव

तिअदृष्टोद्रष्टाश्रुतःश्रोतेतिद्रष्टृत्वश्रोतृत्वाद्यवगमात्अचेतनस्यप्रधानस्यतदसंभवात्ना
पिजीवोंतर्यामीयआत्मानमंतरोयमयतीतिजीवस्यनियम्यत्वश्रवणात्तस्मादंतर्यामीपर
मेश्वरः॥ ॥अदृश्यत्वादिगुणकोधर्मोक्तेः॥ ॥१९॥ ॥षष्ठाधिकरणमारचयतिभूतयो
निःप्रधानंवाजीवोवायदिवेश्वरः॥आद्योपक्षौतुउपादाननिमित्तत्वाभिधानतः॥१॥ईश्वरोभू
तयोनिःस्यात्सर्वज्ञत्वादिकीर्तनात्॥दिव्याद्युक्तेर्नजीवस्यान्नप्रधानंनिवेदोक्तितः॥२॥मुंडकोप
निषदिश्रूयते॥तदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराइतितत्रत्रेधासंशयेसतिप्रधानंजीवो
वेतिपक्षद्वयंतावत्प्राप्तंयोनिशब्दस्योपादाननिमित्तत्वलक्षणार्थद्वयवाचित्वात्प्रधान
स्यविश्वाकारेणपरिणममानस्योपादानत्वंजीवस्यचधर्माधर्मद्वारेणनिमित्तत्वात्॥अत्रो
च्यतेयःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपइतिसामान्याकारेणसर्वज्ञत्वंविशेषाकारेणस

वैविध्यं पर्यालोच्य नात्मकृतपश्चात्त्वेनाहरणस्य ब्रह्मलिंगस्य कीर्तनात् भूतयोनिः परमेश्वरः। न जी ८१
वस्य भूतयोनित्वं युक्तं। दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यज इति बाह्याभ्यंतरव्या
उ० पित्वं जन्मराहित्ययोः श्रुतत्वात् परिच्छिन्नस्य जन्मादिमतो जीवस्य तदसंभवात् नापि प्रधान
स्य भूतयोनित्वं युक्तं अक्षरात्परतः पर इत्यक्षरशब्दवाच्यात् प्रधानाद्भेदेन भूतयोः परत्वाभि ने४
धानात् तस्मादीश्वरो भूतयोनिः। वैश्वानरः साधारणशब्दविशेषात्॥ ॥२४॥ स्वधर्माधिक
रणमारचयति। वैश्वानरः को ह्यभूतदेवजीवविश्वरूपकः। वैश्वानरात्मशब्दाभ्यामीशादन्य
न्यमुक्तश्चना॥१॥ क मूर्द्धत्वादितो ब्रह्मशब्दाच्चेश्वर इष्यते। वैश्वानरात्मशब्दौ [illegible]
नो ईश्वरस्यापि वाचकौ॥२॥ छांदोग्यस्य पंचमाध्याये वैश्वानरविद्यायामाम्नायते आत्मानं १९
वैश्वानरमुपास्त इति किमयं वैश्वानरः जठरोग्निस्तद्वा भूताग्निरुताहो स्विद्देवतादिकं

वा जीवात्मा अथवा परमात्मेति संशयः। तत्र वैश्वानरशब्द [illegible] वत्त्वादाद्यं पक्षत्रयं प्राप्तं। अयमग्निर्वै
श्वानरो योयमंतःपुरुष इति श्रुतात् वैश्वानरशब्दो जागरावस्थोपयुक्त विश्वस्मा अग्निं भुवनाय
देवा वैश्वानरं इति बाह्याग्नौ प्रयुक्तो वैश्वानरस्य सुमतौ स्यामेति देवतायां प्रयुक्तः अतः पक्षत्र
यप्राप्तिः आत्मशब्दस्य जीवरूढत्वात् जीवो वा वैश्वानरः स्यात् न चेश्वरः तज्ञमकत्वभावादिति प्रा
प्ते ब्रूमः। वैश्वानरो ब्रह्म न वितुर्मर्हति मूर्द्धत्वादिश्रवणात् तस्य ह वा एतस्यात्मनो वैश्वानरस्य
मूर्द्धैव सुतेजा इत्यादिना द्युलोकाद्यशेषजगतो वैश्वानरावयवत्वं श्रूयते न चैतदीशादन्यत्र संभवति
किंच को न आत्मा किं ब्रह्मेति [illegible] शब्दाभ्यामीश्वरस्य हेतुत्वात् वैश्वानरशब्दस्तु योगवृत्त्या ब्रह्मणि वर्तते
विश्वश्चायं नरश्चेति विश्वानरः सर्वात्मकः पुरुष इत्यर्थः। विश्वानर एव वैश्वानरः आत्मश
ब्दश्च जीवात्मवत् ब्रह्मण्यपि वर्तते। तस्माद्वैश्वानरः परमेश्वरः॥ ॥प्रथमस्याध्यायस्य द्वि

तीयःपादः॥ ॥द्युभ्वाद्यायतनं स्वशब्दात्॥ ॥१।३।१॥ तृतीयपादस्य प्रथमाधिकरणमारच
यति। सूत्रं प्रधानं भोक्तेशो वा द्युभ्वाद्यायतनं भवेत्। श्रुतिस्मृतिप्रसिद्धिभ्यां भोक्ता वाचेश्वरेत
रः॥१॥ नो द्यौपद्मा वात्मशब्दात् भोक्तामुक्तगम्यतः॥ ब्रह्मप्रकरणाद्दाराः सर्वज्ञत्वादित
श्रुतेः॥२॥ मुंडकोपनिषदि श्रूयते। यस्मिन् द्यौः पृथिवी चांतरिक्षमोतं मनः सह प्राणैश्च
सर्वैः। तम वैकं जानीथ आत्मानमन्या वाचो विमुंचथेति द्युलोकभूलोकाद्याधारं जग
द्यस्मिन्नाधारे आश्रितं तमाधारमेकमेवात्मानं जानीत न त्वनात्मानं पृथिव्यादि इत्येति
रिक्ता अनात्मप्रतिपादकान्यर्थशास्त्रादिवाचो मुंचत अमृतरूपार्थत्वादित्यर्थः। तत्र संशयः
किं द्युभ्वाद्यायतनं सूत्रात्मा किं वा प्रधानं अथवा भोक्ता आहोस्विदीश्वर इति संदेहः। सू १०
त्रात्मा स्याद्वायुनावैगोतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि

भवंतीति श्रुतिप्रसिद्ध्या वायोः सूत्रात्मनो द्युभ्वाद्यायतनत्वावगमात्। प्रधानं वा स्यात् तस्य सांख्य
स्मृतिप्रसिद्धसर्वाधारत्वावगमात्। भोक्ता वा स्यात् तमेवैकं जानथ आत्मानमित्यात्मशब्दादिति प्राप्ते ब्रूमः। क २
न तावत् सूत्रात्मप्रधानपक्षौ संभवतः। अमृतस्यात्मशब्दस्य तयोरसंभवात्। नापि भोक्ता तदा विद्वान् पु
ण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति द्युभ्वाद्यायतनस्य तद्रूपप्राप्तिश्रवणात् लोके जीव
स्य तत्प्राप्त्यात्मत्वासंभवात्। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति एकविज्ञानेन सर्ववि
ज्ञानमुपक्रांतं ब्रह्मावद ब्रह्मैव भवतीत्युपसंहृतं ततो ब्रह्मप्रकरणात्। दृश्यत्वाद्यधिकरणो
श्रुते ३ क्तसर्वज्ञत्वादि रपि ब्रह्मैव द्युभ्वाद्यायतनं॥ भूमा संप्रसादादध्युपदेशात्॥ १।३।२॥ द्वितीयाधिक
रणमारचयति। भूमा प्राणः परेशो वा प्रश्नप्रत्युक्तिवर्जनात्। प्राणं तु वक्त्यतिवादित्वं भूमोक्तेश्चासु
रवसः॥१॥ विशिष्य चितिप्राणं तस्योपक्रमात् तथा। महोपक्रम आत्मोक्तेरीशोयं वितत वारण
६

त॥१॥ छांदोग्ये सप्तमाध्याये नारदं प्रति सनत्कुमारो नामादीनुत्तरोत्तरं भूयांसि बहूनि तत्त्वान्युप
दिश्यांते निरतिशयं भूमानमुपदिशति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति
भूमस्वरूपं चाह विद्विषयं संदिग्धमस्ति प्राण इति तावत्प्राप्तं कुतः प्रश्नप्रत्युक्तिवर्जनात् पूर्वेषु नामादि
षु तत्वेष्वस्ति भगवो भूय इति नारदः पदे पदे पृच्छति सनत्कुमारश्चास्तीति प्रतिवक्ति एवं च प्रश्नप्र
तिवचनपूर्वकतया नामादीनि प्राणांतानि बहूनि तत्त्वान्युपदिश्य प्राणस्योपरि विनैव प्रश्नप्रत्यु
क्तिप्रश्नाभ्यां भूमानमवतारयति। अतः प्राणभूम्नोर्मध्यविच्छेदकस्याभावात्प्राण एव भूमा॥
किंच प्राणतत्त्वमुपदिश्य प्राणोपासकस्यातिवादित्वं नामकमुत्कर्षमभिधाय प्रकरणविच्छेद
काशंकानिरासाय तदेवातिवादित्वमनुवर्त्य भूमानमुपदिशन्प्राणभूम्नोरभेदं दर्शयति तत् २१
स्मात्प्राणो भूमेति प्राप्ते ब्रूमः अयं भूमा परमेश्वर एव कुतः एष तु वा अतिवदति यः सत्येनाति

प्रा०१

वदतीत्यत्रातिवादित्वहेतुरूपासनं तु शब्देन प्रावर्त्य प्रकृत्यातिवादित्वे हेतोर्ब्रह्मणः सत्यशब्देन प्र
तो पगुपक्रमात् तथा परमोपक्रमे तरति शोकमात्मविदिति विघ्नतया परमात्मोच्यते तथा यत्र ना
न्यत्पश्यतीत्यादिना साधनभूमौ लक्षणमभिधीयते तस्माद्द्वितः परमात्मैव भूमा। अक्षरमंब
ति रांतःधृतेः॥ ॥तृतीयाधिकरणमारचयति॥१२॥ अक्षरं प्रणवः किं वा ब्रह्म लोके क्वाभिधा
वर्णे प्रसिद्धा तेनात्र प्रणवः स्यादुपास्तये॥१॥ अव्याकृताधारतोक्तेः सर्वधर्मनिषेधतः॥रा
सनाद्ब्रह्मैताद्दस्य ब्रह्मैवाक्षरमुच्यते॥२॥ बृहदारण्यकपंचमाध्याये गार्गीं प्रति याज्ञवल्क्य आ
हा एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमिति तत्राक्षरशब्देन प्रणवो ब्र
ह्म वाभिधीयत इति संदेहे प्रणव इति प्राप्तं कुतः लोके येनाक्षरसमाम्नायमित्यादौ वर्णेऽक्षरश
ब्दप्र[illegible] प्रणवादक्षरशब्दस्य चात्रोपास्यतया वक्तव्यत्वादिति प्राप्ते ब्रूमः॥ ब्र
प्रसिद्धेः

लिवादहरशब्दवाच्यं कुतः एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्याकाशशब्दवाच्यं अ
वे व्याकृतं प्रति अक्षरस्याधारत्वोक्तेः प्रणवस्य तदसंभवात् किं चास्थूलमनण्वह्रस्वमित्यक्षरे सर्व
वे संसारधर्मनिषिध्यंते तथैतस्याक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति
अक्षरस्य जगद्धारित्वमुच्यते न ह्येतदक्षरं गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोत्रमतं मंत्रित्यादिना
द्रष्टृत्वादिकं प्रमाणाविषयत्वं चाम्नातं तदेतत्सर्वं न प्रणवपक्षे संकल्पनात्॥ तस्माद्ब्रह्मैवाक्षरं॥
ईक्षतिकर्मव्यपदेशात्सः॥१३॥ ॥चतुर्थाधिकरणमारचयति॥ त्रिमात्रप्रणवध्येयमपरं
ब्रह्म वा परं। ब्रह्मलोकफलोक्त्यादेरपरं ब्रह्म गम्यते॥१॥ ईक्षितव्योजीवघनात्परस्त्वत्र व्यु
फलित्वपति २५ त्पत्त्या॥ न वै ध्येयं परं ब्रह्म क्रममुक्तिर्न विद्यति॥२॥ प्रश्नोपनिषदि श्रूयते। यः पुनरेतं त्रि २२
मात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीतेति तत्र ध्येयं वस्तु हिरण्यगर्भरूपमप

रं ब्रह्मोत परं ब्रह्मेति संशये सति अपरमिति प्राप्तं कुतः स सामभिरुन्नीयते ब्रह्मलोकमिति ब्र
ह्मलोकप्राप्तिफलश्रवणात् परब्रह्मध्यानस्य परमपुरुषार्थस्य तावन्मात्रफलत्वानुप
पत्तेः। परं पुरुषमिति परशब्दविशेषणमपरस्मिन्नपि ब्रह्मण्युपपद्यते तस्य पिंडापेक्षया
परत्वादिति प्राप्ते ब्रूमः॥ परमेव ब्रह्माभिध्येयं कुतः ईक्षितव्यस्य परस्य ध्येयत्वेन प्रत्यभिज्ञाना
परात्परं पुरिशयं पुरुषमीक्षत इति वाक्यशेषे श्रूयते तस्यायमर्थः उपासनया ब्रह्मलोकं प्रा
प्तः स एतस्मात्सर्वजीवघनमहिरूपादुत्कृष्टाद्धिरण्यगर्भात्परं पुरुषं सर्वप्राणिहृदयेशयानं प
श्यतीति तत्रेक्षितव्यो यः परमात्मा स एव वाक्योपक्रमे ध्यानविषयत्वेनाभिप्रेत इत्यवगम्यते पर क २
पुरुषशब्दाभ्यां तस्य प्रतिज्ञानात् न च ब्रह्मलोकमात्रमत्र फलं क्रममुक्तिस्तं नवातात तस्माद्ब्रह्मै
व ध्येयं॥ ॥दहर उत्तरेभ्यः॥१४॥ पंचमाधिकरणमारचयति॥ दहरः कोवियज्जीवब्रह्मस्वा

काशशब्दतः ॥ वियत्स्याद्यथवाल्पत्वश्रुतेर्जीवो भविष्यति ॥१॥ बाह्याकाशोपमानेन दहर
स्यादिसमाहितः ॥ आत्मापहतपाप्मत्वासेतुत्वात्परमेश्वरः ॥२॥ छांदोग्यस्याष्टमाध्यायेऽश्रूय
ते अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतर आकाशस्तस्मिन्यदंतस्त
द्वा दन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ब्रह्मणउपलब्धिस्थानत्वेन शरीरं ब्रह्मपुरं तत्रापि हृद
यपुंडरीकं वेश्म तद्वतिष्ठते तस्मिन्वेश्मन्यल्प आकाशो वर्तत इत्यर्थः तस्मादाकाशस्य नि
र्धारसंदेहे सति वियदिति तावत्प्राप्तं आकाशशब्दस्य वियति रूढत्वात् यद्वा दहरशब्देनाल्पत्वो अथवा
प्राप्ते क्तः परिछिन्नो जीवो भविष्यति न तु ब्रह्मेति पूर्वपक्षः ॥ ब्रह्मैवात्राकाशशब्दवाच्यं कुतः यावान्वा
अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति प्रसिद्धेन वियतोपमितत्वात् न हि वियतो विय २२
दुपमानं संभवति नाप्यल्पपरिमाणो जीवो वियत्परिमाणेनोपमातुं शक्यः लोकि[illegible] कद्र

ठिस्थाग्नीतन्दुलापरिकृता ॥ किंच उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते इत्यादिना द्यावा
पृथिव्याद्याधारजगदाधारत्वं दहराकाशस्य श्रूयते अथ एष आत्मापहतपाप्मेत्यात्मत्वमप
हतपाप्मत्वं च य आत्मा स सेतुर्विधृतिरिति जन्मर्यादानामस्यां कार्याय विधारकत्वलक्ष
णं सेतुत्वं च तस्मादेतस्माद्धेतुभ्यः परमात्मा ॥ ॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ ॥२३॥
५ धा दहराधिकरणमारचयति ॥ यः प्रजापतिविद्यायां स किं जीवोऽथवेश्वरः ॥ जाग्रत्स्वप्नसुषुप्तेषु
द्भाज्जीव इहोचितः ॥ आत्मापहतपाप्मेति प्रक्रम्यांते स उत्तमः ॥ पुमानिहाक ईशोत्र जाग्रदा
द्यवस्थद्वये ॥२॥ दहरविद्याया उपरि प्रजापतिविद्यायामिंद्रविरोचनप्रजापतिसंवादे श्रूय
ते य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचेति तत्र जीवात्मेति प्राप्तं अवस्थात्रयोप
न्यासात् अक्षिणि पुरुष इति जागरणोपन्यासः एष स्वप्ने महीयमानश्चरतीति स्वप्नोपन्या

सः सुप्तः सम्यक्प्रसन्नः स्वप्नं न विजानाति इति सुषुप्त्योपन्यासः एवमवस्थात्रयेऽप्युपदि
ष्टे सति अवस्थावान्जीव एवेह ग्रहीतुमुचितः। ईश्वरस्यावस्थाराहित्यादिति भावः॥ ईश्वरो न
ग्रहीतव्यः कुतः। य आत्मापहतपाप्मा विजरो विमृत्युरिति परमात्मानमुपक्रम्य एतत्तमःस्तु
सुषुप्त्यांतपरमात्मन एवोपसंहारात् न चैवं जागरणाद्युपन्यासवैयर्थ्यं शांत्य चंद्रस्यापि खा ४
न परमात्मत्वाबाधप्रयुक्तत्वात् तस्मादीश्वरो द्विगुणुरुषः। ॥ अनुज्ञातस्त्वयच ॥२७॥ ॥स
समाधिकरणमारचयति। न तत्र सूर्यो भातीति तेजोंतरस्तुतात्रवितातेजोभिभावकत्वेन
सिवा तेजोंतरमिदं महत्॥१॥ चिस्सा सूर्याचंद्रमा एस्वाभाहकृतेजो प्रसिद्धैः। सर्वस्मात्परतो ना
मात्रकासाचाप्यत्राय नाता॥२॥ पुंडकोपनि ॥ दिश्रूयते न तत्र सूर्यो भाति न चंद्रतारकं ने २४
माविद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति

अस्यार्थः। तत्र सर्वप्रकृतज्योतिषि सूर्यचंद्रादयो न भांति किंतु तमेव ज्योतिषां भासकं प्रकाश
व मानं पदार्थमनु सर्वं जगद्भाति। भासनं द्विधा आयां न स्वतंत्रेण भानेन जगद्भाति किंतर्हि
तस्य भासकपदार्थस्य भासा सर्वं विभातीति तस्मिन् वाक्ये श्रूयमाणं जगद्भासकं किंस्व
र्यादिसदृशं चाक्षुषं तेजोंतरमुत चैतन्यमिति संशये तेजोंतरमिति प्राप्तं कुतः सूर्यादिते
स जोभिभावकत्वात्महतस्तेजसः संनिधौ स्वल्पं तेजोभिभूयते यथा सूर्यस्य संनिधौ दीपः। तथा
च सूर्यादीनां यदभिभावकं तत्सूर्यादिभ्योप्यधिकं तेजोंतरमेवेति। अत्रोच्यते सूर्यादिभिरभा
स स्यमानतया श्रूयमाणं वस्तु चैतन्यं कुतः सूर्याद्यभिभावकस्य महतस्तेजोंतरस्याप्रसिद्धत्वा
त् किंच नामवर्त्तां तमनुभाति सर्वमिति। सर्वस्या जगतस्तद्भासा भासमानत्वं चैतन्यधर्मः तथा
तस्य भासास्य सर्वमिदं विभातीति प्रकाशकारकरूपं सर्व जगद्भासकत्वं चैतन्यधर्म एव त

तः २

स्याचित्तत्त्वं वाक्यप्रतिपाद्यं॥ ॥शब्दादेव प्रमितः॥२४॥ अष्टमाधिकरणमारचयति॥ अंगु
ष्ठमात्रो जीवस्याहो शो वाल्पप्रमाणो देहमध्यस्थितत्वेन जीवो न विभुमर्हति॥१॥ प्रभूत न
वै ह्यज्ञातो जीवेनास्त्यतो ना निरीश्वरः स्थितिप्रमाणोऽशरापिस्तोरुधस्योपलब्धितः॥२॥ कठवल्ली
षु चतुर्थवल्यामाम्नायते॥ अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्येति
तत्रांगुष्ठमात्रो जीवः कुतः अंगुष्ठमात्रश्चाल्पप्रमाणत्वात् मध्य आत्मनि तिष्ठतीति देहमध्य
प्रदेशे वस्थानाच्चेति प्राप्ते ब्रूमः॥ परमात्मांगुष्ठमात्रः कुतः॥ ईशानो भूतभव्यस्येतीत्यना
शि.तुर्यत्री वेल्लि गतजगदीशित्वश्रवणात् न चैतज्जीवस्येशितव्यत्वात्॥ अल्पप्रमाणत्वं देहमध्येऽवस्था
नं च परस्यापि संभवतः हृदयपुंडरीके ब्रह्मण उपलंभात् हृदयापेक्षया तदुपपत्तेः जीवनात् २५
तस्मादंगुष्ठमात्रः परमेश्वरः॥३॥ ॥तदुपर्यपि बादरायणः संभवात्॥ ॥२६॥ नवमाधि

करणमारचयति॥ नाधिक्रियंते विद्यायां देवाः किं वाधिकारिणः॥ विदेहत्वेन सामर्थ्यहानेर्ने
षामधिक्रिया॥१॥ अविरुद्धाज्ञानवादि मंत्रादेर्देहवत्त्वतः॥ अर्थित्वादेश्च सौलभ्याद्देवा अत्रा
धिकारिणः॥२॥ बृहदारण्यके तृतीयाध्याये श्रूयते तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्
तथार्षीणामिति देवानां मध्ये यो यो ब्रह्म प्रत्यबुध्यत स एव ब्रह्माभवदित्यर्थः। तत्र देवर्षादयो
विद्यायां नाधिक्रियंते इति तावत्प्राप्तं। कुतः अर्थी समर्थो विद्वान् क्रियते इत्युक्तानामधिकार धि ८
हेतूनामशरीरत्वाद्देवेष्वसंभवात् न च मंत्रार्थवादादिभ्यो देवानां विग्रहवत्त्वं विधेयेकवाक्य
तापन्नानां स्वार्थे तात्पर्याभावादिति प्राप्ते ब्रूमः। त्रिविधो ह्यर्थवादः गुणवादोऽनुवादो भूता
र्थवादश्चेति तथा चाहुः। विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धा
नादर्थवादस्त्रिधा मत इति॥ आदि[illegible]त्यो यूपः यजमानः प्रस्तर इत्यादिषु प्रत्यक्षविरोधस

त्यादित्यादिवद्यागनिर्वाहकत्वगुणः आदित्यादिवादिष्टफलत्वमित्युक्तेर्वादः। अग्निर्हिमस्यभे
षजं वाय्वर्वीरखपिष्ठेत्येवमादिषु मानांतरसिद्धार्थवादित्वादनुवादत्वं तयोरुभयोः स्वार्थेता
त्पर्याभावात्। इंद्रो हत्राय वज्रमुदयच्छदित्यादिषु अविरुद्धेषु ननु वादेषु च नार्थवादेषु स्व
तःप्रामाण्यवादे स्वार्थतात्पर्यस्य [illegible] मशक्यत्वात् [illegible] तया स्वार्थेवांतरतात्पर्यं प्रतिष मंत्र
द्यपश्चाद्वाक्यैकवाक्यतया विधिषु महातात्पर्यं च तत्प्रार्थाः प्रतिपद्यंते ते [illegible] पायो बोध्यः
तथा च मंत्रार्थवादादिबलाद्देवादीनां विग्रहवत्वे सति श्रवणादिषु सामर्थ्यमुक्तं तं अर्थि
त्वं चैश्वर्यस्य [illegible] दर्शनात् [illegible] साधनब्रह्म विषयमुपपद्यते विरक्तावे विग्रह
पनयनाध्ययनरहितानामपि स्वयंभातवेदत्वात् [illegible] तस्माद्देवादीनां विद्याधिकारो न २९
निवारयितुं शक्यः। यद्यप्यादित्यादीनां देवानामादित्यादिध्यानमिश्रासु सगुणब्रह्मवि

द्यासु ध्येयानामन्येषामादित्यादीनामसंभवात् आदित्यवादिशामिलक्षणस्य विद्याफलस्य सिद्धत्वाच्च
मास्त्वधिकारस्तथापि निर्गुणविद्यायामधिकारे को दोषः। तस्माद्दस्त्येवाधिकारः। शुगस्य तदनाद
रश्रवणात्तदाद्रवणात्सूच्यते हि॥ ॥१।३।१०॥ द्वशमाधिकरणमारचयति॥ शूद्रोधिक्रियते वेदवि
६४ द्यायामथवा न हि। अत्रैवर्णिकदेवाद्यावच्छूद्रोधिकारवान्॥१॥ देवाः स्वयंभातवेदाः शूद्रोध्यय
नवर्जनात्। नाधिकारी श्रुतौ स्मार्ते त्वधिकारो न वार्यते॥२॥ छांदोग्यस्य चतुर्थाध्याये संवर्गविद्या
यामाम्नायते। आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति। अयमर्थः। जानश्रुतिर्नामक
श्चिद्राजा [illegible] गोसहस्रं दुहितरं मुक्ताहारं रथं [illegible] रैक्वनामकं गुरुं उपस
सादत स्यारैक्व स्य वचनमत्र [illegible] हे शूद्र [illegible] गोसहस्राद्या आहृतवान् [illegible] पायन
[illegible] विद्याधिकारवानिति [illegible]

कदेवदृष्टांतेनशूद्रस्याप्यत्रैवर्णिकस्यतत्संभवादितिनेतिब्रूमः। अस्तिदेवशूद्रयोर्वैषम्यंउप
नयनाध्ययनाभावेपिस्वयंप्रतिभातवेदादेवाःइदास्यतुजन्मांतरस्यपूर्वमुपार्जितत्वात्शूद्रता इदास्य
सुलभत्वादित्यादिनस्वयंप्रतिभातवेदोनापितस्यवेदाध्ययनमस्तिउपनयनाभावात् अतोविदु
राणस्याधिकारहेतोरभावान्नश्रौतविद्यायांशूद्रोधिकारीकथंतर्हिरैक्ववाक्येजानश्रुति
विषयःशूद्रशब्दोयौगिकोयंनरूढइतिब्रूमः विद्याराहित्यजनितयाशुचाशुकंद्रावेतिशूद्रःन
चरूढ्यायोगस्यापहारःस्मृद्वरत्वात्संभवात् अस्मिन्नुपाख्यानेहंसेरणाद्यैश्वर्योपन्यासेनज्ञान
व३ श्रुतेःक्षत्रियत्वागमात् ननुशूद्रस्यावदविद्यानधिकारेप्रतिषिद्धायांतस्यामपिमुक्तिर्नसिद्ध्ये
दितिचेन्नस्मृतिपुराणादिमुखेनब्रह्मविद्योदयेप्रतिषिद्धकिंसिद्धेः तस्मान्नशूद्रोवेदविद्याम २७
धिक्रियात॥ ॥कंपनात्॥१३॥ एकादशाधिकरणमारचयति॥ जगत्कंपनकृत्प्राणोऽशा

निर्वायुरुतेश्वरः। अशनिर्भयाद्धेतुत्वाद्वायुर्वादेहचालनात्॥१॥ वेदनादमृतत्वोक्तेरीशोंतर्या
मिद्धपतः। भयाद्धेतुध्यानंतुसर्वशास्त्रिसुतत्त्वतः॥२॥ कठवल्लीषुषष्ठवल्ल्यामाम्नायते यदिदंकिं
चजगत्सर्वंप्राणएजतिनिःसृतं॥ महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंतीत्यस्यायमर्थः।
निःसृतमुत्पन्नंयदिदंजगत्तत्सर्वंप्राणनिमित्तभूतेसतिकंपतेतत्रप्राणशब्दवाच्यंवज्रवदुद्य
तंवज्रमिवमहाभयहेतुःएत[illegible]त्प्राणशब्दवाच्यंयविदुस्तेमरणरहिताभवंतीतितत्रजग
कंपनकारिणिप्राणेत्रयाणांसंदिग्धेसतिअशनिरिति तावत्प्राप्तंकुतःमहद्भयमितिभयहे
तुत्वश्रवणात्॥ वायुर्वाभविष्यतिप्राणेजगदेजतीतिप्राणशब्दवाच्यस्यदेहादिचालनत्वाच्च
त्मादितिप्राप्तेब्रूमः। ईश्वरःप्राणशब्दवाच्योभवितुमर्हतिकुतःयएतद्विदुरमृतास्तेभवंती
तिवेदनादमृतत्वोक्तेःभयहेतुत्वान्तर्यामिब्राह्मणेश्वरस्यभविष्यतिभीषास्माद्वातःपवते

नीषोदेति स्वर्य इति श्रुत्यंतरात् देहादिचालकत्वं च सर्वेषां कि वादीश्वरस्योपपद्यते तस्मादीश्वरः
प्राणशब्दवाच्यः॥ ॥ज्योतिर्दर्शनात्॥ ॥१।३।४०॥ ज्योतिरधिकरणमारचयति। परं ज्योतिस्तु सूर्य
स्य मंडलं ब्रह्म वा नवेतास्त्समुत्थायोपसंपद्य तत्तक्या स्याद्रविमंडलं॥१॥ समुत्थानं त्वंपदार्थस्तु द्धि
र्वाक्यार्थबोधनं। संपत्तिस्तत्वमस्त्वो केन ब्रह्मस्यादृदस्माद्वितः॥२॥ छांदोग्ये ष्टमाध्याये प्रजापतिवि
द्याया माम्नायते य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यते स उत्तमः पुरुषः इत्यस्यायमर्थः सम्यक्प्रसीदत्यस्यामवस्थायामिति संप्रसादः सुषुप्तिः
तयावस्थया तत्रावजीव उपलक्ष्यते एष जीवोऽस्माच्छरीरात् समुत्थायेति शरीरेषु संस्तु गमं तत्र ज्योतिः शब्दा २८
द्वाच्यादधस्संश्लिष्येत तिरविमंडलमिति [illegible] तावस्मात् संशारीरात् समुत्थाय ज्योतिरूपसं
पद्यति देहान्निर्गत्य पश्चाज्ज्योतिः प्राप्नोती त्युच्यमानत्वाद्ब्रह्मप्राप्ति निर्गमनाभावात् प्राप्तस्येत्यमन

भेदानुपपत्तेश्चेति प्राप्ते ब्रूमः। ज्योतिः शब्दवाच्यं ब्रह्मस्यात् नकृत्तः स उत्तमः पुरुष इत्युत्तमपुरु
षसंकीर्तनात् रविमंडलस्य तदयोगात्। किंच। यो वेदेदं जिघ्राणीति स आत्मा गायत्र्या वेदेदं श्रुणवानीति
स आत्मेत्यादिघ्राणघ्राणघ्रय आत्मनश्रवणा श्रोतव्यादिशाद्वित्व मात्मनः श्रूयते। तादृक्वाक्यत
या ज्योतिःशब्दवाच्यं ब्रह्म स यदुक्तं शरीरा[illegible]त्समुत्थाय ज्योतिरूपसंपद्यत इति तद्ब्रह्मपदेन संत
वतीति तदत्र नन्वत्र समुत्थानं निर्गमनं किं हि त्वंपदार्थस्य जीवस्य शरीरत्रयाद्विवेकः ना प्यसंप
त्तिः प्राप्तिः किं तर्हि ज्ञाधितत्वंपदार्थस्य ब्रह्मात्मनावबोधनं। तस्माज्ज्योतिर्ब्रह्म॥ ॥आकाशोर्थां ति
तरत्वादिव्यपदेशात्॥ ॥१।३।४१॥ आकाशोऽर्थांतरत्वादिव्यपदेशादधिकरणमारचयति। वियद्वा ब्रह्म वाकाशो वै नामेति
कृतं वियत। अवकाशप्रदानेन सर्वनिर्वाहकत्वतः॥१॥ निर्वोढृत्वं नियंतृत्वं चेतनस्यैव चेतनः॥
ब्रह्मस्यात् काशाकाशरोपेच ब्रह्मा[illegible]त्पात्मवाहतः॥२॥ छांदोग्यस्याष्टमाध्याये तत्र श्रूयते। आकाशो
मे

नाम १
विनामैरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म तदमृतं स आत्मेति। अस्यायमर्थः। आकाशाख्यः कश्चि
त्पदार्थः। स च जगन्नामरूपयोर्निर्वहिता निर्वाहकः। तच नामरूपे यस्मादाकाशाद्भिन्ने अथवा यस्मा
काशस्यांतरे वर्तेते तदाकाशं मरणरहितं ब्रह्म तदेव प्रत्यगात्मेति तत्राकाशो विनामेति यदुक्तं
तर्हि यस्या नामरूपयोर्निर्वहितात्तदुक्तस्य निर्वाहकत्वस्यावकाशप्रदातरि वियति संभवादिति चो
द्यं ब्रूमः। अत्र निर्वाहकत्वं नाम नावकाशप्रदान[illegible]मात्रं किंतु नियामकत्वं सर्वप्रकारनि
र्वाहस्य नियंतृत्वेपि संभवात् तच्च नियंतृत्वं चेतनस्य ब्रह्मण एव श्रूयते श्रुत्यंतरे श्रूयते च।। न हि वि
यताचेतनस्य नियम्यविशेषानजानतो नियंतृत्वं संभवतीति तत्राकाशं ब्रह्म स्यात्। किंच
ब्रह्म वाक्यव्यापितं दमृतं स आत्मेति ब्रह्मत्वामृतत्वानि श्रूयंतां ततोपि ब्रह्मैवाकाशः।। ।।[illegible]।। २९
त्मानंदन।। ।।१३।।४ चतुर्दशाधिकरणमारचयति।। ।।स्यादिज्ञानमयाजीवा ब्रह्म वा जी

वद्युष्पते। आदिमध्यावसानेषु संसारिप्रतिपादनात्।।१।। विज्ञेवि लोकसंधिं द्रजीवं प्राणदक्षपा
धितः। ब्रह्म च मत्यं तोपात्तं बोध्यते ब्रह्मनेतरत्।।२।। बृहदारण्यके षष्ठाध्याये श्रूयते योयं विज्ञान
मयः पुरुषः प्राणेषु हृद्यंतर्ज्योतिः स समानः सन्नुभौ लोकौ संचरतीति अस्यायमर्थः। विज्ञानम
यो लिंगशरीरमयः। तेन स्थूलाद्व्यतिरेकः सिद्धः प्राणेषु चक्षुरादींद्रियेषु प्राणादिवायुषु
चक्षुरंतःकरणे सप्तमी विभक्त्या आधारत्वनिर्देशादाधेयस्य पुरुषस्येंद्रियवायुमनोभ्यत्वं सिद्धं
अंतःशब्देन धीवृत्तिभ्यः कामसंकल्पादिभ्यो व्यतिरेकः सिद्धः बुद्धिपरिणामरूपाणां तासां वृत्ती
नां बहिर्वर्तित्वात् एवं च स्थूलदेहेंद्रियप्राणवायुभ्योंतःकरणात् तद्वृत्तिभ्यश्च व्यतिरिक्तः
स्वेषां सर्वेषां साक्षित्वेन चित्ज्योतिः स्वरूपः पुरुष इत्युक्तं भवति स चपुरुषो लिंगशरीर
तादात्म्याध्यासेन लिंगशरीरेण समानः सन्निहलोकपरलोकावनुसंचरतीति तत्र विज्ञान

मयो जीवो न विष्णुमर्हति ज्योतिर्ब्राह्मणे शारीरब्राह्मणपाठयोर्वादिमध्यावसानेषु संसारस्यैव प्रपं-
च्यमानत्वादादितावद्बुद्धिलोकावनुसंचरतीति संसारित्वं स्पष्टं मध्येऽपि संप्रसादस्वप्नांतबुद्धां-
तादिकं डिकानिरवस्थात्रयं प्रपंच्यते अंतेऽपि स वा अयमात्मा ब्रह्मविज्ञानमयो मनोमयो वाङ्म-
यः प्राणमय इत्यादिना सोपाधिकस्वरूपवर्णनेन संसार एवोच्यते तस्माज्जीव इति प्राप्ते ब्रूमः । नना-
त्र जीवोऽत्र प्रतिपाद्यः लौकिकाहंप्रत्ययादेव सिद्धत्वात् किमर्थं तर्हि जीवाभिधानमिति चेत् प्राणा-
द्युपाधिभ्यो विवेकमादावभिधानं मध्येऽप्यवस्थात्रयसंगराहित्यं दर्शयितुमभिधीयते अंते तदेकं जी-
वस्वरूपमनूद्य तस्य ब्रह्मत्वं प्रतिपाद्यते ब्रह्मत्वं चास्य मानांतरेणाप्राप्तत्वात् तस्माद्ब्रह्मात्र प्रतिपाद्यं । ३०
न तु जीव इति सिद्धं ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायाम-
धिकरणमालायां प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः ॥ ॥ आनुमानिकमप्येकेषामिति

चेन शारीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १४१ ॥ चतुर्थपादस्य प्रथममधिकरणमारचयति । महतः
परमव्यक्तं प्रधानमथवा । प्रधानं सांख्यशास्त्रोक्ततत्त्वानां प्रत्यभिज्ञया ॥ १ ॥ श्रुतार्थप्रत्यभिज्ञानात्प-
रिशेषाच्च न तदुक्तः सूक्ष्मत्वात्कारणावस्थमव्यक्ताख्यं तदर्हति ॥ २ ॥ काठकवल्लीषु तृतीयवल्यामाम्ना-
यते । महतः परमव्यक्तमव्यक्तात्पुरुषः पर इति अत्राव्यक्तशब्देन सांख्याभिमतं प्रधानमभिधीयते ।
कुतः प्रत्यभिज्ञानात् महदव्यक्तपुरुषाः सांख्यशास्त्रे परापरभावेन यथा प्रसिद्धाः तथैवात्र श्रुतौ प्र-
त्यभिज्ञायंते तस्मादव्यक्तशब्दवाच्यं प्रधानमिति प्राप्ते ब्रूमः अव्यक्तशब्दवाच्यं वक्तुं नेदमर्हति
कुतः पूर्ववाक्योक्तशरीरस्यात्र प्रत्यभिज्ञानात् तथाहि पूर्वस्मिन्वाक्ये शरीरादीनि रथादित्वेनो-
क्तानि आत्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इंद्रियाणि
हयानाहुर्विषयांस्तेषु गोचरानिति तानि पूर्ववाक्योक्तानि वस्तून्यस्मिन्वाक्ये प्रत्यभिज्ञायं-

तो इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परम
व्यक्तमव्यक्तात्पुरुषः पर इति। स्मार्तप्रत्यभिज्ञानादपि श्रौतं प्रत्यभिज्ञानं प्रत्यासन्नत्वात् प्रबलं
नन्वेवमपि बहूनां प्रत्यभिज्ञायमानत्वाच्छरीरमेवाव्यक्तशब्दवाच्यमिति केनो विनिगमः
परिशेषादिति ब्रूमः। तथाहि पूर्वस्मिन्वाक्ये इंद्रियार्थमनोबुद्ध्यात्मशब्दैर्निर्दिष्टाः पदार्था उत्तरस्मि
न्वाक्ये तैरेव शब्दैर्निर्दिश्यंते पूर्वत्रात्मशब्देन निर्दिष्टं वस्तूत्तरत्र पुरुषशब्देन निर्दिष्टं उत्तर
वाक्ये महच्छब्देन यदुक्तं तत्पूर्ववाक्ये बुद्धिशब्देन संगृहीतं बुद्धिर्हि द्विविधा अस्मदादीनां बु
मौ.२ द्धिरकानकारणं च तत्र हिरण्यग[illegible] बुद्धिः परा महच्छब्दवाच्या। तयोः पूर्वत्रैकत्वेन निर्दिष्टयोरु ३१
त्तरत्र भेदेन निर्देशः। एवं च सति पूर्ववाक्ये शरीरात्मकं परिशिष्टं उत्तरवाक्ये चाव्यक्तशब्दः प
रिशिष्यते। न त्वेवं परिशेषेऽपि शरीरस्य स्पष्टत्वात् अव्यक्तशब्दवाच्यत्वमनुपपन्नमिति शंकते नी

स्य

=२।१२

यं कारणावस्थापन्नस्य शरीरस्य सूक्ष्मत्वेनास्पष्टस्याव्यक्तशब्दार्हत्वात् तस्मादव्यक्तशब्द
वाच्यं वृत्तं च समन्वयदविरोधात्।।१४।२।। द्वितीयाधिकरणमारचयति। अजादिमां स्मप्रवृ
त्तिस्तेजोबन्नात्मिका अथवा। अजा आदिलोहितादिलक्ष्यो सांख्यस्त्रगा।।१।। लोहितादिप्र
सिद्धा तेजोबन्नात्मलक्षणो गीयते श्रुतिर्मन्ये यो ब्रवीति अजा[illegible]हिर्मधुवद्वत्।।२।। श्वेताश्वतरोपनि मौ.४
षदि चतुर्थाध्याये श्रूयते अजामेकां लोहितशुक्लकृष्णामिति तत्राजाशब्देन सां[illegible]ख्यशास्त्रोक्ता
प्रधानशब्दवाच्या प्रकृतिर्विवक्षिता अथवा छांदोग्योक्ता तेजोबन्नात्मिका। प्रकृतिरिति
संदेहे प्रधानमिति तावत्प्राप्तं कुतः सत्वरजस्तमोगुणात्मकत्वप्रतीतेः।। यद्यपि लोहित
शुक्लकृष्णा वर्णा एव श्रूयंते न तु गुणाः तथापि लोहितादिशब्दैर्गुणा उपलक्ष्यंते तत्र लोहित
[illegible] शब्देन रंजकत्वसाम्यात् रजोगुण लक्षितः शुक्लशब्देन सत्वं च

वपाम्पाय च गुणः ऽल्पत्वाद्येनाप्या [illegible] वरकत्वसाम्यात्तमोगुणः एवं च सति शारवांतरे प्रसीदि
रजु गृहीता जवति तस्मात्प्रधानमिति प्राप्ते ब्रूमः ॥ यदग्ने रोहितं रूपं तेजसस्तद्रूपं य [illegible] तदपां
यच्छक्लं तदन्नस्येति छांदोग्ये तेजोबन्नात्मिकायाः प्र [illegible] तेर्लोहितादिरूपाणि श्रूतानि ताच्य
नावत्कल्पनिज्ञायंते ॥ ततश्चोत्पत्त्यभिज्ञायाः प्राबल्याद्रोहितादि शब्दानां मुख्या [illegible] र्थत्वाद्धाते
जोबन्नात्मिकाप्रकृतिरजेति गम्यते यद्यप्यजा शब्दश्छाग वाचितया लोके प्रसिद्धो रूढः नापि न जाय
त इति योगः संभवति तेजोबन्नानां ब्रह्मणो जातत्वात्तथापिच्छागत्व सुकेप सत्त्वोपरवा वबोधन
यपरिकल्प्यते यथादित्य [illegible] मधुत्व मसत्यो वा आदित्या द्देव मध्वित्यादि वाक्येन परिकल्पितं तद्व
तस्मात्तेजोबन्नात्मिका प्रकृतिरजा ॥ ॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ३२
तृतीयाधिकरणमारचयति ॥ यस्मिन्पंच पंचजनाः सांख्यतत्त्वान्याद्दाङ्क्ती रिताः प्राणाद्याः सांख्यतत्त्व

पंचपंचजना आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतं अध्याय मर्थः
य२
नि पंचविंशतिना मनात् ॥ २ ॥ न पंचविंशतिर्नाम मान्या काशातिरेकतः । संज्ञा पंचजने [illegible] प्राणाद्या
याः संज्ञितः श्रुता ॥ २ ॥ बृहदारण्यक षष्ठाध्याय श्रूयते यस्मिन्पंच पंचजना आकाशश्च
प्रतिष्ठितः तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमिति तत्र पंच
स्मिन्नाश्रिताः तमेवात्मानं ब्रह्मामृतं [illegible] आहोस्वित्कृतिबोधाः
पंचजना इति प्रोक्ताः पदार्थाः किं सांख्यशास्त्रोक्तवानि [illegible] पंचविंशति संख्या
प्राणचक्षुः श्रोत्रमनोन्नसंज्ञका इति संशये सांख्यतत्त्वानीति प्राप्ते अतः पंचविंशति संख्या
सांख्यशास्त्रप्रसिद्धाया अवगमात् तथाहि पंच पंचेति शब्दद्वयं श्रूयते तत्रैकेन शब्देन तत्त्व
गतपंचसंख्या विवक्षिता द्वितीयेन पंचसंख्याविषयापरा पंचसंख्या विवक्षिता च पंचसंख्या
विशिष्टानि तत्त्व पंचकानि सूक्तं भवति तत्र पंचभिः पंचकैः पंचविंशत्य पचना सनात्सांख्यतत्त्व
नां प्राप्ते ब्रूमः यद्यपि पंचसंख्याविषयापरा पंचसंख्याया श्रूयते तथापि न पंचविंशतिर्नियंत्र

शक्यते पंचविंशतिसंख्याकानां तत्त्वानामाश्रयत्वेनात्मनो वचनासंभवात् तान्स्वयमात्मा पंचविंश
त्वं तःस्यात् तथा च सत्येकस्यैवाधेयत्वमाधारत्वं चेति विरोधप्रसंगात् आकाशोप्यपरः श्रूयते नेघ
तस्यापि पंचविंशत्यंतःपातित्वं आकाशश्चेति पृथङ्निर्देशस्तु न्याय्यो विरोधाद्दत्त आत्माका
शाभ्यां सह सप्तविंशतिसंपत्तेर्न सांख्यतत्त्वानामवकाशः कस्तर्हि वाक्यार्थः उच्यते पंचजनशब्दो
यं समस्तः संज्ञावाची दिक्संख्ये संज्ञायामिति समासविधानात् ततः पंचजनसंज्ञकाः पंचसं
ख्याका इत्युक्तं भवति संज्ञिनस्तु वाक्यशेषात् प्राणादयो वगंतव्याः प्राणस्य प्राणमुत चक्षुषश्चक्षु
रुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये विदुरिति वाक्यशेषे प्राणादीनां पंचानां साक्षीचिदा
त्मादितीप्यैः प्राणादिशब्दैरभिधीयते। एतस्माद्वाक्यशेषात् प्राणादयः पंचजना वाच्याः॥ ॥का ३३
पुष्य १ रणत्वेन चाकाशादि[illegible]थाव्यपदिष्टोक्तेः॥ ॥१४॥ चतुर्थाधिकरणमारचयति। समन्वये

गाद्यानीनस्तुत्तोस्तुज्यते अथवा न स्तुतो वदवाक्येषु परस्परविरोधतः ॥१॥ सर्गे क्रमविवादेपि
२ यं नासौ स्रष्टरि विद्यते। अव्याकृतमसत्प्रोक्तं सुक्तो लोके कारणे स्थितः ॥२॥ योयं वेदांतसमन्वयोऽ त २
गकारणविषयः स्याद्भिः स्त्रिभिः पादैः प्रतिपादितः। तमाक्षिप्य समाधत्ते। मयमारंभः। नच्युत्कार्य
समन्वय इति तावत्कारणं भवदालस्तु ब्रह्मणो विरोधप्रतीतेः। आमाण्यस्यैव दुःसंपादत्वात्
तथाहि आत्मन आकाशः संभूत इति तैत्तिरीयके वियदादिसृष्टिः स्तूयते छांदोग्ये तते
जोऽसृजतेति तेज आदिस्मृतिः एतरेयके स इमाल्लोकानसृजतेति लोकसृष्टिः मुंडके एतस्माज्जा
यते प्राण इति प्राणादिसृष्टिः न केवलं कार्यद्वारेणैव विरोधः किंतु कारणस्वरूपोपन्यासेऽपि
सदेव सोम्येदमग्र आसीदिति छांदोग्ये सद्रूपत्वं कारणस्यावगम्यते तैत्तिरीयके च असद्वा इदमग्र
८२ अग्र आसीदिति असद्रूपत्वं। एतरेयके चात्मा वा इदमेक एवाग्र आसीदित्यात्मरूपत्वं अनो वि

॥ धानत्सूक्तः समन्वय इति सिद्धं । अथवा नामरूपे त्वियदादिषु तत्क्रमे च विवादः वियदादी
नाम तात्पर्यविषयत्वाद्द्वितीयब्रह्मबोधकत्वे वक्ति उपपादास्तात्पर्यविषयत्वे न गगनस्येरि ब्रह्म
णि न कापि विप्रतिपत्तिः क्वचित्संक्षेपेनोक्तस्य ब्रह्मणोऽन्यत्र सर्वजीवस्वरूपत्वविवक्षया आम्नया
ऽदिनाभिधानात् यत्र संक्षेपेनाभिधानं तद्व्याहतत्वाच्चाभिप्रायं न वक्तव्यं तत्तत्राभिप्रायं कथमपत:
सज्जायेतेति अक्तत्वं तेरचात्वं ताभावस्य कारणत्वनिषेधात्तस्मादेकवाक्यतायाः सुसंपाद बाधकौ
जगत्कारणे समन्वयः ॥ ॥ जगद्वाचित्वात् ॥१६॥ पंचमाधिकरणमारचयति । पुरुषाणां तु
कः कर्ता प्राणजीवपरात्मसु । कर्मेति चलने प्राणो जीवो पूर्वे विवक्षितः ॥१॥ जगद्वाची कर्मशब्दः
सुमोत्त्र विनिवृत्त्येयात्कर्ता परमात्मैव न मृषावादितालतः ॥२॥ कौषीतकिब्राह्मणोपनिषदि ३४
बालाकिनामा ब्राह्मणो नादित्यादिषोडशस्थानपुरुषान्ब्रह्म[illegible]वेना । तेन राजातन्निराकरणाय

पुस१

॰ मादायाविर्बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म स वै वेदितव्य इति तत्र संशये प्राण इ
ति तावत्प्राप्तं कर्मशब्दस्य चलनवाचित्वात् देहादिचलनस्य च प्राणायत्तत्वात् अथवा पुरुषाणां
कर्ता जीवो भवितुमर्हति कर्मशब्दस्यापूर्ववाचित्वात् जीवस्यापूर्वस्वामित्वात् सर्वथा न परमात्मेति
प्राप्ते ब्रूमः । नात्र कर्मशब्दः चलनं वक्ति नाप्यपूर्वं किं त्वयं जगद्वाची क्रियत इति कर्मेति व्युत्प
त्तेः स्यति जगद्वाचित्वे कर्मशब्दः संप्रयोजनो न विष्यति पुरुषमात्रकर्तृत्वं तेषां का निर्वृत्यर्थवा
न्तत्वाच्चश्रुतिवाक्याक्षराण्येवं योजयितव्यानि हे बालाके ये त्वत्कानां षोडशानां पुरुषाणां यः
कर्ता स एव वेदितव्यः न तु त्वत्पुरुषाः अथवा किमनेन षोडशानां कर्तरि संकोचेन [illegible] एतत्कृत्स्नं
जगद्यस्य कार्यं स एव वा वेदितव्य इति तस्य जगत्कर्तृत्वं तु परमात्मन एव जीवप्राणयोः एवं सति नर
ब्रह्मशब्दादिवदोषो न भवति ब्रह्म ते ब्रवाणीति प्रतिज्ञाय षोड[illegible]पुरुषान्वदतो बालाकेर्
२।१

पाविकिलेत्यनेन वाक्येन घटपटादिवन्मायापाद्यरंडा स्वयं ब्रह्मविवर्त्तः यदि प्राणजीवो ब्रूयात्त
दा बालाकिर्विवराको घटपटादिवत्स्यात्तच्च न युक्तं तस्माद्वाक्योक्तो जगत्कर्ता परमात्मैव॥ ॥वा
क्याच्चयात्॥ ॥१६॥ षष्ठाधिकरणमारचयति॥ आत्मा द्रष्टव्य इत्यत्र कः संसारी वा परः स्मरः॥
संसारी प्रतिज्ञायादि भोगप्रीतेरस्य सूचनात्॥१॥ अथ तत्र वयमुपक्रम्य तदंतमुपसंहृतं तं संसारि
णमनूद्यात परेशत्वं विधीयते॥२॥ बृहदारण्यकचतुर्थाध्याये मैत्रेयीं भार्यां पतिरुपदिशति
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति अत्रात्मनिदिध्यासनं दिग्धे सति
संसारीति नात्मा संस्कृतः न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय प
तिः प्रियो भवतीत्यादिवाक्यैर्भोगप्रीतियुक्तस्यात्मनः संसारित्वसूचनात् अयमत्र वाक्यार्थः। ३५
पत्नी प्रीतिं कुर्वती जायापत्योः सुखाय प्रीतिं न करोति किंतु स्वसुखायैव एवं पतिपुत्रादयो

पि स्वस्वभोगार्थिनो वतस्त्वं कुर्वंतीति भोगस्य नासंगस्येश्वरस्यावकल्पते तस्मात्संसारीति प्राप्ते ब्रू
मः॥ एतद्वाक्योपक्रमे मैत्रेयी वित्तेन साध्येन कर्मणा किं सोमेऽमृतं स्यादिति पप्रच्छ याज्ञवल्क्य
स्यामृतत्वस्य तु नाशास्ति वित्तेनेति अमृतत्वं प्रति आशापि नास्तीति उत्तरमाह ब्राह्मणावसाने
ऽप्येतावदरे खल्वमृतत्वमित्युपसंहृतं अत उपक्रमोपसंहारवशादमृतत्वसाधनमात्मज्ञानम
त्र प्रतिपाद्यं जीवात्मज्ञानं च नामृतत्वसाधनं तस्माद्भोगप्रीतिसूचितं जीवमनूद्य तस्य ब्रह्म
त्वं प्रतिपाद्यते॥ ॥प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥ ॥१४७॥ सप्तमाधिकरणमारचयति॥
निमित्तमेव ब्रह्म स्यादुपादानं च वीक्षणात्॥ कुलालवन्निमित्तं तन्नोपादानं मृदादिवत्॥१॥
बहु स्यामित्युपादानता वापि श्रुतेरीक्षितुः। एकबुद्ध्या सर्वधीश्च तस्माद्ब्रह्मोभयात्मकं॥२॥
जगत्कारणत्वप्रतिपादकानि सर्वाणि वाक्यानि विषयः तत्र किं ब्रह्म निमित्तकारणमेवोपा

हीनकारणमपीति यद्यपि निमित्तकारणमेवेति तावन्मात्रं कृतः तदिदमनेनेति मृत्कार्यविषय जी १
पर्यालोचनश्रवणात् पर्यालोचनं च निमित्तकारणत्वकुलालएव दृष्टं नोपादानत्वं तथापि मृदितं
स्मान्निमित्तकारणमेवेति प्राप्ते ब्रूमः तदित्थं तत्र बहु स्यां प्रजायायेति ईक्षणश्रवणात् प्रकर्षेणात्
रत्र बहु [illegible] नावः श्रूयते ततस्तु उपादानत्वमस्ति किं च येनाश्रुतं श्रुतं भवतीत्यादिना ब्रह्मण्येक
स्मिन् श्रुते सत्यश्रुतमपि सर्वं श्रुतमेव भवतीति प्रतिपाद्यते तेन तदेकविज्ञाने [illegible] न५
सर्वविज्ञानं तत्र ब्रह्मणः सर्वोपादानत्वे सति ब्रह्मव्यतिरेकेण कार्याणामभावादुपपादयितुं शु
क्यं केवलनिमित्तत्वे तु सार्वज्ञकार्यस्य ब्रह्मव्यतिरिक्तत्वस्य स्वकर्णं नामिकविज्ञानेन सर्ववि व्याख्याता
ज्ञानं प्रतिपाद्येत तस्मादुभयविधकारणं ब्रह्म ॥ ॥एतेन सर्वे व्याख्याताः॥ ॥२८॥ प्र ६६
माधिकरणमारचयति ॥ अ[illegible]एवादरपि[illegible]तु व्यंश्रुतं ब्रह्मण एव वा ॥ वटधानादिदृष्टांतादि

६२

एवादेरपि तन्नूतं ॥ स्वन्यादिरपादाणकस्तु धर्मः सर्वश्रुद्धिर्न युज्यात् ॥ स्तुत्यैस्त एवपि धानाघास्त
सर्वे तान्नस्लिवकारणं ॥ सौवर्दातो विषयः तत्र किं ब्रह्मण इव परमाण्वन्यादीनामपि कवि[illegible]ग जा २
कारणत्वमस्तीत मस्ति अथवा सर्वत्र ब्रह्मण एव कारणत्वं प्रतिनियतमिति संशयः ॥ अपवादर
६ पिकारणत्वं कृतः वटधानादिदृष्टांतश्रवणात् तथाहि छांदोग्ये षष्ठाध्याये श्वेतकेतुं प्रति उप
४ दिशन्नुद्दालकः सूक्ष्मेणैव स्थूलस्य जगतो निर्माणं प्रतिपादयितुं महाद्रुमगर्भितानि वटबीजानि
दृष्टांतत्वेनोपाजहार अतस्तत्सदृशा परमाण्वादावादर्शंतिकत्वेन श्रुतान्यवंतिसूक्ष्मस्य [illegible] व महाद
द्रमग्रजायीदितित्वाद्वाद्वकारणत्वं श्रुतं स्वनामिवमेकं वयो वदंति कालं तथान्ये इति स्वनावका
लपक्षौ श्रुतौ तस्मात्परमाण्वादीनामपि श्रोतं कारणत्वं इति प्राप्ते ब्रूमः ॥ एकविज्ञानेन सर्वविज्ञा
नस्वन्यादिमात्रेणानुपपद्यते स्वन्यादिनिरजन्यस्य ब्रह्मणः स्वन्यादिज्ञानेनाज्ञातत्वात् धानादि

दृष्टांतस्तु ब्रह्मण्यपींद्रियागम्यतया सूक्ष्मत्वादुपपद्यते अल्पबुद्धीनामदृष्टा हित्वा तिग्राह्यस्तु
याधिकरणावसितः स्वनावकालो तु पूर्वपक्षो वचनस्मृत्यानपत्यक्तो तस्मात् जगन्निव स्मृत्यानिदिते
जगत्कारणं न परमाण्वादीति सिद्धं॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यभारतीतीर्थमुनिप्र
णीतायां वैयासिकन्यायमालायां प्रथमाध्यायः समाप्तः॥ ॥स्मृत्यनवकाशदोषप्रसंग
इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ ॥२।१।१॥ द्वितीयाध्यायस्य प्रथमपादे प्रथमाधि
करणमारचयति। सांख्यस्मृत्यास्ति संकोचो न वा वेदसमन्वये धर्मे वेदः सावकाशः संकोचन
वंकाशया॥१॥ प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः स्मृतिः॥ अमूला कापिली बाध्या न तु सं
कोचो न यात्ततः॥२॥ अस्मिन्पादे सर्वेष्वधिकरणेषु पूर्वाध्यायोक्तः समन्वयो विषयः। तत्रास्मि ३७
न्नधिकरणे वैदिकस्य सांख्यस्मृत्या संकोचोऽस्ति न वेति संशयः संकोचोऽस्तीति तावत्प्राप्तं

तः सांख्यस्मृतेर्निरवकाशत्वेन प्रबलत्वात् सांख्यस्मृतिर्हि वस्तुतत्त्वनिरूपणायैव प्रवृत्ता ना
ऽस्यां धर्मं कंचिदपि प्रतिपादयति यदि तस्मिन्नपि वस्तु [illegible] न्यासो बाध्येत तदा
निरवकाशा स्यात् वेदस्तु धर्मं ब्रह्म च प्रतिपादयन् ब्रह्मण्येकस्मिन् बाध्यमानोऽपि धर्मे साव
काशः स्यात्तस्मादनवकाशया स्मृत्या सावकाशस्य वेदस्य संकोचो युक्त इति प्राप्ते ब्रूमः॥
सांख्यस्मृत्या वेदस्य संकोचो न युक्तः कुतः मन्वादिस्मृतिभिः ब्रह्मकारणवादिनीभिः बाधित
त्वात् प्रबला हि मन्वादिस्मृतयः प्रत्यक्षवेदमूलत्वात् न तु तथा। कापिलस्मृतेः प्रधानकारण
वादिन्या मूलभूतं किंचन वेदवाक्यमुपलभामहे दृश्यमानानां वेदवाक्यानां ब्रह्मपरत्वस्य पूर्वाध्याये नि
र्णीतत्वात् तस्मान्न सांख्यस्मृत्या वेदस्य संकोचो युक्तः॥ एतेन योगः प्रत्युक्तः॥ ॥२।१।३॥ द्वि
तीयाधिकरणमारचयति॥ योगस्मृत्यास्ति संकोचो न वा योगो हि वैदिकः। तत्त्वज्ञानोपयुक्त

श्च ततः संकोच्येत तया ॥३॥ अमापि योगेन तात्पर्यादतात्पर्यात्प्रमाप्रमा। अविदिके प्रधानादा
स वसंकोचश्चैयाप्यतः ॥३॥ योगस्मृतिः पातंजलं शास्त्रं। तत्रोक्तोष्टांगयोगः प्रत्यक्षावेदेषु प
लभ्यते श्वेताश्वतरादिशाखासु योगस्यैव प्रपंचितत्वात् किंचायं योगः तत्वज्ञानोपयोगी दृ
श्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति योगसाध्यस्य चित्तैकाग्र्यस्य ब्रह्मसाक्षात्कार कि ५
हेतुत्वश्रवणात् अतः प्रमाणमूलं योगशास्त्रं तच्च प्रधानस्यैवांगकारणतां व[illegible]तस्माद्योग
स्मृत्याविदस्य संकोचेति मीमांसे ब्रूमः। अष्टांगयोगे तात्पर्यात्प्रमाणभूतापि सती योगस्मृतिरवै
दिके प्रमाणं तत्र तात्पर्याभावात् तथा हि अथ योगानुशासनमिति प्रतिज्ञाय योगश्चि
त्तवृत्तिनिरोध इति योगस्यैव लक्षणमुक्त्वा तमेव लक्ष्य शास्त्रेण प्रपंचयामासेति तत्रयो ३८
गतात्पर्यं प्रधानादि तु न प्रतिपाद्यतया प्रतिज्ञातं किं तर्हि द्वितीयपादे यमनियमादि साध

प
न प्रतिपादकं हेयं हेयहेतुं हानं हानहेतुं च विवेचयन् प्रसंगात् सांख्यस्मृतिसिद्धानि प्रधानादी
नि व्याजहारेति च तेनानतत्र तात्पर्यं तस्मान्न योगस्मृत्या वेदस्य संकोचः॥ ॥न विलक्षणत्वा
दस्य तथात्वं च शब्दात् ॥४॥ द्वितीयाधिकरणमारचयति। विलक्षणत्वतर्केण बाध्यतेऽथ वे
न बाध्यते बाध्यता स्यान्नियमात् कार्यकारणवस्तुनः ॥१॥ दृष्टत्वादीस्यमत्रापि दृष्टं वृश्चिक
केशयोः स्वकारणगतं वैषम्यं तर्काभासो न बाधकः ॥२॥ अचेतनं जगच्चेतनाद्ब्रह्मणो न जा
यते विलक्षणत्वाद्यद्येन विलक्षणं तत्तस्मान्न जायते यथा गोमहिषादित्यानेन तर्केण सम
न्वयो बाध्यत इति प्राप्ते ब्रूमः। ये ये कार्यकारणे तत्र सलक्षणे इत्यस्या व्याप्तेः वृश्चिकादौ व्य
भिचारो दृश्यते अचेतनाद्गोमयाद्वृश्चिकस्य चेतनस्योत्पत्तेः चेतनाच्च पुरुषादचेतनानां के
शानामुत्पद्यमानत्वात् ततो वेदनिर्णेयेऽर्थे शुष्कतर्केण कापि प्रतिष्ठितेति तत्कमाचार्यः॥ यत्ने नानु

मितोऽप्यर्थः॥ कुशलैरनुमारुद्भिः॥ अनिश्चितकतारेरच्यैर [illegible] न्यायिनापपाद्यत इति तस्मादानादेव
द्वैतलक्षणहेतुर्न बाधकः॥ ॥एतेन शिष्टापरिग्रहात् अपि न्यायख्याताः॥२॥अथ चतुर्थाधिकर
णमारचयति॥ बाधोऽस्त्विपरमाण्वादिमतैर्नाधवा यथा पटः॥ न्यूनतन्तुभिरारब्धोऽद्वैतात् बा
धातमतैः॥३॥शिष्टैरपिस्मृतिस्मृक्ताशिष्टव्यक्तं मतं किन्तुनानाबाधो विवर्तन्तनूनत्वेनि
यमो नहि॥४॥ सांख्ययोगस्मृतिव्यक्तदीयतर्केणैव बाधमाचून्तामकणादनु [illegible] द्वादिस्मृ
तिनिष्पदीयतर्केणाचसमन्वाया बाधनीयः कणादोऽहि परमर्षिः परमाणुः जगत्कारणं
स्मरति तर्कं चतस्मिन्नर्थे प्रावाचविमतं वादिकं [illegible] स्वस्मान्न्यूनपरिमाणेनारब्धं का
ग यद्व्यल्पायथा तन्तुभिः पट इति तु द्व्यणुकं चावाविषयारब्धार‍ः अतो जगद्वेतु स्मरति तर्कं ३९
च तदनुकूलमाह विमतं नावयवरूपं जगत् अनावयवः यत्नावयवरूपता यथा तु स्तम्भिपुरुषः

८।२

स्वप्नप्रपंच इति तस्मात् कबलैः कणादादिमतैर्बाध इति प्राप्ते ब्रूमः॥ यथा वैदिकशिरोमणिभिः
पुराणकर्तृभिः तत्र तत्र प्रसंगात् उदाहृत प्रत्येति पुरुषादिप्रतिपादिकानां व्यायोगस्मृतिर्ज
गत्कारणविषयादौर्बल्येन परित्यक्ता तदा निखिलैः शिष्टैरपद्दितानां कणादादिमतानां
दौर्बल्यमिति किं वक्तव्यं न खलु ब्राह्मपाद्मादिषु पुराणेषु क्वचिदपि प्रसंगाद्द्व्यणुकादिप्र
क्रियादाहृता प्रत्युतदिद्विकाद्वकदनीयवाऽन्तरेणापिनाचार्यदिति बहुशा निंदापलभ्यते
यत्तु न्यूनारब्धत्वनियम उक्तः नासौ विवर्तवादे [illegible] स्ति दूरस्थपर्वताग्निस्थितैः महद्भिरपि
ऊँ। श्चिरल्पत्वदर्शनावगमान्यजनमामान्यवात् यदप्यनावयुरयः [illegible] रत्वानुमानं तत्रापि साध्यवि
कलो दृष्टान्तः स्वप्नपरवस्थावेनावस्थावत आत्मनः सद्रूपस्यांगीकरणीयाद्व्यतिस्वप्नस्यना
वयुरः स्मरत्वात् तस्मादेतैर्मतैर्नास्ति बाधः॥ ॥नो [illegible] पितैः रचिनागस्येस्पादलोकवत्॥ ॥५॥
क्रा

पंचमाधिकरणमारचयति ॥ अद्वैतं बाध्यते नो वा नो चेन्नोग्यभिन्नेदतः । प्रत्यक्षादिप्रमासिद्धो भे-
दो स्माद्वाक्यबाधकः ॥१॥ तरंगफेनत्वादपि समुद्रान्नेदद[ृष्ट्ये]तो भोक्तृभोग्यविभेदादपि ब्रह्माद्वैतं
तथास्तु नतः ॥२॥ समन्वयेनावगम्यमानमद्वैतं प्रत्यक्षादिसिद्धेन भोक्तृभो[ग्य]भेदेन बाध्य-
त इति चेन्न तरंगादिरूपेण भेदस्य समुद्ररूपेणाभेदस्य च दृष्टत्वेन भेदाभेदयोर्विरोधाभावा-
त् । भेदाभेदविरोधव्यवहारस्याकारभेदनापरिहितत्वं नाम कस्मिन्न[पि] वस्तुनि साकारा-
त्वात् तस्माद्ब्रह्माकारेणाद्वैतं भोक्तृभोग्याकारेण द्वैतमित्याकारभेदा[द्व्य]वस्थासिद्धो न को-
वे३ ऽपि विरोधः ॥ ॥तदनन्यत्वमारंभणशब्दादिभ्यः ॥ ॥२।१।६॥ षष्ठाधिकरणमारचयति ॥ भेदाभेदौ
वा तात्त्विकौ स्तां यदि वा व्यावहारिकौ ॥ समुद्रादाविव तयोर्बाधाभावेन तात्त्विकौ ॥१॥ बाधितौ ४०
श्रुतियुक्तिभ्यां तावतौ व्यावहारिकौ । कार्यस्य कारणाभेदाद् अद्वैतं ब्रह्म तात्त्विकं ॥२॥ स्पष्टौ

२०

संशयपूर्वपक्षौ । नेह नानास्ति किंचनेति श्रुतिर्भेदं बाधते युक्तिश्च परस्परोपमर्दात्मकयोर्भेदा-
भेदयोरेकत्रासंभवः एकस्मिन्नेव उभयोर्हि बाधसंभवात् यदुक्तं पूर्वाधिकरणे आकारभेदाद्भे-
द इति तदप्यसत् अद्वैतवस्तुन्याकारभेदस्यैवासंप्रतिपत्तेः समुद्रादौ तु दृष्टत्वादभ्युपगम्यते न
हि दृष्टेऽनुपपन्नं नामेति न्यायात् अत्रापि ब्रह्माकारजगदाकारौ दृष्टाविति चेत् न ब्रह्मणः शास्त्रै-
कसमधिगम्यत्वात् तस्माच्छ्रुतियुक्तिबाधितत्वाद्व्यावहारिकौ भेदाभेदौ । किं तर्हि तत्त्वमिति चेद-
द्वैतमेव तत्त्वमिति ब्रूमः ॥ कार्यस्य कारणव्यतिरेकेणाकारणमात्रस्या[ऽ]वस्तुत्वात् तथा च श्रुतिर्मृ-
त्तिकादिदृष्टान्तैः कारणस्यैव सत्यत्वं प्रतिपादयति यथा सोम्यैकेन मृ[त्पि]ण्डेन सर्वं मृन्मयं वि-
ज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सोम्य स आ[दे]शो भवतीति श्र-
स्यायमर्थः ॥ प्राग्भाग्मृत्पिंडः कारणं तद्विकारा घटशरावादयः पृथग्वस्तुभूतघटादी[..]नि वाचा-

मृत्पिंड विकार

निवस्तूनि तानि किंचित्का मन्यंते तत्र घटादीनां पृथग्वस्तुत्वनिरासाय विकारस्याद्यैः अनितान्यप्यवद
रति। मृद्वस्तुनो विकाराः संस्थानविशेषाः घटादयो न पृथग्वस्तुभूता यथा देवदत्तस्य बा
ल्ययौवनस्थाविरादयः तद्वत्। एवं च सति घटाद्याकारप्रतिभासदशायामपि मृन्मात्रमेव वस्
तं अवस्तुतत्तो मृद्यवगनायां यत्तात्विकं स्वरूपं तत्सर्वमवगतं आकारविशेषा न ज्ञायंत इति चे
न्मा ज्ञायंतां नाम तेषामवस्तुभूतानामज्ञानं यदि वा अनुभवप्रतिभासमाना अपि विकाराणि
रूपिताः यतो मृद्व्यतिरेकेण न स्वरूपं किंचिद्विद्यते तेषां यथा रावोयमिति वाक्येष्या घना मध्ये
यमात्रं लभंते आतालिर्वस्तुकत्वे सति उपलभ्यमानस्वरूपेण मिथ्यात्वमपहाणेनापतत्वात् अ ४१
संभाविकारा मृत्तिकाव्यतिरेकेणापि स्वरूपं लभंत इति स्वरूपं तथा ब्रह्मलोपादशोवगंतव्याः।
ब्रह्मणो मृत्तिकान्यायस्य जगति घटादिन्यायस्य वा या योजयितुं शक्यत्वादिति तस्माज्जगतो ब्रह्म

नेदादद्वैतं ब्रह्मतात्त्विकं एवं विधविचारशून्यानां पुरुषाणामेवा तद्ध्या वेदनात्मुपेया द्वितीयं
ब्रह्म प्रतिपत्तः प्रत्यक्षादिनिर्भेदप्रतिपत्तिस्य स्वभावात्संभवति इतरं गन्यायेन जदाव नाभात तस्माद्व्य
वहारिका विनिश्चितं॥ ॥इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥ ॥२७॥ अस्ममाधिकरण
मारचयति। हिताक्रियादिप्रसंगा वाजीवान्भेदं प्रपश्यतः॥ जीवाद्धितक्रिया स्वार्थास्पादेवान्द
युज्यात॥१॥ अवस्तु जीवसंसारास्तेन नास्ति मम हानिः। इति पश्यत ईशस्य न हिताहितभागिता
॥२॥ परमेश्वरा द्वितीयपां चिजीवानां संसारासक्तानां वैराग्यादिकं हितं न निर्मिमीत अहितं च
नरकादुःखमधर्मं निर्मिमीत निर्मिमाणे अस्वस्य जीवैरभेदं सर्वज्ञतया पश्यति तस्मात्स्वस्यै
वहिताकरणमहितनकरणं च प्रसज्ययातामेतच्चायुक्तं न हि लोकामत्तो वा कश्चिदपि स्व
स्यहितं न करोति अहितं वा न करोति तस्माद्धिताकरणादिदोष इति प्राप्ते ब्रूमः। सर्वज्ञत्वादेवे

कृ१

मरोजीवसंसारस्यमिथ्यात्वंस्वस्यनिर्लेपत्वंचपश्यतिअतोनद्वैतादिनोदोषः॥उपसंहार
दर्शनान्नतिचेत्क्षीरवद्धि॥ ॥२२८॥अष्टमाधिकरणमारचयति॥नयंनावृसंनावह्यस्वष्टिरे
काद्वितीयतः॥नानाजातीयकार्याणांक्रमाजन्मनसंभवि॥१॥अद्वैतंतत्त्वतोब्रह्मतन्नाविद्या
सहायवत्।नानाकार्यकरंकार्यक्रमोविद्यास्थशक्तिभिः॥२॥एकमेवाद्वितीयमितिब्रह्मणः
स्वगतसजातीयविजातीयैर्भेदैःशून्यत्वमवगम्यतेसृष्टिवाक्यानिचाकाशवाय्वादीनिवि
चित्राणिनह्यविचित्रकारणात्कार्यवैचित्र्यंयुक्तं।अन्यथैकस्मादेवक्षीरादधितैलाद्यनेक
विचित्रकार्यप्रसंगात्॥क्रमश्चाकाशादीनांश्रुतावगम्यतेनचतस्यव्यवस्थापकंकिंचिद
स्तितस्मादनेककार्याणांक्रमेणजन्माद्वितीयब्रह्मणोनसंभवतीतिप्राप्तेब्रूमः॥यद्यपितत्त्वतो ४२
ब्रह्माद्वैतंतथाप्यविद्यासहायापतमितिश्रुतिस्मृत्यनुसारेणावगम्यतेमायांतुप्रकृतिंवि

१५

द्यान्मायिनंतुमहेश्वरमितिश्रुतेः॥मायैवाविद्याअज्ञानंवार्निर्वचनीयलक्षणास्यैवकचान
चमायांगीकारेद्वैतापत्तिः॥वास्तवस्यद्वितीयस्याभावात्।अतएकमपिब्रह्माविद्यासहाय
वशान्नानाकार्यकरंनविप्यतिनचकार्यक्रमस्यव्यवस्थापकाभावः॥अविद्यागतानांशक्ति
विशेषाणांव्यवस्थापकत्वात्।तस्माद्द्वितीयाद्ब्रह्मणोनानाकार्याणांक्रमेणसृष्टिःसंभवति
कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवा॥२२९॥नवमाधिकरणमारचयति॥ ॥नत्वंशोस्तु
ज्यातवास्यपरिणामोनस्तुज्यात्।कात्स्न्याद्ब्रह्मानित्यताक्षितिरंमासावयवंनावत॥१॥मायानि
तत्र र्वजरूपत्वंनकात्स्न्यान्नापिनांशतः॥शुक्तोनवयवस्यापिपरिणामोत्रमायिकः॥२॥अनंतरा अपारंभ
धिकरणेकार्यकारणयोरभेदःप्रतिपादितः॥आतानविज्ञानेषिकादिवदारंभवादोब्रह्मवादि
नाजिमतः॥तस्मात्क्षीरदधिन्यायेनपरिणामो [illegible] नुपगंतव्यः॥तत्रकिंब्रह्मकात्स्न्यनपरिण

मतेऽपि तत्कदेशानन्तानाद्यः अशेषपरिणामिब्रह्मणः क्षीरवदनित्यत्वप्रसंगाद्द्वितीये सावयवत्व
प्रसंगः तस्मान्न परिणामोऽस्तु कुत इति चाह ब्रूमः॥ इन्द्रो मायाभिः पुरुरूप ईयत इति श्रुतेः ब्रह्म
णो मायाशक्तिभिः जगद्रूपत्वपरिणामः न चासौ वास्तवः ततः न चानेकादशविकल्पयोरनवका
शः। तस्मादकृत्स्नपरिणामः॥ ॥सर्वोपेता च तद्दर्शनात्॥ ॥२।२०॥ दशमाधिकरणमारच
यति। नाशरीरस्य माया क्वापि यदि वास्ति न विद्यते॥ ॥यदि हि माया विना लोके तत्सर्वं पि शरीरिणः
१॥ बाह्यहेतुमृते यद्वन्मायया कार्यकारिता। क्वतेऽपीदं माययैव ब्रह्मण एवास्तु प्रमाणतः॥२॥ लो
के मायाविना मामैंद्रजालिकानां शरीरित्वदर्शनादशरीरस्य ब्रह्मणो न माया संभवतीति प्राप्ते
व ब्रूमः॥ गृहादिनिर्मातॄणां स्वव्यतिरिक्तमृदारुपाषाणादिबाह्यसाधनस्यापेक्षत्वदर्शनेऽपि ऐं ४७
द्रजालिकस्य बाह्यसाधननिरपेक्षेण गृहादिनिर्माणदर्शनात्तथा लौकिकमायाविनः शरीरस्यापि
यथा॰

क्षेत्रदर्शनेऽपि ब्रह्मणो मायायाः सिद्ध्यर्थं तदपेक्षा मा भूत्। अथो मतेऽ ऐंद्रजालिकस्य बाह्यहे
तुनिरपेक्षेण निर्माणं च प्रत्यक्षप्रमाणमस्तीति॥ ब्रह्मणोऽपि शरीरनिरपेक्षेण मायासृ
ष्टिमायिनं तु महेश्वरमिति श्रुतिप्रमाणमस्तु॥ ॥न प्रयोजनवत्त्वात्॥ ॥२।१।११॥ एकादशाधि
करणमारचयति॥ ॥तृप्तोऽस्रष्टाथवा स्रष्टा न स्रष्टा फलवांछया। अतृप्तिः स्याद्वांछायां
उन्मत्तनरतुल्यता॥१॥ लीलाश्वासवद्यथा चेष्टा अनुद्दिश्य फलं यतः॥ अनुन्मत्तैर्विरच्यंते तस्मा
न्नृपस्य प्यास्वजत॥२॥ आनंदो ब्रह्मेति श्रुतेः नित्यतृप्तः परमेश्वरस्तादृशस्य सृष्टिविषयाया
मिच्छायां अस्तूपगम्यमानायां नित्यतृप्ति र्व्याहन्यते अनस्तूपगम्यमानायां च बुद्धिपूर्विका
सृष्टिं विरचयति उन्मत्तनरतुल्यता प्रसज्येतेति चाह ब्रूमः॥ बुद्धिमद्भिरवराजादिनिरंतरेण
मायाजनं लीलया मृगयादिप्रवृत्तिः क्रियते स्वामी सत्यव्यवहारस्तु सर्वजनीनो व्यर्थचेष्टा
श्री॰

श्च बालकैः क्रियमाणं बकुशोद्दरयंते तद्वन्नित्यतृप्तोपीश्वरः प्रयोजनमंतरेणाप्युन्मत्तः सन्नशे-
शेषं जगत्सृजतु॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति॥ ॥२।१।३२॥ वादत्वाधिकरणमा-
रचयति॥२।१।३॥ [illegible] ॥वैषम्याद्या पतान्नावासुखदुःखवैचित्र्यदतःस्रष्टु-
मा.२ र्विषमईश्वरः स्यान्नैर्घृण्यमप्युपसंहरत॥१॥ प्राण्यनुष्ठितधर्मादिमापेक्ष्येश्वरः प्रवर्त्तत॥ नातो वै-
षम्यनैर्घृण्ये संसारस्य न चादिमात्॥२॥ ईश्वरादेवानत्यंतसुखिनः पश्वादीनत्यंतदुःखि- सृजति
नमनुष्यांश्च मध्यमान् एवं तारतम्य[illegible]नतु कर्षविशेषेषु सुखदुःखे सृजनीश्वरः कथं विषमे
न स्यात् कथं नीचैरप्यत्यंतं तमुद्धृतादेव तिर्यग्जंतुष्वा घरोषं जगदुपसंहरन्निर्घृणो न
ह्रै.२ त्वतात तस्माद्वैषम्यनि[illegible]ण्यप्रसज्येयातां इति प्राप्तसूत्रमः न तावदीश्वरस्य वैषम्यप्रसंगोस्ति ४४
प्राणिनामुत्तमाधमलक्षणवैषम्यतत्तत्कर्मणामेव प्रायाजकत्वात् नचैतावतेश्वर-

स्य स्वातंत्र्यहानिरंतर्यामितया कर्माध्यक्षत्वात् नन्वेवं पतिघटकुटीप्रभातन्यायमापद्येत॥
ह.२ ईश्वरावैषम्यं परि[illegible]र्तुं कर्मणां वैषम्यहेतुत्वमुक्तं पुनरपीश्वरस्य स्वातंत्र्यसिद्ध्यर्थं कर्मनि-
याकमात्वमभ्युपगम्यमाने सत्यं ततो गत्वेश्वरस्यैव वैषम्यहेतुत्वप्रसंगात् नायं दोषः नियाम-
कत्वं नाम तत्तद्वस्तुशक्तीनां अव्यवस्थापरिहारमात्रं शक्तयस्तु मायाशरीरभूताः नतु ताभ्या
उत्पादकईश्वरः ततः स्वस्वशक्तिवशात् कर्मणां वैषम्यहेतुत्वेपि न व्यवस्थापकस्येश्वरस्य
वैषम्यप्रसंगः संहारस्य तु सुषुप्तिवत् दुःखाजनकत्वात् प्रकृतसर्वात्मकत्वानिवर्त्तकत्वात्सष्ठ
ण्वामेवन्नवांतरसृष्टिषु पूर्वपूर्वकर्मापेक्षया सृजतः ईश्वरस्यावैषम्यानाप्यपि प्रथम-
सृष्टौ पूर्वकर्माभावाद्वैषम्यादोषस्तदवस्थ इति चन्न सृष्टेः परंपराया अ[illegible]नादित्वात्तं
तानचादिरित्यादिश्रुतेस्तस्मान्नकोपिदोषः॥ ॥सर्वधर्मोपपत्तेश्च॥ ॥२।१।३५॥ ॥न

ब२

योऽस्याधिकरणमारचयति॥ ॥नास्तिप्रवृत्तिर्नायद्यपिनिर्गुणस्यास्तिनै[illegible]सांख्यादेः सगुण
स्यैवप्रवृत्तिर्व्याप्युपलंभनात॥१॥ अत्रमाधिष्ठानतास्माभिः प्रवृत्तिरुपपेयते। निर्गुणस्यापिजी
त्वादीनांब्रह्मणःप्रवृत्तिःस्मृताः॥२॥ प्रवृत्तिर्वनामकार्याकारेण विक्रियमाणत्वंतच्चलोकेसगु
सू४ णएवमृदादावुपलब्धं अतोननिर्गुणस्यब्रह्मणःप्रवृत्तितातिप्राप्तेब्रूमः॥ यद्यपिप्रक्रियते
नायतिप्रवृत्तिरितिकल्पत्वाविक्रियमाणत्वंप्रतीयात तथापितद्विक्रियमाणत्वंद्वधासंभ
वतिक्षीरादिवत्परिणामित्वेनवारज्ज्वादिवत्स्वमाधिष्ठानत्वेनवा तत्रनिर्गुणस्यपरिणामि
त्वासंभवेपिस्वमाधिष्ठानत्वमस्तुद्रष्टव्यात ह्निनिर्गुणापिजीवात्मादेःस्वमाधिष्ठानतामलिनं
ब्राह्मणंदृष्ट्वाश्रद्धेयमितिव्यवहारदर्शनात तस्मान्निर्गुणमपिब्रह्मप्रवृत्तिरितिसिद्धं॥ ॥ ४५
द्वितीयाध्यायस्यप्रथमःपादः॥ रचनानुपपत्तेश्चनानुमानं॥ ॥२।२।१॥ द्वितीयपादस्यप्र

थमाधिकरणमारचयति। प्रधानंजगतोहेतुर्नवायर्वेघटादय[illegible]सुखदुःखादिर्य बटार
तोऽन्विताःतावदत॥१॥ नाहेतुर्वायर्स्यरचनाग्रहत्वादरसंभवात सुखाद्याश्रांतराबाह्या
[illegible]द्यास्तुकृतोन्वयः॥२॥ सुखदुःखमोहात्मकंप्रधानंजगतःप्रवृत्तिःजगतिसुखाद्यन्वयदर्श
नात घटपटादावाप्युपलभ्यमानाःसुखायभवंतिउदकाहरणप्रावरणादिकार्यकारित्वात तए
वघटादायान्स्थिरपद्धियमाणास्तस्यैवदुःखजनकाः[illegible]कादिकार्यनापहितंतदान
सुखदुःखजनयंतिकेवलंद्रष्टव्यणीयत्वेनावतिष्ठंतेतदिदमुपेक्षाविषयत्वंमोहः॥ इहाविवि
त्वइतिधातोर्मोहशब्दनिष्पत्तेः उपेक्षणीयस्यचविविक्तत्वमुपपद्यात अतःसुखदुःखमोहा
न्वयदर्शनात प्रधानंप्रवृत्तिरितिसांख्या[illegible]मन्यातइतिप्राप्तेब्रूमः॥ नप्रधानंजगतोहेतुःदे
हेंद्रियमहीधरादिरूपस्यविचित्रस्यप्रतिनियतनानासंनिवेशविशेषस्यजगतोर[illegible]चना

यां अचेतनस्य प्रधानस्य योग्यत्वासंभवात् । [illegible] लोके प्र
तिनियतकार्यस्य विचित्रनानाप्रासादादेः रतिबुद्धिमत्कर्तृकत्वोपलंभात् । अस्तां तावदियं रच टी ३
नातत्सिध्यर्था प्रवृत्तिरपि नाचेतनस्योपपद्यते चेतनानधिष्ठितशकटादीनदर्शनात् । अथ
उक्तरूपस्याचेतनस्य प्रवृत्त्यधिष्ठातृत्वमभ्युपगम्यते । तर्हि संगवंशरूपस्य हानाय तत्पसिद्धां
नापत्तिः यदुक्तं सुखदुःखमोहान्विता घटादय इति । तदपि तत्सुखादिनामांतरत्वात् । घटादीनां टी ४
बाह्यत्वात् तस्मान्न प्रधानं जगद्धेतुः ॥ ॥ महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्यां ॥ ॥२२॥ दिति
वाग्गा २ याधिकरणमारचयति ॥ नास्ति किं कारणे दृष्टांतः किं वा स्वप्रसहशो [illegible] वेना स्तिशुक्लः पटः शुक्ल ट्ठ २
तंतुनारब्ध इति जायते ॥१॥ अणुद्व्यणुकमुत्पन्नमनाणोः परिमंडलात् । अदीर्घाद्व्यणुकाद्दीर्घ ४६
च्य एकं तन्निदर्शनं ॥२॥ पूर्वस्मिन्नादाचेतनाद्ब्रह्मणो विलक्षणमाचेतनं जगज्जायते तत्प्रत्यां

स्यान्नप्रतिलोकसिद्धं गामयात्वृश्चिकादिनिदर्शनमभिहितं तावता सांख्यैः क्रियमाणस्याचे
पस्य परिकृतत्वात् स्वपक्षसाधनं संपन्नं परपक्षदूषणं चास्मिन्नादेः प्रक्रमस्य पूर्वाधिकरणे यां
स्वमतं दूषितं इतः परं वैशेषिकमतं दूषयितव्यं तन्मतस्य च प्रक्रिया बहुलत्वात् तद्दोषभना
वायितः शुक्लरूप तत्प्रक्रियासिद्धं विलक्षणोत्पत्तिदृष्टांतमंतरेण ब्रह्मकारणवादं न बहुम
न्यते अतो विसदृशोत्पत्तौ कारणादन्यत्वसिद्धो दृष्टांतोऽस्ति न वेति विचार्यते नास्तीति तावत्
तं ४ प्राप्तं यतः शुक्लः पटः शुक्लेभ्य एव तंतुभ्यो जायते न तु रक्तेभ्यः तस्मान्नास्तीति प्राप्ते ब्रूमः । अ
स्त्येव विसदृशोत्पत्तौ दृष्टांतः तथाहि परमाणवः परिमांडल्यपरिमाणयुक्ताः । न तु अ
णुपरिमाणयुक्ताः द्वाभ्यां च परमाणुभ्यां अणुपरिमाणरहिताभ्यां अणुपरिमाणोपे
तं द्व्यणुकमुत्पद्यते इदमेकं निदर्शनं तथा ह्रस्वपरिमाणोपेतत्वात् दीर्घपरिमाणरहितं द्व

एवं कं ताहृशेभ्यस्त्रिभ्यो द्व्यणुकेभ्यो दीर्घपरिमाणोपेतं अणुपरिमाणरहितं त्र्यणुकमुत्प
द्यत इदमपरं निदर्शनं एवमन्यान्यपि तत्क्रियासिद्धानि निदर्शनान्युदाहर्तव्यानि ॥ ॥
जनयव्यापिन कर्मातिप्लुतदनाव: ॥२२३॥ तृतीयाधिकरणमारचयति ॥ ॥जनयन्तिज
गन्नावा संयुक्ता: परमाणव: । आद्यकर्मजसंयोगाद्व्यणुकादिक्रमाज्जनि: ॥१॥ सनि
मित्तानिमित्तादिविकल्पघाद्यकर्मण: । असंभवाद्संयोगजं नयंति नातजगत् ॥२॥
प्रलीनपूर्वसिद्धजगति यदा महेश्वरस्य सिसृक्षा भवति तदा प्राणिकर्मवशात् निश्चल
परमाणुषु आद्यं कार्मोत्पद्यते तस्मात् कर्मण: एक: परमाणु: परमा[illegible]न्तरेण संयुज्यते । एवं ३
तस्माच्च संयोगाद्व्यणुकमारभ्यते तत्त्रिभ्यो द्व्यणुकेभ्यस्त्र्यणुकमित्यादिक्रमेण कृत्स्नं ५७
जगदुत्पत्तिर्बाधकाभावात् संयुक्ता: परमाणवो जगज्जनयन्तीति आरंभवाद: ॥ यदेतदाद्यं

कर्म अनिमित्तं सनिमित्तं वा अनिमित्तत्वे नि[illegible]यामकाभावात् सर्वदा तदुत्पत्तिप्रलयाभावप्र
संगः । सनिमित्तत्वेपि तन्निमित्तं दृष्टमदृष्टं वा न तावद्दृष्टं प्रयत्न[illegible]स्याभिघातस्य वा शरीरोत्पत्ते: प्रा तन्२
गसंभवात् ईश्वरप्रयत्नस्य च नित्यस्य कादाचित्काद्यकर्मोत्पत्तिं प्रति अनियामकत्वात् ना
५८ प्यदृष्टमाद्यकर्मनिमित्तं आत्मसमवेतस्यादृष्टस्य परमाणुभि: संबंधात् अत एवं विकल्पादा
द्यसंभवात् आद्यकर्मासंभवात् न परमाणुसंयोगो जायते तत: संयुक्ता: परमाणवो ज
गज्जनिरिति मतं दूरापास्तं ॥ ॥समुदायं जनयन्देतुकल्पितदभ्रान्ति: ॥ ॥२२४॥ ॥चतुर्था
धिकरणमारचयति ॥ समुदायात्तु लोमुक्तो अमुक्तो वाणुहेतुक: ॥ एको परस्कंधहेतुरित्ये
वं युज्यते द्वयं ॥१॥ स्थिराचेतनराहित्यात् स्वयं वा चेतनं च त: । नस्कंधानामणूनां वा समुदायो
न युज्यते ॥२॥ बाह्यास्तित्ववादिनो बौद्धा मन्यंते द्वौ समुदायौ बाह्यो अन्यंतराश्चेति तत्र

बाह्यो भूतनदीसमुद्रादिकः। आंतरश्च चित्तचित्तात्मकः तदेतत्समुदायद्वयमेवाशेषं जगत् त
त्र बाह्यसमुदायस्य परमाणवः कारणं ते च परमाणवश्चतुर्विधाः केचित्परमाणवः पार्थि स्वरा
वाख्याः अपरे स्निग्धा आप्याख्याः अन्ये चोष्णास्तैजसाख्याः अन्ये चलनात्मका वायवीयाः
तेभ्यश्चतुर्विधेभ्यः परमाणुभ्यो युगपत्पुंजीभूतेभ्यो बाह्यसमुदायो जायते आंतरस्य समु
दायस्य स्कंधपंचकं कारणं। रूपस्कंधो। विज्ञानस्कंधो वेदनास्कंधः संज्ञास्कंधः संस्कारस्कंध
श्चेति पंचस्कंधास्तत्र चित्तेन निरूप्यमाणाः शब्दस्पर्शादयो रूपस्कंधः। तदहमित्यभिव्यक्तिर्विज्ञानस्कं
ऊ धः। तत्र सुखदुःखे वेदनास्कंधः देवदत्तादिनामधेयं संज्ञास्कंधः॥ एतेषां वासना संस्कारस्कं
२. धः। तेभ्यः पंचस्कंधेभ्यः पुंजीभूतेभ्य आंतरः समुदायो जायते तस्मादुच्यते समुदायो द्व ४८
यमिति प्राप्ते ब्रूमः। किमणूनां च स्कंधानां च संघातो प्रवर्तो निमित्तं चेतनो नास्ति किं वा स

यमेव संहन्यंते आद्येपि स चेतनः स्थायी क्षणिको वा स्थायित्वे ऽपसिद्धांतः। क्षणिकश्चेत्स्वय म
लब्धात्मकः पश्चात्संघातापत्तिं करोतीति वक्तुमशक्यं। द्वितीये त्वचेतनाः स्कंधाः अणवश्च
नियामकं चेतनमंतरेण प्रतिनियताकारणा कथं संहन्यंते तस्मान्नयुक्तं समुदायद्वयं॥ ॥
नाभाव उपलब्धेः॥ ॥२५॥ पंचमाधिकरणमारचयति। विज्ञानस्कंधमात्रं बौद्धैरुच्यते वान उ
५ व युज्यते युज्यते स्वप्नदृष्टांताद्बुद्धिर्वाह्यव्यवहारतः॥१॥ अबाधात्स्वप्नवैषम्याद्बाह्यार्थस्योप
कृ४ लम्भता बुद्धिर्वेदितेति तत्तु क्लिन्नता धीरर्थरूपभागिति॥२॥ केचिद्बौद्धा बाह्यार्थमपलप्य तो
विज्ञानमात्रं तत्त्वमालंबनमित्याहुः न चात्र व्यवहारानुपपत्तिः स्वाप्नबाह्यपदार्थाननपे
क्ष्य केवलया बुद्ध्या व्यवहारदर्शनात् तथैव जाग्रद्व्यवहारस्याप्युपपत्तेः तस्माद्विज्ञानस्कंध
मात्रं युज्यत इति प्राप्ते ब्रूमः। विषमो हि स्वप्नदृष्टांतः प्रबोधदशायां स्वप्नस्य बाध्यमान

वात्।जाग्रद्दशाव्यवहारस्यनकश्चिद्बाधंपश्यामः।नचबाह्यार्थस्याभावेप्रमाणाभावःउपलब्धेरेव
प्रमाणत्वात्।उपलभ्यंतहियदाकारोबहिष्टेवनत्र[illegible]थाचोक्तंबुद्धिरेवबाह्यघटादिवद्वभा
सतेतथाचाद्वयंदंताईयंतन्वंतांबुद्धिर्वेदवभासतेइतिएवंतर्हिउक्तिरेवबाह्यार्थस्य
त्वप्रमाणमितिब्रूमः।क्वचिदपिबाह्यार्थस्याभावादिज्ञानमात्रत्वंनयुक्तंनिकस्मिन्नर्थेनवात्
२२९॥ ॥षष्ठाधिकरणमारचयति।त्रिभिःसप्तपदार्थानांसप्तभंगीनयान्नवा॥साधकस्य
यस्याभावात्तेषांसिद्धिःकिमकृतं॥१॥एकस्मिन्सदसत्वादिविरुद्धप्रतिपादनात्।अपन्याय
सप्तभंगीनचजीवस्यप्रमांचतेति॥२॥अत्रार्हतामन्यंतजीवोजीवश्चेतिद्वौपदार्थौजीवश्चे ध९
तनःशरीरपरिमाणः[illegible]सावयवः।अजीवःषड्विधः।तत्रमहीधरादिरकः।आस्रवसंवर[illegible]
निर्जरबंधमोक्षाख्याःपंच।आस्रवत्यानेनजीवोविषयेष्वितिआस्रवः।इंद्रियसंघातः।संव

णातिविवेकमित्यविवकादिसंवरः।निश्शेषेणजीर्यत्यनेनकामक्रोधादिरितिकेशोल्लुंछनतप
शिलारोहणादिकंतपो।निर्जरःकर्माष्टकेनेपादितान्जन्ममरणपरंपराबंधःचत्वारिघाति[illegible]कु
र्माणिपापविनाशस्वरूपाणिचत्वार्यघातिकर्माणिपुण्यविशेषरूपाणिशास्त्रोक्तोपायेनतेभ्यो
ष्टभ्यःकर्मभ्योविनिर्गतस्यजीवस्यसंततोर्ध्वगमनंमोक्षः।तएतेसप्तपदार्थाःसप्तभंगीरूपेण
न्यायेनव्यवस्थाप्यंते।स्यादस्तिचानास्तिस्यादस्तिचनास्तिचास्यादवक्तव्यः।स्यादस्तिचाव
क्तव्यश्चास्यान्नास्तिचावक्तव्यश्चास्यादस्तिचनास्तिचावक्तव्यश्चेतिसप्तभंगिनयः।अस्याय
मर्थः।स्याच्छब्दईषदर्थवाचीनिपातः।प्रतिवादिनांहिचतुर्विधाः।सद्वादिनाऽसद्वादिनःसदस
द्वादिनानिर्वचनीयवादिनाश्चेति।पुनरप्यनिर्वचनी[illegible]चनमिश्रितानित्यसदादिमतानीतित्रिवि सद
धवादिनःतानतान्सप्तविधान्वादिनःप्र[illegible]तिस्म[illegible]वि[illegible]न्यायाःशयाकृत्वाःतद्यथास्याद्वादी

समागत्यार्हतं प्रति किंचन्मनेमोद्योक्ती तिष्ठति तत्रार्हतउभारं ब्रूते॥ ईषदस्तीति एवमन्यानपि
स्या॰ वादिनः प्रतिनास्तीत्यादीन्युदाहरणानि उदाहर्तव्यानि तावतानिवादिनः सर्वेनिर्विण्णाः संतोनो
त्तरं प्रतिपद्यंते आतोस्य सप्तभंगीरूपस्यन्यायस्य पक्षावा जीवादीनां सप्तपदार्थानां सिद्धोकि
मत्राश्चर्यमिति प्राप्ते ब्रूमः॥ सप्तभंगीरूपोयमन्यायः एकस्य जीवपदार्थस्य सत्वादिनं प्रतिसद्रू
पत्वं सत्वादिनं प्रत्यसद्रूपत्वं चेत्येवमादिविरुद्धधर्मप्रतिपादकत्वात्॥ न च जीवस्य सावयव
त्वं युज्यते। नित्यत्वप्रसंगात्॥ तदनित्यत्वे च मोक्षः कस्य पुरुषार्थः स्यात् तस्मान्न्यायानास्त्येनसम
ञ्जस्येन जीवादिपदार्थानां न सिद्धिः॥ ॥पत्युरसामंजस्यात्॥ ॥२७॥ सप्तमाधिकरणमा
यतेरचयति॥ तटस्थेश्वरवादोयं युक्तो थ न युज्यात पुरुषकुलालदृष्टांतान्नियंतृत्वस्यपरंजनवात्। ५०
२॥ नयुक्ता विषमवादिदोषाद्धिदिकईश्वरो। अस्त्रापात तटस्थत्वं त्याङ्प्रकृतिविराधनतःइति॥

तप्या३

१॥ पूर्वाध्यायस्योपांत्याधिकरणे जगतो निमित्तमुपादानं च परमेश्वरः इत्यागमबलादुक्तं तदे
तदसहमानास्तार्किकशैवादयः केवलनिमित्तत्वमीश्वरस्य मन्यंते तद्युक्तिं चाहुः। यथा कुलालो
घुपादानं मृत्तो दंडचक्रादीनि नियच्छन् कर्ता भवति तटस्थ ईश्वर इति प्राप्ते ब्रूमः नयुक्ता केवलनि
मित्तत्वे वैषम्यनैर्घृण्यादिदोषस्य दुःपरिहरत्वात् कथं तर्हि वैषम्यपरिहारो नादोष इति चेत् प्राणिकर्म
सापेक्षत्वादिति ब्रूमः॥ तथात्वे चागमोस्माकं प्रमाणं॥ तथाप्यनंतोगवागमप्रदंगीक्रियाततट
स्थत्वमीश्वरस्य परित्याज्यं स्यात् बहुस्यां प्रजायेयेत्युपादानत्वश्रुतिविरोधात्॥ तस्मान्नयुक्तं केवलत
टस्थेश्वरवादः॥ ॥उत्पत्त्यसंभवात्॥ ॥२८॥ अष्टमाधिकरणमारचयति॥ जीवोत्पत्त्यादि
कं पांचरात्रोक्तं युज्यात न वा। युक्तं नारायणव्यूहतत्समाराधनादिवत्॥१॥ युज्यतामविरोधि
त्वाज्जीवोत्पत्तिर्न युज्यते॥ उत्पन्नस्य विनाशित्वे कृतनाशादिदोषतः॥२॥ पांचरात्रिकानागव

तामप्यंगानां भगवानेको वासुदेवो जगत उपादानं निमित्तं च तत्समाराधनध्यानज्ञानैर्भवबंधवि
च्छेदः तस्माद्वासुदेवात्संकर्षणाख्यो जीवो जायते जीवात्प्रद्युम्नाख्यं मनः मनसोऽनिरुद्धाख्यो
हंकारः त एते वासुदेवादयश्चत्वारो व्यूहाः सर्वात्मका इति तत्र वासुदेवतत्समाराधनादिकं च श्रु
त्यविरोधादभ्युपगच्छामः यत्तु जीव उत्पद्यत इत्युक्तं तदसत् तनाशात्कृतान्यागमप्रसंगात्॥
पूर्वसृष्टौ यो जीवस्तस्मिन्नुत्पन्ने मध्ये न प्रलयदशायां विनष्टे पतिते तत्कृतयोर्धर्माधर्मयोरफ
लप्रदत्वेन विनाशः प्रसज्येत। अस्मिंश्च कल्पे उत्पद्यमानस्य नूतनजीवस्य धर्माधर्मयोः पूर्वम
रू २ ननुष्ठितयोः सतोरपि सुखदुःखप्राप्तिर्भवतीत्यकृताभ्यागमः प्रसज्येत तस्माज्जीवोत्पादि ट २
कं न युक्तम्॥ ॥इति श्रीमद्वैयासिकन्यायमालायां द्वितीयस्य द्वितीयपादः॥ ॥न वियदश्रुतेः॥ तृतीयपा ५१
दस्य प्रथमाधिकरणमारचयति॥ व्योम नित्यं जायते वाद्यत्रयविवर्जनात् जनिश्रुतेस्त्वाग

मालायां द्वितीयाध्या २

ण वा नित्यं व्योम न जायते॥१॥ एकज्ञानात्सर्वबुद्धेर्विभक्तत्वाज्जनिश्रुतेः विवर्त्तकारणाद्ब्र
ह्मणो व्योम जायते॥२॥ तैत्तिरीयके तस्माद्वा एतस्मादात्मन आकाशः संभूत इति श्रूयते नाकाशं
नित्यं न तु जन्मवत् कुतः आकाशोत्पादकस्य समवाय्यसमवायिनिमित्ताख्यकारणत्रयस्य
दुःसंपादत्वात्। संभूत इति जनिश्रुतिस्तु संप्रतिपन्नब्रह्मकार्यवाय्वग्निसहपाठाश्रयत्वगुणयो
गात्स्वहत्ता तस्मादनाद्यं तं व्योम न जायत इति प्राप्ते ब्रूमः॥ एकविज्ञानेन सर्वविज्ञानं तावदशे
षु वेदांतेषु डिंडिमः॥ तच्च व्योम्नो ब्रह्मकार्यत्वे घटस्यापि न ब्रह्माव्यतिरेकात् उपपादयितुं श
वि ३ क्यं नान्यथा॥ किंचाकाशं जायते विभक्तत्वात् घटवत् न चायमसिद्धो हेतुः वाय्वादिविलक्षणस्या
काशस्य प्रसिद्धत्वात्। नापि ब्रह्मण्यनैकांतिकत्वं सर्वात्मकस्य ब्रह्मणः कस्माच्चिद्विभक्तत्वेनानु
णत्वात्। जनिश्रुतिश्चोत्पत्तिवादिन्यनुग्रहीता न वनियतेतु कारणत्रितयासंभव इत्युक्तं तदसत्

तस्मारंभवादे त्रितयापेक्षायामपि विवर्त्तवादे तदनपेक्षत्वात् [illegible]स्मादेतेभ्यो हेतुभ्यो ब्रह्मणः का
र्यं व्योम जायते॥ ॥एतेन मातरिश्वा व्याख्यातः॥२।३।८॥ ।द्वितीयाधिकरणमारचयति॥ वा
युर्नित्यो जायते वा छांदोग्ये ऽजन्यकीर्त्तनात्। सैषानस्तमिता देवतेत्युक्तेश्च न जायते॥१॥ अमृत
तापसंहाराजिष्ण्यनस्तमयश्रुतिः। वियद्वज्जायते वायुः स्वरूपं ब्रह्मकारणमिति॥२॥ नैत्ति
रीय एवाकाशाद्वायुरिति श्रूयते। स यच्चुत्पत्तिर्गौणी छांदोग्ये सृष्टिप्रकरणे तेजोबन्नानामे
वोत्पत्त्यभिधानाद्वायो[illegible]त्पत्त्यनभिधानान्न तु क्वचिदश्रवणमन्यत्र श्रुतं न वारयितुमुत्सहते इ
ति न्यायेन तैत्तिरीय[illegible]श्रुतेः उक्ता गौणत्वमिति चेत् अत्यंतरविरोधादिति ब्रूमः॥ बृहदारण्यके
सैषानस्तमिता देवता यद्वायुरिति वायोर्विनाशप्रतिषेधात् उत्पत्तिमत्त्वे च तदयोगात्॥ त ५२
स्मान्न जायते वायुरिति प्राप्ते ब्रूमः॥ छांदोग्ये जन्माश्रवणेपि गुणोपसंहारन्यायेन तैत्तिरी

यवाक्यस्थेतरत्रोपसंहारसत्तिः छांदोग्ये वायुजन्म। अनस्तमयश्रुतिस्तु नमुख्या उपासनप्र
करणे पठितत्वेन स्तुत्यर्थत्वात्। आकाशोत्पत्तिहेतवश्चात्रानुसंधेयाः। न च वायोराकाशका
र्यत्वे न ब्रह्मण्यं नं तर्ह्यं वा ब्रह्मज्ञानेन वायुज्ञानं न सिध्यदिति शंकनीयं पूर्वपूर्व कार्यवि
शिष्टस्य ब्रह्मणः उत्तरोत्तरकार्यहेतुत्वस्य वक्ष्यमाणतया वियत्त्वुपापन्नस्य ब्रह्मण एव वायुका
रणत्वात् तस्माद्वायुर्जायते॥ ॥असंभवस्तु सतोऽनुपपत्तेः॥ ॥२।३।९॥ तृतीयाधिकरण
मारचयति॥ ॥सद्ब्रह्म जायते नो [illegible] वा कारणत्वेन जायते॥ यत्कारणं जायते तद्वियद्वायु
दायायथा॥१॥ अस्यात्ताकारणत्वेन खादीनां सद्भवात्। [illegible]घटजादिवाक्येन बाधात्सन्नै
व जायते॥२॥ छांदोग्ये सदेव सोम्येदमग्र आसीदिति श्रूयते तत्सद्रूपं ब्रह्म जन्मवद्भवितुम
र्हति कारणत्वात् वियदादिवत्। इति प्राप्ते ब्रूमः॥ सद्रूपं ब्र[illegible]न जायते कुतः। तज्जन्मस्य न १

कारणस्यदुर्निरूपत्वात्। तथाहि नतावदस्यकारणंकश्च मस्मतः सजायेतेतिनिषेधात् ना
पिसदेवमतः कारणमात्माश्रयापातः नापिवियदादिकं यतः कारणंवियदादीनां ततः स्वतोजा
यमानत्वात्। यातु व्याप्तिः अद्यकारणंतत्तज्जायत इतिसास्ववाएव महानजश्चात्मेत्यादिश्रु
दु ४ तिबाध्यमतस्मात्सूक्ष्मेव नजायत॥ ॥तेजोतस्तथाह्याह॥ ॥२३४॥ चतुर्थाधिकरणमार
चयति॥ ब्रह्मणोजायतेवह्निर्वायोर्वाब्रह्मसंयुतात्। तत्तेजोसृजतेस्तुकेवलब्रह्मणोजायतेऽन
लः॥१॥ वायोरग्निरितिश्रुत्यापूर्वश्रुत्येकवाक्यतः॥ ब्रह्मणोवायुरूपत्वमापन्नादग्निसंभव
इति॥२॥ छांदोग्येतत्तेजोसृजतेतितेजसोब्रह्मजत्वंश्रूयतेतैत्तिरीयकेवायोरग्निरितिवा
२ वा युजत्वंतत्रयोरितिपंचम्याआनंतर्यार्थकस्यापिसंभवात् केवलब्रह्मजन्यंतेजइतिप्राप्तेब्रूमः। ५२
अनुवर्तमानेनसंभूतस्मादित्यनेनान्वितायावायोरितिपंचम्याउपादानार्थत्वस्यैवमुख्यत्वात्तेजोवायो

३१

दु ३

श्रुत्योरेकवाक्यत्वेसतिवायुरूपापन्नाद्ब्रह्मणस्तेजोजायतइतिलभ्यते॥ ॥आपः॥२३५॥
पंचमाधिकरणमारचयति। ब्रह्मणोपांजन्मकिंवावह्नेर्नाग्नेर्जलोद्भवः। विरुद्धत्वान्नीरजन्म
ब्रह्मणःसर्वकारणात्॥१॥ अग्नेरापइतिश्रुत्याब्रह्मणोवह्न्युपाधिकात्॥ अपांजन्मविरो
धस्तुसूक्ष्मयोर्नाग्निनीरयोरिति॥२॥ यद्यपितदपोसृजताग्नेरापइत्युक्तयोश्छांदोग्यतैत्ति
रीययोरपांजन्मतेजसःश्रूयतेतथापितद्युक्तंनिवर्त्यनिवर्तकयोरग्निजलयोर्विरुद्धयो रोधे
र्नाहेतुहेतुमद्भावइतिपूर्वपक्षः॥ पंचीकृतयोर्दृश्यमानयोर्वि[stain]पिअपंचीकृतयोःसूक्ष्मयो
र्मिथोगमय्याविरोधकल्पना। योगात्संतापाधिक्येस्वेदरूपजलदर्शनाच्चश्रुतिद्वयानुसारेण
तेजोरूपापन्नाद्ब्रह्मणोपांजनिरितिसिद्धांतः॥ ॥पृथिव्यधिकाररूपशब्दांतरेभ्यः॥ ॥२३६॥
षष्ठाधिकरणमारचयति। ताअन्नमसृजंतेतिश्रुतमन्नंयवादिकंपृथिवीवायवाद्येवलोके

न्नवै प्रसिद्धिः ॥११॥ भूताधिकाराद्रूपस्य रूपस्य श्रवणादपि तथाद्भ्यः पृथिवीत्युक्तेरन्नं ... न
हेतुन इति ॥१२॥ छांदोग्ये ता अन्नमसृजन्त अन्नस्य जन्म श्रूयते तत्रान्नशब्दस्य लोकप्रसिद्ध
व्रीहियवादिकमर्थ इति प्राप्ते ब्रूमः ॥ पृथिव्यन्नशब्दार्थः कुतः पंच महाभूतसृष्टेरधिकृतत्वा
त् किं च यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति कृष्णं रूपं पृथिव्या
बहुलमुपलभ्यते न तु व्रीहियवादीनां अद्भ्यः पृथिवीति तैत्तिरीयश्रुत्यैकवाक्यत्वाच्चान्नं
पृथिवी न चान्नशब्दस्य तत्र प्रवृत्त्यनुपपत्तिः कार्यकारणयोरन्नपृथिव्योरभेदविवक्षया तदु
पपत्तेः तस्मादन्नं पृथिवी ॥ ॥तदभिध्यानादेव तु तल्लिंगात्सः ॥१३॥ सप्तमाधिकरणमारचय
ति ॥ व्योमाद्याः कार्यकर्त्तारो ब्रह्म वा तदुपाधिकं । व्योम्नो वायुर्वायुतोऽग्निरित्युक्तेः खादिकर्तृता ॥ ५८
२१॥ ईश्वरोऽन्तर्यमयतीत्युक्तेर्व्योमाद्युपाधिकं । ब्रह्म वाय्वादिहेतुः स्यात्ते... दीक्षणादपीति ॥२

जन्मा ।

कातब्र

द्यो ।

त्वोधिकरणे पूर्वपूर्वकार्योपाधिकात् ब्रह्मण उत्तरोत्तरकार्योत्पत्तिरिति यदेतत् सिद्धवत्कृत्य सि
द्धांतितं तदयुक्तं च आकाशाद्वायुर्वायोरग्निरित्यादौ ब्रह्मनिरपेक्षकेवलाकाशादेः उत्तरोत्तरका
र्योत्पत्तिश्रवणादिति प्राप्ते ब्रूमः । आकाशमंतरो यमयति यो वायुमंतरो यमयतीत्यादिनां त
र्यामिब्राह्मणे व्योमादेः स्वातंत्र्यं निवारितं । तथा तत्तेज ऐक्षत ता आप ऐक्षंतेति तत्र आदी
क्षणपूर्वकं सृष्टृत्वं श्रूयते । तच्चेक्षणं चेतनं ब्रह्म निरपेक्षाणामचेतनानां न संभवतीति त
स्माद्व्योमाद्युपाधिकस्य ब्रह्मण एव कारणत्वं ॥ ॥विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ ॥१४॥ अ
ष्टमाधिकरणमारचयति ॥ सृष्टिक्रमो लये ज्ञेयो विपरीतक्रमोऽथवा ॥ त्वेषं कल्प्याहूरायनेते
न सृष्टिक्रमो भवेत् ॥१॥ दृष्टा वस्थतिकार्यस्य न सत्वं युज्यते ततः । पृथिव्या...तिचाव्यत्वाद्विप
रीतः क्रमो लये ॥२॥ आकाशादिक्रमः सृष्टौ श्रुतः अतः प्रलयेऽपि स एव क्रम इति प्राप्ते ब्रूमः । प्रथ

मतः कारणे लीने स्थिति निरूपादानानां कार्याणां किंचित्कालमवस्थानं संभवत्येन किंच जगत्प्रति
ष्ठादेवार्षपृथिव्यप्सु प्रलयात्। ज्योतिष्याप[ः] प्रलीयंत ज्योतिर्वायो प्रलीयत इति पुराणे विपरी
तक्रमस्योक्तत्वाच्च स एवायं क्रमः। तस्मात्सृष्टिविपरीतेन पृथिव्यादिक्रमेण लयः॥ अंतराविज्ञा
३५ नमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्॥ ॥२३॥ ॥नवमाधिकरणमारचयति॥
२ किमुत्क्रमभंगोऽस्ति प्राणाद्यैर्नास्ति वास्ति हि। प्राणादमनसां भूतवियतोर्मध्यईरणात्॥
१॥ प्राणाद्यानीतिकाच्चूतयंतर्भूताः पृथक्क्रमः। निवं तेनोत्क्रमभंगोऽस्ति प्राणादीनुक्रमः स्मृत इति।
२॥ मुंडके श्रूयते। एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्व
स्य धारिणी॥ इति तत्र प्राणादीनां वियदादिभ्यः पूर्वं श्रूयमाणत्वात् आकाशादिकः पूर्वोक्तः ५५
सृष्टिक्रमो भज्यतेति प्राप्ते ब्रूमः॥ अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागि

तिप्राणादीनां लिनोतिकत्वश्रवणात् भूतेष्वंतर्भावनपृथक्क्रमो नापेक्षितः न च मुंडकश्रुतिः क्रमवा
चिनी आकाशाद्वायुर्वायोरग्निरित्यादाविव क्रमस्य प्रतीयमानत्वात्॥ उत्पत्तिमात्रं केवलं श्रू
ततस्मात्रानयाश्रुत्या सृष्टिक्रमभंगोऽस्ति॥ ॥चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्त
स्तद्भावभावित्वात्॥२३१०॥ दशमाधिकरणमारचयति। जीवस्य जन्ममरणे वपुषो वाऽम्ने हि ते ॥
× जाते मे पुत्र इत्युक्तिर्जातकर्म च लोकतः। जीवापायेति शास्त्रतः इति ॥२॥ लोकजातो मे पुत्र
व्यवहारात् शास्त्रे जातकर्मादिसंस्काराद्विधाच्च जन्ममरणे जीवस्येति प्राप्ते ब्रूमः॥ जीवस्य मुख्ये जन्म
मरणे नांगीकार्ये कृतनाशाकृताभ्यागमप्रसंगस्य दुर्वारत्वात् देहगते एव जन्ममरणे जीवेऽपचर्ये वस्यो
ते औपचारिके एव ते आपेक्ष्य लोकव्यवहारकर्मशास्त्रयोः प्रवृत्तिः। उपनिषच्छास्त्रं तु जीवापे
तं वाव किलेदं म्रियते न जीवो म्रियत इति जीवविमुक्तस्यैव शरीरस्य मुख्यं मरणमभिधाय
× कर्मादितस्तथा। मुख्यते वपुषो नाके जीवास्येते अपेक्ष्य हि जातत्व
मु ह्य

नवा२

जीवस्य तन्निराचष्टे तस्माद्धुत्पद्यो जन्ममरणे॥ ॥नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः॥ ॥२३॥ ॥एका
दशाधिकरणमारचयति। कल्पादौ ब्रह्मणो जीवो वियद्वज्जा[illegible]यताऽथ प्रागद्वयवाक्येन जा
यत विस्फुलिंगवत्॥१॥ ब्रह्माद्वयं जातबुद्धौ जीवत्वेन विशत्स्वयं। उपाधिकं जीवजन्मनि
त्यत्वं वस्तुतः श्रुतं॥२॥ एकमेवाद्वितीयमिति सृष्टेः प्रागद्वयत्वं श्रूयमाणं ब्रह्मव्यतिरिक्तस्य जी
वस्यानुत्पत्तौ नोपपद्यते श्रुतिश्च विस्फुलिंगदृष्टान्तेन जीवस्योत्पत्तिं प्रतिपादयति यथाग्नेः क्षु
द्रा विस्फुलिंगा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूता
नि सर्व एत आत्मानो व्युच्चरन्तीति तस्मात्कल्पादौ वियदादिवद्ब्रह्मणो जीवो जायत इति प्राप्ते ब्रू
मः॥ यदद्वयं ब्रह्म तदेव जातायां बुद्धौ जीवरूपेण प्रविशति तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुते ५९
रतो जीवानुत्पत्तौ नाद्वयश्रुतिविरोधः विस्फुलिंगश्रुति[illegible]पाधिकजन्माभिप्राया प्रत्नानन्य

स्त्रो१

त्व१

याकृतनाशादिदोषप्रसंगस्यो[illegible]चाद्वस्तुतत्वाभिप्रायेणानुनित्यत्वं श्रुतिर्ब्रूते नित्यो नित्यानां चेतनश्चे दै
त्व तनानामिति तस्मा[illegible]ल्पादौ जीवो नोत्पद्यते॥ ॥ज्ञोऽत एव॥ ॥२३॥१८॥ द्वादशाधिकरणमारचयति॥ २
अचिद्रूपोऽथ चिद्रूपो जीवो चिद्रूप ईरणात। चिदभावात्सुषुप्ता[illegible] जाग्रद्विन्मनसा कृता॥१॥ ब्रह्मत्वा
द्एष चिद्रूपस्मिन्सुषुप्तौ न लुप्यते। द्विताद्दष्टिर्द्वैतलोपान्न हि द्रष्टुः श्रुतेरिति॥२॥ तार्किका मन्यन्ते॥ सु
षुप्तिमूर्छासमाधिषु चैतन्याभावादचिद्रूपो जीवः॥ जागरणे चात्ममनःसंयोगात् चैतन्याख्यो गु
णो जायत इति तदसत् चिद्रूपस्य ब्रह्मण एव जीवरूपेण प्रवेशश्रवणात् न चैतन्यं सुषुप्त्यादौ लुप
तत्सुषुप्ता[illegible]दौ द्वैतादर्शनं तीतिरिति चेत् द्वैतलोपादित्ति भ्रमः॥ तथा च श्रुतिः यद्वैतन्न पश्यति पश्यन्वै ति३
तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्ये
दिति अस्यायमर्थः॥ तत्र सुषुप्तो जीवः किमपि न पश्यतीति यल्लोकिकैरुच्यते तदसत् पश्यन्नेव

द्दि२ = साक्षित्वेन अवस्थानात् सुषुप्तौ ३

जीवस्तदानीं न पश्यन्तीति त्वं त्याकेवलं व्यपदिश्यते कथं दर्शनमित्यत्र हेतुरुच्यते ॥ द्रष्टुरात्मनः स्व
रूपभूताया दृष्टेः लोपो न विद्यते विनाशरहितस्वभावत्वात् अन्यथा लोपवादिनोपि तिः साक्षि
कस्य लोपस्य वक्तुमशक्यत्वात् कथं तर्हि लौकिकानां न पश्यतीति भ्रमः उत्पन्न हेतुरुच्यते ब्रह्मत्वे
तत्त्वात् द्रव्यक्रियाकारकफलरूपेण विभक्तं जगदाख्यं यद् द्वितीयं वस्तु तन्नास्ति तस्य स्वकारणे लीन
त्वात् । अतो जागरणादिवद् दृष्टदृश्यपदर्शनव्यवहाराणामभावात् न पश्यतीति लौकिकानां भ्रम इति
तस्माच्चिद्रूपो जीवः ॥ ॥उत्क्रान्तिगत्यागतीनां॥ ॥२।३।१३॥ त्रयोदशाधिकरणमारचयति ॥ जीवो
ऽणुः सर्वगो वास्यादिमोऽणुरिति वाक्यतः ॥ उत्क्रान्तिगत्यागतीनां श्रवणाच्चाणुरेव सः ॥१॥ सानाम
ता२ नुमाणु चेन्न तदुपाधित्वतोऽणुता ॥ जीवस्य सर्वगत्वं तु स्वतो ब्रह्मत्वतः श्रुतं ॥२॥ एषोऽणुरात्मा चेत ५७
सा वेदितव्यः इत्यणुत्वं अस्माच्छरीरादुत्क्रामतीत्युत्क्रान्तिः चंद्रमसमभवात् सर्वे गच्छन्तीति गतिः
श्रुतं

तस्माल्लोकात् पुनरेतीत्यागमनं । न ह्युत्क्रान्त्यादयः सर्वगतस्योपपद्यन्ते मध्यमपरिमाणस्य तदुपपन्ना
त३ वप्यणुत्वश्रुतिर्विरुध्यते अनित्यत्वं दुर्वारं तस्मादणुर्जीव इति प्राप्ते ब्रूमः । चैतन्यप्रतिबिम्बिता बुद्धि
रसर्वगता उपाधिः । जीवस्याणुत्वोत्क्रान्त्यादय उपपन्नाः स्वतस्तु जीवस्य ब्रह्मरूपत्वात् सर्वगतत्वं
स एवं वा एष महानज आत्मा सर्वव्यापी सर्वभूतान्तरात्मा इत्यादौ सर्वगतत्वं श्रुतं तस्मात् सर्वगतो जीवः ॥
कर्ता शास्त्रार्थवत्त्वात् ॥ ॥२।३।१४॥ चतुर्दशाधिकरणमारचयति ॥ ॥जीवः किं कर्ता ऽकर्ता वा धियः क
र्तृत्वसंभवात् ॥ जीवकर्तृतया किं स्यादित्याहुः सांख्यमानिनः ॥१॥ करणत्वान्न धीः कर्त्री यागश्रवणा
ल्लौकिकाः ॥ व्यापारान् विना कर्त्रा तस्माज्जीवस्य कर्तृता ॥२॥ बुद्धेः परिणामित्वेन क्रियादेशात्मकं कर्तृ
त्वं संभवति न त्वसंगस्यात्मन इति यत् सांख्यैरुक्तं तदसंगतं करणत्वेन [illegible] बुद्धेः कर्तृत्वे शा
क्तिर्न कल्पयितुं शक्या । जाग्रदादाववदर्शनात् बुद्धेः कर्तृत्वे करणं तस्य कल्पनीयत्वात् नच मानुक्तत्वे

ति वाच्यं पूर्वकांडोक्तयागादिव्यापाराणामुत्तरकांडोक्तश्रवणादिव्यापाराणां लौकिककृष्यादिव्यापा
राणां कर्तृत्वापेक्षत्वात् तस्माज्जीवः कर्ता॥ ॥यथा च तक्षोभयथा॥ ॥२३४०॥ पंच[stain]दशाधिकरण
मारचयति॥ कर्तृत्वं चैवास्तवं किं वा कल्पितं वास्तवं जपावत्॥ यजेतेत्यादिशास्त्रेण सिद्धस्याबाधित
त्वतः॥१॥ असंगो हीत्यनेन बाधात् स्फटिके रक्तत्ववत्॥ अध्यस्तं धीचक्षुरादिकरणोपाधिसंनिधेरि
ति॥२॥ पूर्वाधिकरणप्रतिपादितस्य कर्तृत्वस्य बाधा न वा वास्तवत्वमिति प्राप्ते ब्रूमः॥ असंगो ह्ययं
पुरुष इति श्रुत्या कर्तृत्वसंयोगो बाध्यते अतो यथा जपाकुसुमसंनिधिवशात्स्फटिके रक्तत्वमध्यस्तं
न्य तथा करणसंनिधिवशात् कर्तृत्वमात्मन्यध्यस्यते॥ ॥परात्तु तच्छ्रुतेः॥२३४१॥ षोडशाधिकरणमारच
३ यति॥ प्रवर्तकोऽस्य रागादिरीशो वा रागतः कृ[stain]दृष्टा प्रवृत्तिर्विषमेशस्येरणान्नृपवत्॥१॥ ५८
सास्यत्वदृष्टिवज्जीवधीशस्याविषमत्वतः॥ रागांतर्याम्यधीनो तदीश्वरोऽस्य प्रवर्तक इति॥२॥ लोके

कृषीवलादीनां रागद्वेषावेव प्रवर्तकौ दृष्टौ तदनुसाराद्धर्माधर्मकर्तृजीवस्यापि तावेव प्रवर्तका
वस्तुपायीश्वरस्य प्रवर्तकत्वे कांश्चिज्जीवान् धर्मे प्रवर्तयति कांश्चिदधर्म इति वैषम्यं दुर्वारं तस्मा
न्नेश्वरः प्रवर्तक इति प्राप्ते ब्रूमः न तावदीश्वरस्य वैषम्यादिदोषप्रसंगः॥ दृष्टिवत्साधारणनिमित्त
त्वात् यथा हि दृष्टेः सस्यानि हृद्धिहेतुत्वेपि व्रीहियवादिवैषम्ये बीजान्येव निमित्तं वा ईश्वरस्य
यथाकथंचिज्जीवाः प्रवर्तनामित्यनुज्ञया साधारणप्रवर्तकत्वेपि न वैषम्यं॥ पूर्वप्रवृत्तकर्मणां वा
सनानां च वैषम्यहेतुत्वात् कर्मणां फलहेतुत्वमेव न कर्मांतरहेतुत्वमिति चेत् सत्यं सुखदुःखस्वरू
पस्य स्वफलस्य प्रदानाय जीवव्यापारयत्तु कर्म स्वपर्यायकर्मांतरमपि निष्पादयत इति दुर्वारं तद्धेतुत्वं
वासनानां तु साक्षादेव कर्महेतुत्वं तथा चेश्वरस्य कुतो वैषम्यप्रसंगः॥ यत्तु रागस्य प्रवर्तकत्वं द
र्शितं तु स्वाहृतं तथास्तु न तावतेश्वरस्याप्रवर्तकत्वहानिः सर्वांतर्यामिण ईश्वरस्य रागस्यापि नियम्य

मानत्वात्तस्मादीश्वरो जीवस्य प्रवर्तक इति॥ ॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादि
त्वमधीयत एके॥ ॥२४७॥ सप्तदशाधिकरणमारचयति। किं जीवेश्वरसांकर्यं व्यवस्था वा श्रुतिद्व
यात्। अभेदात्तद्विषयात्सांकर्यं न निवार्यते॥१॥ अंशोवच्छिन्न आभासस्त्वौपाधिककल्पनैः
जीवेशयोर्व्यवस्था स्याज्जीवानां च परस्परमिति॥२॥ तत्त्वमस्यादिश्रुतिर्जीवेशयोरभेदं प्रतीपा
दयति। आत्मा द्रष्टव्य इत्यादिश्रुत्या द्रष्टृद्रष्टव्यरूपेण भेदः प्रतीयते। तथा च सति भेदश्रुतिबला
त्तावज्जीवो नास्तीत्यपलपयितुमशक्यं। अभेदश्रुत्या चेश्वरात्पृथक्त्वेन व्यवस्थापयितुं न शक्य
न्ते। तस्माद्विद्यमानं जीवस्येश्वरेण सांकर्यं दुर्वारं परस्परं च जीवानामीश्वराभेदद्वारा सांकर्य
मानुषंगिकं। तस्माद्ब्रह्मवादिनो न जगद्व्यवस्था इति प्राप्ते ब्रूमः। यद्यपि गोमहिषवज्जीवेश्वर ५९
योरत्यन्तं भेदो वास्तवो नास्ति तथापि व्यवहारदशायामुपाधिकल्पितं भेदमाश्रित्य शास्त्राणि जी

धा जीवं निरूपयंति। ममैवांशो जीवलोके जीवभूतः सनातन इत्यंशत्वमवगम्यते। स समानः स
न्नुभौ लोकावनुसंचरतीति श्रुतो विज्ञानमयस्य जीवस्य विज्ञानशब्दवाच्यया बुद्ध्या समानपरि
माणत्वनिर्देशात् घटाकाशवदवच्छिन्नत्वं प्रतीयते। एक एव तु भूतात्मा भूते भूते व्यवस्थितः। ए
कधा बहुधा चैव दृश्यते जलचंद्रवदित्याभासत्वमवगम्यते। तस्माच्छ्रुलत्वेन ब्रह्मवादिनो जीवेश्व
रव्यवस्था जीवानां च परस्परं। आनकजलपात्रस्थबहुसूर्यप्रतिबिंबव्यवहारव्यवस्थावत्तरा
मुपपद्यते। तस्मान्नाकोपि दोष इति सिद्धं॥ ॥इति वैयासिकन्यायमालायां द्वितीयाध्याय
पाद स्य तृतीयः पादः॥ तथा प्राणाः॥ २५०॥ चतुर्थस्य प्रथमाधिकरणमारचयति। किमिंद्रियाण्यना
दीनि सृज्यंते वा परात्मना। सृष्टेः प्राग्ऋषिनाम्नैषां सद्भावोक्तेरनादिता॥१॥ एकबुद्ध्या सर्वबुद्धेर्भौ
तिकत्वाज्जनिश्रवात्। उत्पद्यंते तत्सद्भावः प्राग्वांतरसृष्टिवत्॥२॥ इति द्वषायावावर्तेप्रसदा
सीत

कतेऋषय इति प्राणा वा ऋषय इत्युपक्रम्य श्रुतेः सर्वमिंद्रियाणां सृष्टेर्विगमात् अनादित्वं तेषामिति प्रा
प्ते ब्रूमः ॥ एकविज्ञानेन सर्वविज्ञानं तावदिंद्रियाणां अनुत्पत्तौ न घटते तथान्नमयं हि सोम्य मन
आपोमयः प्राणस्तेजोमयी वागिति च श्रुतं कार्यत्वमिंद्रियाणां श्रूयते एतस्माज्जायते प्राणो मनः
सर्वेंद्रियाणि चेति स्पष्टमेवेंद्रियाणां जन्मश्रवणं ॥ यत्तु सृष्टेः प्राक् सत्त्वावबोधकं तदवांतरसृष्टि
विषयं व्याख्येयं तस्मादिंद्रियाणि परस्मादुत्पद्यंते ॥ ॥ सप्तगतेर्विशेषितत्वाच्च ॥ ॥२४२॥ द्वि
तीयाधिकरणमारचयति ॥ सप्तैकादश वाक्षाणि स्युः प्राणा इति शंकातः ॥ सप्त स्युर्मूर्द्धनिष्ठेषु छिद्रे
षु च विशेषणात् ॥१॥ अशीर्षण्यस्य हस्तादेरपि वादसमीरणात् ॥ ज्ञेयान्येकादशाक्षाणि तत्र का
र्यानुसारत इति ॥२॥ सप्तैवेंद्रियाणि यतः सप्त प्राणाः प्रभवंतीति सामान्यश्रुतेः सप्त वै शीर्षण्याः ६०
प्राणा इति शिरोगतसप्तछिद्रनिष्ठत्वेन विशेषितत्वाच्चेति प्राप्ते ब्रूमः ॥ शिरोगतानि सप्त इतराणि

हस्तादीन्यपि वादसमीरणात् हस्तौ वा आदातव्यं चोपस्थ आनंदयितव्यं चेत्यादिना तथा चैवेदं सुखा[illegible] नि
श्रये सति एकादश व्यापाराणां दर्शनश्रवणघ्राणास्वादनस्पर्शनाभिवदनादानगमनानंदविसर्गध्या
नानामुपलंभात्तत्साधनानामिंद्रियाणि एकादशेत्यभ्युपगंतव्यं ॥ ॥ अणवश्च ॥२४३॥ तृतीयाधिक
रणमारचयति ॥ व्यापीन्युत अणूनि वाक्षाणि सांख्या व्यापिनि प्रभुचिरादिति लाभसंभवतत्रादाहकर्मव
श्रे शाद्धावत् ॥ शरीरदेहस्थ इति मन्ना गौणावादस्त्वं समाप्यतां ॥ उत्क्रांत्यादिश्रुतेस्तानि[illegible]निस्फरदर्शना स्यण ५
त् ॥२॥ सर्वगतानामिंद्रियाणां तत्तच्छरीरावच्छिन्नप्रदेशे तु तत्तज्जीवकर्मफलोपभोगाय वृत्तिला
भो भवतीति यत्सांख्यैरुक्तं तदयुक्तं कल्पनागौरवप्रसंगात् देहावच्छिन्नवृत्तिम[illegible]ज्ञागेरवाशेष
व्यवहारसिद्धेः किमनया वृत्तिरहितानां सर्वगतानामिंद्रियाणां कल्पनया ॥ किंच श्रुतिरुत्क्रांतिगत्या
गतीर्जीवस्य प्रतिपादयति ताश्च सर्वगतस्य जीवस्य न मुख्याः संभवंतीति मुख्यत्वसिद्ध्यर्थमिंद्रि

ख्यापाधिःस्वीकृतःयदिसोप्युपाधिःसर्वगतःस्यात्तत्रतदुत्क्रांत्यादयोमुख्याःसंभवेयुः।तस्माद
सर्वगतान्यक्षाणिमध्यमपरिमाणानिवाइत्यस्यचविवक्षायासूत्रकारेणएवशब्दःप्रयुक्तः।।श्रो
त्रस्य।। ।।२४४।।चतुर्थाधिकरणमारचयति।।मुख्यप्राणःस्यादनादिर्जायतेवानजायते।।आ
नीदितिप्राणचेष्टाप्राक्सृष्टेःश्रूयतेयतः।।१।।आनीदितिब्रह्मतत्त्वंप्राक्तत्वात्तन्निषेधनात्।।एत
स्माज्जायतेप्राणइत्युक्तेर्नोजायतइति।।२।।मुखबिलेसंचरन्नुच्छासकारीवायुर्मुख्यःसचें
द्रियवज्जायतेकुतःनासदासीदितिश्रुतेआनीदवातमित्यानीच्छब्देनस्पष्टःप्राक्प्राणचेष्टा
श्रवणादितिप्राप्तेब्रूमः।आनीदित्यत्रनप्राणव्यापारंवक्तिअवातमितितन्निषेधात्।किंतर्हिब्रह्म
सत्त्वमात्रंएवासामन्यदमतआसीदित्यादिभिःसृष्टेःप्रागवस्थाप्रतिपादकश्रुत्यंतरैःसमाना ६१
र्थत्वात्एतस्माज्जायतेप्राणइतिश्रुतिस्तुस्पष्टंप्राणजन्मप्रतिपादयति।तस्मादिंद्रियवत्प्राणो

जायते।। ।।नवायुक्रियेपृथगुपदेशात्।। ।।२४५।।पंचमाधिकरणमारचयति।। ।।वायुर्वा
युक्रियावान्यावाप्राणःश्रुतितोनिलः।।सामान्येन्द्रियवृत्तिर्वासांख्योक्तवदुदीरणात्।।१।।नानि
प्राणोवायुर्नतिर्यग्दाक्षारकताश्रुतेः।।वायुजात्वेनसामान्यवृत्तिर्नोद्दोष[illegible]पातात्।।२।।बा
बाह्यवायुरेवपुरंध्रवत्मुखछिद्रप्रविश्यावस्थितःप्राणनाम्नाव्यपदिश्यतेनतुप्राणोना
मकिंचित्तत्त्वांतरमस्ति।कुतःयःप्राणःसवायुरितिश्रुतेः।अथवापंजरस्थायथावहनःपक्षिणः
स्वयंचलंतःपंजरमपिचालयंति।।एवमेकादशापीन्द्रियाणिस्वस्वव्यापारद्वारादेहंचेष्टयंति।त
त्रादेहचालनाख्यायांसर्वेन्द्रियसाधारणोव्यापारःप्राणोनिष्पत्ति।।तथाचसांख्यैरुक्तं
सामान्यकरणवृत्तिःप्राणाद्यावायवःपंचेतितस्मान्नतत्त्वांतरंप्राणइतिप्राप्तेब्रूमः।।प्राणए
वब्रह्मणश्चतुर्थःपादःसवायुनाज्योतिषाभातीतिश्रुत्यंतरात्चतुष्पाद्ब्रह्मोपासनप्रसंगेना

ध्यात्मिकप्राणस्याधिदैविकवायोश्चानुग्राह्यानुग्राहकरूपेण विभेदस्पष्टमेव निर्दिष्टः॥ अ
तोऽयं प्राणः स वायुरिति एकत्वश्रुतिः कार्यकारणयोरभेदहत्यानेतव्या॥ यत्तु सांख्यैरुक्तं तद
सत् इन्द्रियाणां सामान्यवृत्त्यसंभवात्। पक्षिणां तु सामान्यचलनान्येकविधानि पंजरचालनस्या
दे नुकूलानि न चैत[दि]न्द्रियाणां दर्शनश्रवणगमनादिव्यापारा एकविधाः। नापि देहचालनानुकू
अणुश्च लाः तस्मात्तत्त्वांतरं प्राण इति परिशिष्यते॥ ॥छ॥ ॥२।४।६॥ षष्ठाधिकरणमारचयति॥ प्राणोऽयं वि
4 भुरल्पो वा विभुः स्यात् प्लुष्याद्युपक्रमैः। हिरण्यगर्भपर्यंतसर्वदेहसमोक्तितः॥१॥ समष्टिव्यष्टि
रूपेण विभुस्तेषाधिदैविकी॥ आध्यात्मिकोऽल्पः प्राणः स्याद् दृश्यस्तु श्वयथेन्द्रियं॥२॥ प्लुषिर्नाम
मशकादपि सूक्ष्मकायस्तन्निकाख्यो जीवः। तमारभ्य सर्वात्मकहिरण्यगर्भपर्यंतसर्वदेहेषु ६२
ति श्रुतिः। समश्च प्राणस्य स्भूयात समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभि

र्लोकैः समोऽनेन सर्वेणेति तस्माद्व्यापी प्राण इति प्राप्ते ब्रूमः। आधिदैविकस्य हिरण्यगर्भप्राणस्य
समष्टिरूपेण व्यष्टिरूपेण चावस्थानात् द्वित्वमस्तु वायुरेव व्यष्टिर्वायुरेव समष्टिरिति श्रुतेः। तदे
व विभुत्वं समः प्लुषिणेत्यादिश्रुतौ उपासनार्थं प्रपंचितं। आध्यात्मिकस्तु प्राण इन्द्रियवद् दृश्यः स्यात्प
तं रिच्छिन्नश्च॥ ॥ज्योतिराद्यधिष्ठानं तु तदामननात्॥२।४।१४॥ सप्तमाधिकरणमारचयति॥ स्वतंत्रा देवतं
त्रा वागाद्यास्तु स्वतंत्रता। न चेद्वागादिजो भोगो देवानां स्यात्तथात्मनः॥१॥ ऋतमस्यादितंत्रत्वं नो
गास्यादेस्तु नाचितः। देवाद् देहेषु सिद्धो जीवो भुंक्ते स्वकर्मणा॥२॥ वागादीन्यक्षाणि स्वस्वविष
यस्वातंत्र्येण प्रवर्तितं न तु देवतापरतंत्राणि। अन्यथा वागादिजन्यस्य भोगस्य देवानां भोक्तृत्वात्
न जीवात्मनो भोगः स्यादिति प्राप्ते ब्रूमः। अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादौ वागादीनामस्याधिष्ठ
तत्वं श्रूयते अतो देवपरतंत्राणीन्द्रियप्रवृत्तिः। न चैवं देवानामत्र भोक्तृत्वं महापुण्यफलं देव

वं प्राणानां अधमभोगस्यानुचितत्वात् देवतानां देहेषु परमभोगस्य सिद्धत्वात् मनुष्यादिजीवस्तु देव
ताशरीरेष्वपि द्विपादितं भोगं स्वकर्मफलत्वाद्भुंक्त इत्युपपद्यते तस्माद्देवतापरतंत्राणींद्रियाणि ।
त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ ॥२४८॥ अष्टमाधिकरणमारचयति ॥ ॥प्राणस्य वृ
४८ त्तयोऽक्षाणि प्राणात्तत्त्वांतराणि वा । तद्रूपत्वश्रुतेः प्राणनाम्नोक्तत्वाच्च वृत्तयः ॥ १ ॥ श्रमाश्रमादिभेदो
क्तेर्गौणे तद्रूपनामनी ॥ आलोचकत्वेनान्यानि प्राणेभ्योऽक्षाणि तत्त्वतः ॥ २ ॥ वागादीन्यक्षाणि मु
ख्यप्राणस्य वृत्तयो भवितुमर्हन्ति कुतः तेषां प्राणरूपत्वश्रवणात् । एतस्यैव सर्वे रूपमभवन्निति
श्रुतेः । किंच प्राणशब्देनैवैतानि लोके व्यवह्रियंते म्रियमाणस्य प्राणा नाद्यापि निर्गच्छंतीत्यादौ ६२
मे श्रुतिश्च वागादीनां प्राणनामतामाह न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसी
त्याचक्षते प्राणा इत्येवाचक्षत इति तस्मात्प्राणवृत्तयोऽक्षाणीति प्राप्ते ब्रूमः ॥ तानि मुख्यप्राणा

न२

मो नोपपद्येत तस्माद्वक्ष्याम्येवाहमेव वागित्यादिना स्वस्वविषयेषु श्रांतिमभिधायैतमेव नाप्नोद्योऽयं म
ध्यमः प्राणो यः संचरंश्चासंचरंश्च न व्यथत इति प्राणस्य स्वव्यापारश्रांत्यभावमाह अयमेको भेदः ।
तथा प्राणसंवादे वागादिनिर्गमनप्रवेशयोर्देहस्य मरणाभावमभिधाय प्राणनिर्गमन
प्रवेशयोः मरणजीवने दर्शयति अत एवमादिभिर्भेदोक्तेर्वागादीनां प्राणरूपत्वं प्राणनामत्वं
च गौणं भृत्यन्यायेन प्राणानुवर्तित्वात् व्यवहारभेदश्च मुख्यानुपलम्भात् ॥ स्वं स्वं विषयं परिच्छिद्यालो
चकानींद्रियाणि प्राणस्त्वक्षाणां चादेहस्य चानतात् तस्माद्बहुविलक्षण्यात्प्राणान्तेषां तत्त्वांतराणींद्रिया
णि ॥ ॥संज्ञामूर्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ ॥२४९॥ नवमाधिकरणमारचयति ॥ नाम
रूपव्याकरणे जीवः कर्ता किंवेश्वरः । आनेन जीवेनेत्युक्तेर्व्याकर्ता जीव इष्यते ॥ १ ॥ जीवान्वयः प्र
वेशान्तं निधेः सर्वस्य जीवनं ॥ जीवाशक्तेः कर्तृ ईश्वरं तामा किम्भावदितुः ॥ २ ॥ ईश्वरणपंचभू

तत्सृष्टेषुभौतिकयोर्दृश्यमानयोर्महीधरादिनामरूपयोर्जीवएवस्रष्टास्यात्कुतः अनेनजीवेनात्म
नानुप्रविश्यनामरूपेव्याकरवाणीतिजीवरूपस्यैवस्रष्टात्वश्रवणादितिप्राप्तेब्रूमः॥जीवे
नानुप्रविश्येतिप्रवेशएवजीवोऽन्वेतियंनिहितत्वात्जीवेनव्याकरवाणीत्यस्यव्यवहितान्वयःस्या
त्नहिजीवस्यगिरिनदीनिर्माणशक्तिरस्तिईश्वरस्तुसर्वशक्तियुतःपरास्यशक्तिर्विविधेतिश्रवणा
त्किंचव्याकरवाणीत्युत्तमःपुरुषोपीश्वरपक्षेसमंजसः॥तस्मादीश्वरएवनामरूपयोःस्रष्टा॥क
थंतर्हिघटपटादौकुलालादेर्निर्मातृत्वंईश्वरप्रेरणादितिब्रूमः॥तस्मादीश्वरएवसर्वकर्तेतिसि
द्धं॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायांवैयासिकन्यायमा
लायांद्वितीयोऽध्यायःसमाप्तः॥ ॥तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां॥ ६५
१॥तृतीयाध्यायस्यप्रथमपादस्यप्रथमाधिकरणमारचयति॥आवष्टिताव[illegible] ष्टितावान्

तस्सूक्ष्मैःसुमाञ्जेतान्भूतानोऽस्थूलत्वेनमात्मवेष्टितएवसः॥१॥बीजानांदुर्लभत्वेननिराधारें
द्रियागतिः॥पंचमाहुतितात्वस्यजीवास्त्रियातिविष्टितः॥२॥पूर्वपादप्रतिपादितप्राणाधि
काजीवः॥शरीरांतरप्राप्तिवेलायांइतोनिर्गच्छन्नाविशारीरबीजैःसूक्ष्मभूतैरावेष्टितोगच्छ
तिपंचभूतानांसर्वत्रसुलभत्वेनानातानयनस्यनिरर्थकत्वादितिप्राप्तेब्रूमः॥भूतमात्रेसुलभ
त्वपिदेहबीजानिनसर्वत्रसुलभानितस्मादितोनेतव्यानिकिंचजीवोपाधिभूतेंद्रियाणां
भूताधारमंतरेणपरलोकगमनंनसंभवतिजीवनदशायामदर्शनात्श्रुतिश्चैवमाहपंच
म्यामाहुतावापःपुरुषवचसोभवंतीतिअस्यायमर्थः॥द्युलोकपर्जन्यपृथिवीपुरुषयो
षितःपंचपदार्थाउपासनायामग्नित्वेनपरिकल्पितास्वाश्वास्वग्निषुस्वर्गायगच्छन्नुत्तरागच्छ
न्यजीवआहुतित्वेनकल्पितःइष्टापूर्तकारीजीवःस्वर्गमारुह्योपभोगेनकर्मणिक्षीणेपर्जो

न्यपतिवा वृष्टिरूपेण भूमिं प्राप्यान्नद्वारेण पुरुषं प्राप्य रेतोद्वारेण योषितं प्रविश्य शरीरं प्र
प्नोति। तत्राऽप्शब्दोपलक्षितानि देहबीजानि पंचभूतानि जीवेन सह द्युलोकादिपंचस्थानेषु ग
त्वा पंचमस्थाने शरीरत्वं प्राप्य पुरुषशब्दवाच्यानि भवंतीति तस्माद्जीवो वेष्टित एव परलोकं
गच्छति॥ ॥कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च॥ ॥३।१।८॥ इति प्राधिकरण
मारचयति॥ स्वर्गावरोही क्षीणानुशयः सानुशयो वा। यावत्संपातवचनात्क्षीणानुशय इ
ष्यते॥१॥ जातमात्रस्य भोगित्वादिकन्नाम्नविराधतः। चरणश्रुतितः सानुशयः कर्मांतरैरयं॥२
स्वर्गमुपभुज्य ततोऽवरोहन्पुरुषो निरनुशय इहागच्छति अनुशयो नाम कर्मशेषः॥ जीवमनु
फलं ष्ठात इति भुक्तत्वात्तः। न च स्वर्गादवरोहतोऽनुशयः संभवति। अनुशयफलस्य सर्वस्य तत्रैवोप ६५
२ भुक्तत्वात्। अत एवावरोहविषया श्रुतिः॥ यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्त इत्या

ह। संपतत्यनेन कर्मणा स्वर्गमिति संपातः कर्मसमूहः संपातमनतिक्रम्य यावत्संपातं नि:
शेषं कर्मफलं भोक्तुं तत्रोषित्वेत्यर्थः। तस्मात्कर्माशेषरहितोऽवरोहतीति प्राप्ते ब्रूमः। स्वर्गा
र्थमनुष्ठितस्य कर्मणः स्वाकल्पेनोपभोगेऽपि अनुपभुक्तानि संचितानि पुण्यपापानि बहून्य
स्य विद्यंते अन्यथा सद्यः समुत्पन्नस्य बालस्येह जन्मन्यनुष्ठितयोर्धर्माधर्मयोरभावात्सुखदु
ःखोपभोगो न स्यात्। यच्चान्यत्किंचिदुच्यते॥ एकस्मिन्जन्मन्यनुष्ठितः कर्मसमूह उत्तरस्मिन्ने
प कस्मिन्नेव जन्मन्युपभोगमानहीयत इति तदसत् इंद्रादिपदप्रा [illegible] पकाणां अश्वमेधादीनां
मो विड्वराहादिदेहप्रापकाणां पापानां च युगपदुपभोगासंभवेनैक [illegible] भविकः कर्माशय इति
मतस्य विरुद्धत्वात् तत एकस्मिन्जन्मन्यनुष्ठितानां मध्ये ज्योतिष्टोमादिकर्मणोऽभुक्तेऽपि
कालान कर्मांतराण्यवशिष्येरन्। यावत्संपातशब्दस्तु स्वर्गप्रदकर्मविषयः न त्वितरन कर्मवि

ष्ययः श्रुतिश्च स्वर्गादवरुह्य पंचम्यामाहुतौ शरीरं गृह्णतां तु रूपाणां तद्वचोऽस्य एप पापयोः
स्तच्चावं दर्शयिति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयो
निं वा क्षत्रिययोनिं वा वैश्ययोनिं वा॥ अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमा
पद्येरन् श्वयोनिं वा सूकर योनिं वा चंडालयोनिं वेति। रमणीयचरणाः सुकृतकर्माणः
कपूयचरणाः पापकर्माणः अभ्याशो ह यदित्यव्ययसमुदायः क्षिप्रमर्थः तावंसानु
शया अवरोहंतीति स्थितं॥ ॥अनिष्टादिकारिणामपि च श्रुतं॥ ॥३।१।१२॥ तृतीयाधिकर
णमारचयति। चंद्रं यांति न वा पापा यांतीति सर्व इति वाक्यतः पंचमाहुतिलाभार्थं भोगाभावेपि या
त्यस्मी॥१॥ भोगार्थमेव गमनमाहुतिर्व्यभिचारिणी। सर्वश्रुतिः सुकृतिनां याम्ये पापिगतेः ६६
श्रुतेः॥२॥ ये वै के चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति श्रवणात्तु चंद्रलोकाख्येस्य

र्वे पापिनो गतिरस्ति यद्यपि पापिनस्तत्र भोगो न संभवति तथापि तु नरत्वामल्प शरीरस्य ग्रहणे
पंचमाहुतिलाभाय स्वर्गगतिरस्तु पापयेति प्राप्ते ब्रूमः॥ भोगार्थमेव हि स्वर्गगमनं न पंचमाहुतिला
भार्थं पंचमाहुतिर्व्यभिचारात्॥ द्रोणादीनां यापि दाहुत्यभावात्सीतादीनां पुरुषाहुत्यभा
वात्। तत्सर्व इति श्रुतिरिष्टादिकारिविषया॥ पापिनां तु यमलोकगतिः श्रुता विवस्वतं संगमनं
जनानां यमं राजानं हविषा दुवस्यतेति पापिजननिर्गंतव्यं यमं प्रीणयेत्यर्थः। तस्मान्न पापिनां
ति स्वर्गगतिः साभाव्यापत्तिरुपपत्तेः॥ ॥३।२२॥ चतुर्थाधिकरणमारचयति। वियदादिस्वरूप
त्वं तत्साम्यं वावरोहिणः॥ वायुर्भूत्वेत्यादिवाक्यात्तत्तद्भावं प्रपद्यते॥१॥ खवत्सूक्ष्मो वायुवशो धु
त्या धूमादिभिर्भवेत्। अन्यस्यान्यस्वरूपत्वं न मुख्यमुपपद्यते॥२॥ स्वर्गादवरोहप्रकारः श्रूय
ते। अथैतमेवाध्वानं पुनर्निवर्तंते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो

नूयाच्चं नवति अत्रं नूयामेघो नवति मेघो नूयाप्रवर्षतीति यथेतमिति यथागतं तथेत्यर्थः।
तत्र स्वर्गादवरोह तो जीवस्याकाशादिस्वरूपत्वं नवति वायुर्नूत्वेत्यादिना तत्र को
वप्रतिपत्तिः अतत्वादिति प्राप्ते ब्रूमः। अन्यस्यान्यरूपत्वायोगेन वादाकाशाद्यापत्तिर्नामाकाशवत्सौ
क्ष्म्यं वायुना वायुवशता धूमादिना वो धूमादियर्यपर्यक इति निर्णयः॥ ॥नातिचिरेण विशे
षात्॥२३॥ पंचमाधिकरणमारचयति॥ व्रीह्यादेः प्राग्विलंबेन चरयावावरोहति। तत्रा नि
या यममेव स्यान्नि मकविवर्जनात्॥१॥ ङः खं व्रीह्यादिनिर्याणमिति तत्र विशेषितः। विलंब
स्तेन पूर्वं त्वराऽर्थाद्वसीयते॥२॥ प्रवर्षणानंतरं व्रीह्यादिनाव आम्नायते। तद्द व्रीहियव
उपधिवनस्पतयस्तिलमाषा इति जायंत इति प्राप्ते तस्मात् व्रीह्यादिनावादाकाशादौ विलंबव ६७
रायानियामकाभावाद्वियते इति प्राप्ते ब्रूमः॥ व्रीह्यादिनावमनिधायानंतरमतावरेव

ष्कुदुर्निःप्रपतरमिति व्रीह्यादिनावान्निर्गमनं दुःखात्कमिति कवितीकविति व्रीह्यादौ विलंबं विशेषयति
ततोऽर्थात्पूर्वत्र त्वरेत्यवसीयते॥ ॥अन्याधिष्ठिते पूर्ववदभिलापात्॥२४॥ षष्ठाधिकरणमारच
यति॥ व्रीह्यादौ जन्म तेषां स्यात् संश्लेषो वा जनिर्नावत्॥ जायंत इति मुख्यवाच्यत्वाद्धि हिंसादिपापत
॥१॥ विधानत्वपापं संश्लेषो कर्मव्याप्रत्यनुक्तितः। श्वविप्रादौ मुख्यजनो चरणव्याप्तिः श्रुतेति ।
॥२॥ आकाशादाविव व्रीह्यादौ न संश्लेषमात्रं किंतु व्रीह्यादिरूपेण मुख्यं जन्म विवक्षितं जायंत स्त
इति श्रवणात् न च स्वर्गे सुकृतमनुनूयावरोहतः पापफलरूपस्थावरजन्मनोऽसंभवः॥ तद्धे
नाः पशुहिंसादेर्विद्यमानत्वात् तस्मान्मुख्यं जन्मेति प्राप्ते ब्रूमः॥ विधत्वात् पशुहिंसादिकं पा
पं आता जायंत इति श्रुत्यापि संश्लेषमात्रं विवक्षितं न तु मुख्यं जन्म कर्मव्यापारानभिधानात् य
त्रै मुख्यं जन्म विवक्षितं तत्र कर्मव्यापारमभिधत्ते रमणीयचरणाः कपूयचरणा इति तस्मात्स्व
त्र

र्गादिवदीरितानां वियदादीनां संक्षेपमात्रमिति स्थितं॥ तृतीयाध्यायस्य प्रथमः पादः॥ ॥सं ध्ये सृष्टि
राह हि॥ ३।२।१॥ प्रथमाधिकरणमारचयति॥ सत्या मिथ्याथवा स्वप्नसृष्टिः सत्या श्रुतीरणात्॥ आ
द्यदेशाविशिष्टत्वादीश्वरेणैव निर्मितेः॥ १॥ देशकालाद्यनौचित्याद्बाधितत्वाच्च साम्प्रतं
। मायावी कौतुकमात्रत्वाम्याञ्जीवानुवादतः॥ २॥ अत्र रथान्रथयोगान्पथः सृजत इति श्रुत्या नत
स्वप्ने रथादीनां सृष्टिरीरिता। अतो वियदादिसृष्टिवद्व्यवहारदशायां सत्यां न वितुमर्हतीति न च जाग्र
द्दशास्वप्नदशयोः स्वप्नदशायाश्च किंचिद्वैलक्षण्यं पश्यामः तत्काले भोजनादीनां दृष्ट्याद्यर्थक्रियाकारित्वात्
अतो विमाता सृष्टिः सत्या ईश्वरकर्तृकत्वाद्वियदादिवदिति प्राप्ते ब्रूमः॥ स्वप्नसृष्टिर्मृषा न तदु ६८
चितं देशकालाद्यसंभवात् न हि केशसहस्रांशपरिमितनाडीमध्ये गिरीनदीसमुद्रादीनामु
चितो देशोऽस्ति न हि निशीथसमये यानस्य सूर्यग्रहणोचितः कालोऽस्ति नाप्यनुपनीतस्य बाल

स्य पुत्रोत्सवादिहर्षनिमित्तान्युचितानि किंच स्वप्नोपलब्धानां पदार्थानां स्वप्न एव बाधो दृश्यते क
दाचिन्नरुत्वेनावधीयमानः पदार्थः तदैव गिरिर्वनावयितो भवति यत्तूक्तं स्वप्नसृष्टिः श्रुतिरुक्त
इति तत्रापि श्रुतिर्जागरपूर्विकामेव सृष्टिमाह न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ र
थान्रथयोगान्पथः सृजत इति अतो वस्तुतो यन्तोऽपि रथाद्याः शुक्तिरजतवदनास्तीति श्रु
तेरभिप्रायः॥ यदपि जीवस्य स्रष्टृत्वं तदप्ययोजकं अनुचितदेशकालादेर्दृष्टत्वात् विलक्षण एव
य स्य उक्तत्वात् यदपीश्वरनिमित्तत्वमुक्तं तदप्यसत् एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमा
ण इति जीवस्यैव स्वप्नजागरनिर्मातृत्वेन श्रुत्यानूद्यमानत्वात् तस्मात्स्वप्नसृष्टिर्मृषा॥ ॥त
दभावो नाडीषु तच्छ्रुतेरात्मनि च॥ ३।२।७॥ द्वितीयाधिकरणमारचयति॥ नाडीपुरीतद्ब्रह्माणि
विकल्प्यान्तसुप्तये। समुच्चितानि वैकार्थ्याद्विकल्प्यन्ते यवादिवत्॥ १॥ समुच्चितानि नाडीनि

ॐ

रूपप्रत्यप्युरीतति। इदं ब्रह्मणि यात्विकं विकल्पे व्वष्टदोषा नति॥ आसु तदा नाडीषु सुप्तो
व भवतीति नाडीषु प्रवेशो गम्यते॥ ताभिः प्रत्यवसृप्य पुरीतति शेते इति श्रुतौ पुरीतदाश्रितत्वं प्र
तीयते। य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति श्रुतौ वाक्यशेषाद्वाच्यब्रह्माश्रितत्वं प्रतीय
ते॥ तान्येतानि नाड्यादिस्थानानि विकल्पितानि भवितुमर्हन्ति एकप्रयोजनत्वात्। यथा व्रीहि
भिर्यजेत यवैर्यजेतेत्यत्र पुरोडाशनिष्पादनस्य प्रयोजनस्यैकत्वेन विकल्प आश्रितः तथात्रापि
सुषुप्त्याख्यं प्रयोजनमेकं तस्मात्कदाचित्पुरीतति कदाचि [illegible] नाडीषु स्वपीति कदाचिद्ब्रह्म
णीति नाड्यादीनां विकल्पे प्राप्ते ब्रूमः॥ एकप्रयोजनत्वमसिद्धं पृथगुपयोगस्य श्रुतवचनात्। तत्र
यथा हि नाड्यः प्रसादवच्चक्षुरादीन्द्रियप्रसंचरणा जीवस्य हृदयनिष्ठं नयनं तं मार्गत्वेनाविष्ट ६९
तिष्ठन्त एव ताभिः प्रत्यवसृप्य तिष्ठती यया साधनत्वं नाडीनां कृतं हृदयवेष्टनरूपं तु पुरीत
त्र

व न्या सादर्वदा चरकं न विषयति। ब्रह्म तु मंचकवदाधारः अतो यथा द्वारेण प्रविश्य प्रासादे पर्यंके शे
ते तथा नाडीभिः प्रत्यवसृप्य पुरीतति ब्रह्मणि जीवः शयिष्यत इति प्रकारान्तरेण नाड्यादीनां स
मुच्चयः॥ सुषुप्तो ब्रह्मणि जीवावस्थानकृत आधाराधेयभावो न प्रतिभातीति चेत् एकी
भावादिति ब्रूमः॥ यथा सोदकः कुंभस्तटाकजले प्रक्षिप्तो मग्नः सन्पृथक् न ज्ञायते तथान्तःक
रणोपाधिकाजीव आवरकाज्ञानसहिते ब्रह्मणि मग्नत्वात् न पृथगवभासते। अत एव श्रुत्ये
तत्सुषुप्तो जीवस्य ब्रह्मणा सह तादात्म्यं प्रतिमाह सता सोम्य तदा संपन्नो भवतीति यत्तु
विकल्पपक्षयोरुक्तः सोऽपि दोषः प्रबलादनुपपन्नः॥ तथा हि यदा जीवो नाडीषु शेते तदा पुरीतद्ब्र
ह्मवाक्ययोः प्रामाण्यं परित्यक्तं स्यादप्रामाण्यं च। प्रामाण्यं स्वीक्रियते तदा पुनः पुरीतद्ब्रह्म
णोः शयाने तदा पुरीतद्ब्रह्मवाक्ययोः पूर्वत्यक्तं प्रामाण्यं स्वीक्रियते पूर्वस्वीकृतं चाप्रामाण्यं प

रीत्यज्ञातंतिग्राह्मपरित्यागात् ग्राह्मस्वीकारः त्यक्तस्वीकारः स्वीकृतपरित्यागश्चेति दोषचतुष्ट
यं तु रीतद्वृह्मवाक्यकोटौ तथा नाडीवाक्यकोटावपि दोषचतुष्टयोपाजितत्वात् दोषाः सं
पद्येत तस्मात्समुच्चय एव ग्राह्यो न तु विकल्पः ॥ ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ॥३२
९ तृतीयाधिकरणमारचयति ॥ यः कोप्यनियमेनात्र बुध्यते सुप्त एव वा ॥ उदबिंदोरिवाशक्तेर्नि
यंतु कोपि बुध्यते ॥ कर्मविद्यापरिच्छेदादुदबिंदुविलक्षणः ॥ स एव बुध्यते शास्त्रात्तदुपाधेः पुनर्नि
बोधिति ॥२॥ यथा समुद्रे प्रक्षिप्तो जलबिंदुः स एव नियमेन पुनरुद्धर्तुमशक्यः तथा सुषुप्तो ब्रह्म
ण्यगो यो जीवः स एव प्रबुध्यत इति नियंतुमशक्यत्वात् यः कोपि प्रबुध्यत इति प्राप्ते ब्रूमः ॥ विषम
प उदन्यासः ॥ विद्यापाजीवः कर्मविद्यावच्छिन्नो ब्रह्मणि निमज्जति उदबिंदुस्त्वनवच्छिन्न इति वैषम्यं ७०
यथा गंगोदकपरिपूर्णः कुंभः पिहितद्वारः कोचनः जलसमुद्रे मग्नः सन् पुनरुद्ध्रियाते तत्र गंगोदकं गा ६०
वा

तदेव पुनर्विविक्तं शक्यते तथा स एव जीवः प्रतिबुध्यते अत एव श्रुतिराह व्याघ्रो वा सिंहो वा वृ
को वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंतीति व्याघ्रादयो यजीवाः सु
प्ताः पूर्वं यच्छरीरं प्राप्य वर्तते तत एव जीवाः सुषुप्तावुपरिप्रबुध्यमानास्तदेव शरीरं प्राप्नुवंतीत्य
र्थः ॥ न च सुषुप्तो ब्रह्मप्राप्तस्य जीवस्य मुक्तवन्न पुनरुत्थानानुपपत्तिरविद्यकस्योपाधेः सत्त्वेन
तदकावजीवाक्षवस्थनवात् तस्माद्यः सुप्तः स एव प्रतिबुध्यते ॥ ॥ मुग्धेर्द्धसंपत्तिः परिशेषात्
॥१०॥ चतुर्थाधिकरणमारचयति ॥ किं मूर्छा जाग्रदादौ किं वावस्थांतरं भवेत् ॥ अन्यावस्था
न प्रसिद्धा तेन का जाग्रदादिषु ॥१॥ न जाग्रत्स्वप्नयोरेकाद्विता नासंभवा ॥ मुखवदि विदर्वेस्ते
नावस्थान्यालोकसंमता ॥२॥ जाग्रत्स्वप्नसुषुप्तिभ्योन्यस्याश्च अवस्थाया अप्रसिद्धत्वात् मूर्छाया
जाग्रदाद्यंतर्भाव इति प्राप्ते ब्रूमः ॥ परिशेषादवस्थांतरमभ्युपगंतव्यं न तावज्जाग्र[illegible] स्वप्नयोरंत

ज्जीवादितप्रतीत्यन्नावात्। नापि सुषुप्तौ विलक्षणत्वात् सुषुप्तौ उ मानः प्रसन्नवदनः सम्यक्श्वासो नि
ष्कंपशरीरश्च भवति मूर्छितस्तु विकृतिमुखो विषमश्वासः शरीरकंपादियुक्तः यद्यपि जाग्रदादि
वद्दिने दिनत्वाभावान्न मूर्छायां बालकादिषु प्रसिद्धिरस्ति तथापि कादाचित्की मूर्छावस्था वि
ज्ञायते द्वाभ्यां मिश्रिता संता तस्माद्भिन्नेयमवस्था। तदेवमधिकरणचतुष्टयेन त्वंपदार्थः शोधितः॥ त
त्र त्वंपदार्थस्य मिथ्यात्वेन तु सुखदुःखकर्तृत्वाद्यवस्थास्वपि जीवोऽसंग इति शोधितं। सुषुप्तौ
ब्रह्मैक्येन तदेवासंगत्वमनुभावितं तस्मिन्वचनः प्रतिबोधेनानित्यशंका निरस्ता। मूर्छा वि
चारेण चाप्यादिसर्वव्यवहारलोपेऽपि मरणे जीवविनाशो न शंकनीय इति दर्शितं॥ ॥न स्थान
तोऽपि परस्योभयलिंगं सर्वत्र हि॥ ३।२।११॥ ॥पंचमाधिकरणमारचयति॥ ब्रह्म किं रूपि वा ७१
पि नवेत्यत्र रूपमेव वा॥ द्विविधश्रुतिसद्भावाद्ब्रह्मस्याद्रूपयात्मकं॥१॥ नीरूपमेव वेदांतैः

वाय्वा
नब्रह्मणो मूर्तामूर्तबंधनेन पृथिव्यप्तेजोलक्षणं मूर्तं रूपं वाय्वाकाशादिलक्षणममूर्तं प्रपंच्यांते ब्र
ह्मापादानमिदमुक्तं अथात आदेशो नेति नेतीति। अस्यायमर्थः। रूपद्वयकथनानंतरं चारूपि
रूपेणानुवक्तव्यत्वान्नेति नेतीत्ययं ब्रह्मोपदेशः इति तत्र पूर्वपक्षी मन्यते जगत् एकमेव निषेध्य
ते द्वितीयो नेतिशब्दो निरर्थकः कस्मात् तेनाद्वितीयेन ब्रह्मापि निषिध्यत इति प्राप्ते ब्रूमः। न ताव
द्वितीयस्य निषेधस्य वैयर्थ्यं वीप्सार्थत्वात् सत्यां च वीप्सायां यद्यद्दृश्यं तत्तदितिशब्दो निर्दिशति
तेन सर्वं ब्रह्म न न भवतीति निषिद्धं न विष्यतीति अंतरेण तु वीप्सामाकृतिनकारेण मूर्तामूर्ततायाः
प्रत्येकत्वे नेतिशब्दनिर्दिष्टयोर्द्वयोर्निषेधे यतिमूर्ताद्यभावस्य मूलाज्ञानस्य चानिषिद्धत्वात्तयो
र्ब्रह्मत्वं प्रसज्येत ननु सत्याम् [illegible] पि वीप्सायामास्य वदोषः वीप्साया निरंकुशत्वाद्ब्रह्मापि नि ७२
षिध्यत इति चेत् ब्रह्मणो द्रष्टृत्वाभावेन निषेध्यसमर्पकानतिशब्दानर्हत्वात्। किंचात्राऽऽदे
घा

प्रतिपाद्यमुपसंहरति॥ रूपं त्वनूद्यातः प्रांतमनयत्वं विरुध्यते॥२॥ तदितत्त्वेष्या कृत्स्नेत्यादिश्रुतयोरु
पवब्रह्मप्रतिपादयंति अस्थूलमनणिवित्यादिश्रुतयो निरूपं तस्माद्वस्तुतत्त्वयात्मकं ब्रह्मनिष
सिद्धरूपः॥ नीरूपाम न शास्त्रप्रतिपाद्यमानांतरसिद्धत्वात् जगत्कर्तृत्वादिरूपमुक्तं तु ब्रह्मलिंगादि
कंस्य कर्तृकं कार्यत्वादित्यनेनापि च अवगंतुं शक्यं अतउपासनायामनूद्यते॥ न तु तात्पर्येण प्रतिपा
द्यत न चानुमानशास्त्रयोरू नयोर्वास्तवत्वमेकस्मिन्वस्तुनि सरूपत्वनिरूपत्वयोर्विरुद्धत्वात्
तस्मात्तात्पर्यविषयस्यारूपवत्वस्यप्रांतत्वाश्रीरूपाम वतत्वं तो ब्रह्म॥ ॥प्रकृतैतावत्त्वं हि
प्रतिषेधति ततो ब्रवीति च भूयः॥ ॥२२॥ षष्ठाधिकरणमारचयति॥ ब्रह्मापि नेति नेतीति नि
षिद्धमथवा न हि। द्विरूपा ब्रह्म जगती निषिध्येते उभे अपि॥१॥ वीप्सयमिति शब्दोक्ता सर्वदृश्य
सत्य निषिद्धता। अनिर्देश्य सत्यं च ब्रह्मलिंकं शिष्यते वधिः॥२॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च तस्मिन्

२॥ इति महता संरंभेण ब्रह्मोपदेष्टुं प्रतिज्ञाय तदेव ब्रह्म निषेधती श्रुतिः कथं न व्याहन्येत वाक्याचापस्थन
त्या ब्रह्मनिषेधासंगच्छते वाक्यशेषस्य च सत्यस्य सत्यमि मादिना विवक्षितस्य ब्रह्मणो लौकिकसत्या
द्गिरिनदीसमुद्रादेरधिकमात्यंतिकं सत्वं त्यसूचयितुं नाममिनिर्दिष्टं सर्वनिषेधपक्षे सर्वमाप्यतत्वंद
र्थितं स्यात्तस्मान्न ब्रह्म निषिध्यते॥ ॥परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः॥ ॥२३॥ सप्तमा
धिकरणमारचयति॥ अस्त्यन्यद्ब्रह्मणो नावा विद्यते ब्रह्मणोधिकं। सेतुत्वोन्मानवत्वाच्च संबंधा
द्भेदवत्वतः॥१॥ धारणात्सेतुता मानमुपास्त्यै तन्न संगती॥ उपाध्यकृत्तवनाशाभ्यां नान्यदन्यन्निषेध
त इति॥२॥ यदेतद्ब्रह्म नेति नेतिनिर्दिश्य प्रतिषेधेन व्यवस्थापितं तस्मादपि ब्रह्मणो अन्यवस्तु
स्तीत्यनुपपन्नं कुतः सेतुत्वादिव्यपदेशेभ्यः॥ अथ य आत्मा स सेतुर्विधृतिरिति सेतुत्वं प्रतिपादि
तपातयत्र यथा लोकपरावारवान् जलस्य विधारकः सेतुः तं च सेतुं तीर्त्वा

द्वितीयं ज्ञांगलं प्रतिपद्यते तथा ब्रह्मणोपि सेतुत्वेन अनाद्विधारकत्वात् ब्रह्मनील्लिंगं तथैवान्येन के
न चिन्नवितव्यं तथोन्मानव्यपदेशोपि ब्रह्मणः श्रूयते चतुष्पाद्ब्रह्म षोडशकलं ब्रह्मेति तावच्चान्मा
ना नस्माद्वितीय एव गवादिदृष्टचरं द्वितीयकत्रचिन्नथा संबंधव्यपदेशोपि ब्रह्मणः श्रूयते सता सोम्य
तदा संपन्नो भवतीति इति यत्र संबंधः सद्रूपाद्ब्रह्मणोन्यस्य विद्यमानतयावकल्पात तथा आत्मा वा
स्य ५ अरे द्रष्टव्यः इति द्रष्टृ ष्टव्यभेदव्यपदेशोपि तस्मान्नाद्वितीयं ब्रह्मेति प्राप्ते ब्रूमः। न तावद्ब्रह्मणः सेतु
त्वं मुख्यं संभवति मृद्दारुमयत्वप्रसंगात् न किंचित्तु सामान्येन सेतुत्वविवक्षायां विधारकत्वमा
त्रं विवक्ष्यते ननु समद्वितीयत्वं सेतुर्विधृति रिति श्रवणात् उन्मानं रूपात्मकं व्यपदिश्यते तत्प्रकरणत्वा १३
त्तन्नत्वावबोधाय न भेदव्यपदेशोप्यौपाधिक एव मापश्य घटाकाशमहाकाशवदुपपद्यते संबंधव्य
पदेशोप्युपाधिनाशमापद्य घटत्वं घटाकाशमहाकाशवदुपचर्यते तस्माद्ब्रह्मव्यतिरिक्तवस्तु

साधकाहेतूनामन्यथासिद्धत्वादकामनाद्वितीयमित्यन्यवस्तुनिषेधाच्चाद्वितीयमेव ब्रह्म॥ ॥फल
मत उपपत्तेः॥३८॥ अथ माधिकरणमारचयति॥ कर्मैव फलदं यद्वा कर्माराधित ईश्वरः॥ अपूर्वावां
तरद्वारा कर्मणः फलदातृता॥१॥ अचेतनात्फलासत्तेः शास्त्रीयान्पूजितेश्वरात्॥ कालांतरफलोत्प
त्तेर्नापूर्वपरिकल्पना॥२॥ अत्र यद्यपि विनाशिनापि कर्मणापूर्वद्रव्य वर्धनेन कालांतरेणापि फलदा
तृत्वसंभवादीश्वरकल्पनागौरवमिति प्राप्ते ब्रूमः॥ अचेतनस्य कर्मणापूर्वस्य वा तारतम्येन प्रति
नियतफलदातृत्वं न सामर्थ्यमस्ति॥ लोके सेवनादिक्रियायाम चेतनायां तद्दर्शनात्॥ ततः सवित
राजवत्पूजितेश्वरात् फलसिद्धिरभ्युपेया॥ न च कल्पनागौरवं शास्त्रसिद्धत्वेनेश्वरस्याकल्पनीय
त्वात् एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं य
मधो निनीषत इति श्रुतिरीश्वरस्यैव धर्माधर्मयोः फलदातृत्वं कारयितृत्वं चाभिदधाति॥ अति

चेश्वरस्य प्रामाणिकत्वेन विवक्षितत्वान्नतस्यापूर्वस्य कल्पनागौरवं भावतस्मात्कर्मणाराधि
तईश्वरःफलदाता॥ तदेवमधिकरणचतुष्टयेनतत्पदार्थःशोधितः तत्रप्रथमेनब्रह्मणोनीरू
पत्वं द्वितीयेननिषेधाविषयत्वं तृतीयेनाद्वितीयत्वं चतुर्थेनव्यवहारदशायां कर्मफलदातृ
त्वं॥ शाखाचंद्रन्यायेनोपलक्षणत्वायप्रतिपादितमिदानीं त्वंपदार्थशोधितावि
तिस्थितं॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायांवैयासि
कन्यायमालायांतृतीयाध्यायस्यद्वितीयःपादः॥ ॥सर्ववेदान्तप्रत्ययंचोदनाद्यविशेषात्॥ बो
३।३।१॥ तृतीयस्यपादस्यप्रथमाधिकरणमारचयति॥ सर्ववादस्थानकत्वंउपास्तेरथवैकता॥
अनेकत्वंकौथुमादिनामधर्मविभेदतः॥ विधिरूपफलैकत्वादेकत्वंनामनस्कृतं॥ शिरोव्र ९४
ताख्यधर्मस्तुस्वाध्यायेस्यान्नवेदने॥२॥ छांदोग्यबृहदारण्यकयोःपंचाग्न्युपासनमाम्नाय

म
ततादृक नमनवतीनामभेदात्कौथुममितिछांदोग्यगतस्यनामवाजसनेयकमितिबृह
दारण्यकगतस्यनाम तयोरुपासनंताभ्यांयोजयितव्यंधर्मभेदादुपासनाभेदगमकःशि
रोव्रतलक्षणोमुंडकशाखायांश्रूयते॥ तेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यै
स्तुचीर्णमितिशिरोव्रतंनामव्रतविशेषआथर्वणिकान्प्रतिविहितानेतरान्प्रतितस्मा
च्छाखाभेदादुपासनाभेदइतिप्राप्तेब्रूमः॥ शाखाभेदेपिविध्यादेरुपासनंनभिद्यते॥ त
थाहिछांदोग्येयोहवैज्येष्ठंचश्रेष्ठंचवेदेतियादृष्टाःप्राणविद्याविधितादृशाएवबृहदार
ण्यकेप्याम्नायते॥ तथाद्यपर्जन्यपृथिवीपुरुषयोषिदाख्यमग्निपंचकंअवद्यतयापंचाग्नि
विद्यायांयत्स्वरूपंतदुभयोरपिशाखयोःसमानंफलंचज्येष्ठश्रेष्ठभवनमितिएवंरूपंप्रा २वै
णोपास्तिरूर्ध्वंव्याख्याहृदयेप्येकविधा॥ यस्तुकौथुमादिनामभेदउदाहृतः॥ नाप्योस्मत्यानि

हितः किंतु तद[illegible]ध्येतार एव केवलं तत्तच्छाखाप्रवर्तकमुनिनाम्ना आताः वदंत्या हरंतियोपि पि
ताव्रतारूपधर्मान्तरं तदुक्तः आप्यध्ययनविषय एव न तु प्राप्तिविषयः । न तद्वीर्यं व्रताताधीत इति
अध्ययनधर्मत्वावगमात् तस्मादिष्टहेतुसंज्ञाबाधिदत्व नावाप्तनशाखानिदाउपासनं निष्प
न्न ॥ ॥उपसंहारो यथा नहि दहिधिवायवसमानेच ॥ ॥२२॥ द्वितीयाधिकरणमारचयति ॥ ए
काप्सलावनाहार्या आहार्या वा गुणाः श्रुता । अनुक्तत्वादनाहार्यता उपकारश्रुतिर्गुणे ॥१॥
श्रुतत्वादन्यशाखायामाहार्या अग्निहोत्रवत् । विशिष्टविद्योपकारः स्वशाखाकृगुणैः समः ।
२॥ वाजसनेयके प्राणविद्यायामधिको गुणो रेत आख्यः श्रुतः रेतोहोत्र कामेति नाश्रोतं दे
न्य प्राणविद्यायामुपसंहर्तव्यः । अनानुक्तत्वात् । विद्योपकारस्तत्र श्रुतो रवप्राणवागादि नि ७५
गुणेर्न विष्यतीति प्राप्ते ब्रूमः ॥ एतच्छाखायामश्रवणेपि शाखांतरे श्रुतत्वात् । उपसंहार्य एव

अग्निहोत्रानुष्ठाने स्वशाखांतरोक्तगुणायुक्तः तथैवानुष्ठानदर्शनात् । न च स्वशाखोक्तगुणैरेव वि
द्योपकारसिद्धौ गुणोपसंहारो निरर्थक इति वाच्यं कर्मभूयस्त्वात् । फलभूयस्त्वमिति न्यायेन
स्वशाखोक्तगुणवत् परशाखोक्तगुणानामप्युपकारित्वात् ॥ तस्मा[illegible]द्गुणोपसंहारः कर्त
व्यः ॥ ॥अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ २३॥ तृतीयाधिकरणमारचयति ॥ ॥ एका
ग्निः साथवा भिन्नविद्या छंदोगकाण्वयोः । एकस्या नामसामान्यात् संग्रामादिसमत्वतः ॥ उद्गी
त्वावयवोंकार उपास्ते न्यनायाभिदा । बहुमादर्थवादादिभेदास्थमतापिप्रयोजकं ॥२॥ उद्गीथवि
द्यैति समाख्यैकत्वात् छांदोगकाण्वशाखयोः विद्यैक्यमुचितं अथवा समाख्यानश्रोतानि था पि
प्राताः संग्रामादयस्तत्र समाः । तथाहि छांदोग्याद्वाजसनेयके मेणसाल्विकं द्वियद्द
त्तीनां नामसंद्वियद्दनीनां चांगीकृत्य तत्संग्रामं निरूप्य वागादिदेवानामसुरविद्धत्वमुक्तं ॥

प्राणदेवास्येकास्येवतद्विद्वत्वमुक्तं एतत्सर्वं काएकवेदपि समानं तस्मादुन्नयय यत्र विद्येकेयोते
वूमः। जिन्नेयमुद्गीथविद्यावद्यस्वरूपस्यनिनत्वात् तदाह्यताव सामन्नागविनागविरोध
स्यादुद्गीथस्यावयवो यऊंकारः स एव प्राण दृष्ट्योपासनीयः। का एवावादत्तु तस्वास्यादुद्गीथत्वके
र्यात्ता वागादींद्रियप्रेरकः प्राणः स उजाटीत्वनोपायाः इतिविद्याननेदः यत्तु मंयामादित्या म्प मु
कंतदप्रायाउक्तं अर्थवादत्वात्। यद्यपि प्राणस्यासुरविद्वत्वानावनाश्रुतत्वं तद्यद्यप्युपास्य ते
व्याप्तकृत्यवेद्यन्ते दस्मान्निराकरणं ज्ञिनोवागीथविद्या॥ ॥व्याप्तेश्च समंजसं॥ ॥३३४॥ चतु
र्थाधिकरणमारचयति। किमध्यायोथनाबाधाएकत्वं वा [illegible] विराप्यते। अहृत्स्यात्रनास्त्यैकं घ ३
नियतंहत्वजावतः॥१॥ विदेतुव्यासउंकारउद्गीथनविशेष्यते। अध्यासादौ फलं कल्प्यं सति नि १६
त्वस्तांश्चलक्षणा॥२॥ ॐमित्येतदक्षरमुद्गीथमुपासीतेति अक्षरोद्गीथायाः सामानाधिकरण्यं

श्रूयते तत्र चतुर्धा संशयः तथाहि नाम ब्रह्मेत्युपासीतेत्यत्र नाम्नि ब्रह्मदृ[illegible]ष्ट्यध्यासायसामा
नाधिकरण्यं प्रकृतं तथा बाधादि अप्युदाह्रियते यश्चौ[illegible]रः स स्थाणुरितिवा[illegible]रत्वस्य बाधः। याजीव
स्तद्ब्रह्मेत्येकत्वं यन्नीलं तदुत्पलमिति विशेष्यते। अतोक्षरस्य चतुर्द्धा सदाह्यतिद्दयमवेत्यत्र ना
ध्यवसायः नियामकस्य हेतोरभावादिति प्राप्ते ब्रूमः॥ अक्षरस्योद्गीथनविशेष्यता नियंतुं शक्य
तउंकारो ह्यृग्यजुःसामसु त्रिष्वप्यतस्तत्र कस्योपास्यत्वमित्यपेक्षायामुद्गीथनागतस्यन
त्वितरस्येति सामवेदगतस्य विशेषणीयत्वात्। अध्यासबाधैक्यपक्षेषु फलमपि कल्पनीयं
उप ३ प्रस[illegible]तस्वतंत्रोपासनत्वेन फलस्याकांक्षितत्वाद्धि[illegible]पक्षेतु वक्ष्यमाणरसतमत्वादिगुणो ब्र ३
पासनार्थं प्रतिकल्पेनोंकार उद्गीथन विशेष्यते। ननु स्वतंत्रमुपासनं ततोनपृथक्फलं कल्प
नीयं ननुउद्गीथशब्दः कृत्स्नभक्तिवाचकः उंकारस्तु तदवयवः अंतउंकारं विशिष्टुं उद्गीथशब्द

नतदंशलक्षणा स्वीकरणीया स्यात् बाढं तथाप्यधमपक्षात्समीचीनो विशेषणपक्षः अधमस्य प
देतु यथा निरूढशद्धः स्वार्थं सर्वं परित्य ज्यार्थांतरस्य तां शिलां प्रतिमां लक्षयति तथा ऽत्राप्यशेष
१ चे पितिविप्रकर्षः अंशलक्षणायां तु स्वार्थैकदेशस्यैव परित्याग इति सन्निकर्षः उकारादितरद
क्षरंजातं यदस्ति सोयं । परित्यक्तव्यः तदेकदेशः तस्मादंतरंगां तां कारणात्तत्पर्यमुत्रोपा
वयवत्वेनेदमक्षरं विशेष्यते ॥ ॥ सर्वाभेदादन्यत्रेमे ॥ ॥३।३।५॥ पंचमाधिकरणमारचयति
नसिद्धत्वाद्यनाहार्यमाहार्यं विवमित्यतः उक्तस्यैव परामर्शादनाहार्यमनुक्तितः ॥१॥ प्राणाद्या
रणबुद्धिस्थं वसिष्ठत्वादि न तत्र एवं शब्दपरामर्शयोग्यमाहार्यमिष्यते ॥२॥ प्राणविद्यायां छां
दोगाः काण्वाश्च वसिष्ठत्वप्रतिष्ठादिकान् गुणानामनंति न त्वेतान् कौषीतक्यादयः तत्र । व ११
सिष्ठत्वादिकं नोपसंहर्तव्यं कुतः यएवं वा वादात्ययं शाख्ये न तत्र छांदोग्यवाक्यगुणानामपराम

र्शादिति ब्रूमः । उक्तगुणवदनुक्ता अपि गुणा एवं शब्दपरामर्शयोग्याः कुतः गुणिनः प्राणस्यैक
त्वेन तद्वारा गुणानां बुद्धिस्थत्वात् यथा देवदत्तनाम्नः सुरायामध्यायनदृष्टेऽपि न मोहिमत्सामनध्या
पयनमप्यध्यापकत्वेन निश्चयनिज्ञायाता तथा छांदोग्यादौ वसिष्ठत्वादिगुणयुक्ततयोपलब्धः
त. प्राण इतरत्र याद्यो केवलमुपलभ्यमानोऽपि पूर्वगुणविशिष्टतयैव बुद्धिस्थो भवति तस्मादेवं शब्दपरा
मर्शयोग्यत्वाद्वसिष्ठत्वादिकमुपसंहर्तव्यं ॥ ॥ आनंदादयः प्रधानस्य ॥३।३।६॥ षष्ठाधिकरणमा
हा रचयति । अनाहार्या उताहार्या आनंदाद्या अनाहृतिः ॥ वामनीसत्यकामादिरिवैतेषां व्यवस्थि
तः ॥१॥ विधीयमानधर्माणां व्यवस्था स्याद्यथाविधि ॥ प्रतिपत्तिफलानां तु सर्वशाखासु संहृतिः
॥२॥ आनंदो ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यानंदसत्यत्वादयस्तैत्तिरीयके परब्रह्मविद्यायां पठ्यंते यं
प्रज्ञानं ब्रह्मेत्यादौ ऐतरेयकादिगतासु परब्रह्मविद्यासु नोपसंहर्तव्याः वामनीत्वादिरिव ब

स्योपपन्नेः।एषएववामनीरेषएवभामनीरितिकामयितृत्वभासकत्वादयोगुणाउपकोसलवि
द्यायामाम्नाताःसत्यकामःसत्यसंकल्पइतिसत्यकामादयागुणादहरविद्यायांसमाम्नाताःत
त्रयथापरस्यरंगुणानुपसंहारएवमानंदादीनांव्यवस्थेतिप्राप्तेब्रूमः।विषमोदृष्टांतः।वामनीत्वादी
नांध्येयत्वेनविधीयमानत्वात्व्यवस्थायुक्ताआनंदादयस्तुप्रतिपत्तिफलाइतिनविधीयंतेअ
तोव्यवस्थापकविध्यभावात्प्रतिपत्तिफलस्यसर्वत्रसमानत्वाच्चानंदादयउपसंहर्तव्याः॥ ॥
आध्यानायप्रयोजनाभावात्॥ ॥३३॥समाधिकरणमारचयति।सर्वापरंपराहादेशेय
त्पुरुषएववाध्येयास्सर्वाम्नातत्वेनवाक्यानिस्युर्बहूनिहि॥१॥तमर्थंपुरुषज्ञानंयःप्रयतंतःस्म ७८
तिमहान्।ताहाध्यायस्मातास्तादिर्वेदएकःसुमांस्त्तः॥२॥कठवल्लीषुपठ्यतेइंद्रियेभ्यःपरा
ह्यर्थाःअर्थेभ्यश्चपरंमनः।मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः।महतःपरमव्यक्तमव्यक्ता

त्पुरुषःपरः।पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरिति अस्यायमर्थः।मनसाविषयानभिलष्य
पश्चादिंद्रियैर्बाह्यान्विषयान्प्राप्नोतितत्रबाह्यविषयेभ्यःइंद्रियाणामंतरत्वात्परत्वं।प्रथमिंद्रियंइंद्रिय
स्पृश्याभिलष्यमाणदशायामर्थाअंतराः।तेभ्योप्यभिलाषात्मिकामनोहनिरंतरातन्तरपिह
त्तिमतीबुद्धिरंतरा।बुद्धेरपिबुद्ध्युपाध्युपादानभूतोमहत्तत्त्वाख्याहिरण्यगर्भरूपात्माभ्यंतरः
महतापितदुपादानभूतमव्यक्ताख्यंमूलाज्ञानमभ्यंतरं अव्यक्तादपितदधिष्ठानभूतश्चिद्रूपः।
पुरुषोभ्यंतरः।पुरुषादभ्यंतरंनकिंचिदस्तिपुरुषएवाभ्यंतरमस्यविश्रांतिभूमिःपुरुषार्थकामैः
परमोगंतव्यश्चदेवात्ममतितत्रयथापुरुषस्याभ्यात्मत्वेणप्रतिपादितः।एवमिंद्रियादिपरंपरा
अ अपिप्रतिपाद्येव[illegible]न्यथातदुपन्यासवैयर्थ्यात्।बहूनांप्रतिपादनेवाक्यभेदःस्यादितिचेद्बा
ढंसत्वेनानिनबहूनिवाक्यानिएकवाक्यताध्यंभवादितिप्राप्तेब्रूमः।पुरुषस्याज्ञान[illegible]

द्वा॥८

मनी निवर्तकत्वात्तत्पुरुषएवज्ञेयतया प्रतिपाद्यः अतः एवाकारोपेतपुरुषज्ञानायैवमहतायत्नेन
प ध्यागउद्दिष्टः ॥ एषसार्वभूतेषुगूढोत्मा न प्रकाशते दृश्यतेत्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि
भिरिति अयमर्थः सर्वान्यंतरत्वेन गूढाशयमात्मानं बहिर्मुखानां प्रकाशतेऽन्तर्मुखानां सूक्ष्मदर्शी न२
नशीलास्तेर्यगान्यासेनिकाग्र्यमापन्नया बुद्ध्या सूक्ष्मवस्तुविषयया दृश्यत इति । नच पु
रुषस्यैव प्रतिपाद्यत्वे परं परोपदेशादिवैयर्थ्यं बहिर्मुखस्य चित्तस्य क्रमेण पुरुषप्रावण्योपरं
परायाः साधनत्वात्तस्मात्पुरुषएवज्ञातव्यः ॥ ॥आत्मगृहीतिरितरवदुत्तरात् ॥ ३१ ॥ ॥ अ
ष्टमाधिकरणमारचयति । आत्मावाइदमित्यत्र विराट्स्यादथवेश्वरः । भूतसृष्ट्यन्तिभ्यरःस्या
न्नवाद्यानयनाद्विराट् ॥१॥ भूतोपसंहतेरीशःस्यादद्वितावधारणात् । अर्थवादोगवाद्युक्तिर्ब्र १९
ह्मात्मत्वंविवक्षितं ॥२॥ आत्मावाइदमेकएवाग्रआसीदित्यत्र विराडेवात्मशब्दवाच्यो नेशः

ध्या५

कुतः सईक्षतलोकान्नुसृजाइति पंचभूतसृष्टिमनुक्त्वा लोकमात्रसृष्टेरभिधानात् ईश्वरप्रकरणे
श्रुतिनिरी[illegible]यकं ब्रह्मादाण्यादिष्टभूतसृष्टभिधानदर्शनात् । तस्मो गामानयदिति । चाकंगवाद्यानय
नं शरीरिणो विराजो घटते न त्वशरीरस्य परमेश्वरस्येति प्राप्ते ब्रूमः ॥ एकएवाग्रआसीदित्यद्विता
वधारणादीश्वरात्मशब्दार्थः तथापि तस्य खांतराकाभूतसृष्टिरत्रोपसंहर्तुं शक्यते यदुक्तम
वाद्यानयनं तदर्थवादरूपं न हीदं नस्य स्वातंत्र्येण पुरुषार्थत्वानावादथभूतार्थवादत्वमन्ये
ष्याः तर्हि विराडादिद्वारा परमेश्वर एवगवादिकमानयतु श्रूयमाणस्य गवानयनादिप्रपंचस्य नन्तु
सर्वस्यार्थवादत्वमात्मनि विवक्षितार्थः कोपिनस्ति अद्वैतिचेन्नडीवब्रह्मैक्यस्य विवक्षितत्वा
आत्मावाइस्तुपक्रम्य स एव तामवधृतरूपं ब्रह्मतत्त्वमम परमप्रज्ञानं ब्रह्मेत्युपसंहारात्तस्मादीश्व
र आत्मशब्दवाच्यः ॥ ॥द्वितीयकवर्णकमाह ॥ ॥द्वयाअर्थस्तवं स्यादं वाकएवतांयोगपरयो ॥

उभयत्र प्रत्यगस्तु सदात्मन्यात्मोपक्रमात्॥१५॥ साधारणोयं मन्त्रः स आत्मा तत्त्वमित्यतः॥ वाक्ये
षादात्मवाची तस्माद्वस्त्वैकमितयो॥१६॥ का एव छान्दोग्याध्यायक तमन्त आत्मेत्यारभ्य आत्माप्रपंचि
तः॥ छांदोग्ये षष्ठे तु सदेव सोम्येदमग्र आसीदित्युपक्रम्य सद्वस्तु प्रपंचितं न हि लोके मन्त्र
ता ह्यपर्यायो तस्माद्वस्तुभेदात्तावद्ब्रूमः॥ सद्धोयमात्मा नात्मसाधारणत्वात्संदिग्धः स
च वाक्यशेषगम् आत्मा तत्त्वमसीति श्रवणादात्मवाची न विष्यतीति तस्मादेकामवोनयत्र वस्तु
[illegible]॥ ॥कार्याख्यानादपूर्वं॥
१८॥ नवमाधिकरणमारचयति॥ अनग्नताध्यानचमने विधेये तु द्विरेव वा॥ उभे अपि विधीय
ते ह्योरपि स्मृतत्वतः॥१॥ स्मृतेराचमनं प्राप्तं प्रायत्यार्थमनूद्यते॥ अनग्नतामतिः प्राणवि ८०
दो हृद्वविधीयते॥२॥ अप्राणनिद्याँ वाक्यशेषे श्रूयते अपि यद्यं नाचामेदशित्वा चामेदेत
याँ

म
मेव तदनमनग्नं कुरुत इति तत्र प्राणस्यानग्नताबुद्धिराचमनं चेत्यनयं विधेयं द्वयोः स्मृतत्वादिति
प्राप्ते ब्रूमः॥ अप्राप्ते शास्त्रमर्थवदिति न्यायेन मानान्तराप्राप्तम[illegible]नग्नताचिंतनमेव विधेयं नोऽ
नात्प्राप्तहं चाचमनीयास्वप्स्तु वा साबुद्धिं न्यावातनवासस्राप्राणस्यानग्नत्वं ध्यायेदित्यर्थः
आचमनं शुद्ध्यर्थं तथा स्मृतिबलादेव प्राप्तं हतिनविधीयते न च तस्याः स्मार्तक्रियामवक्षति
मूलमितिवाचनीयं वर्णाश्रमधर्मप्रकरणत्वाभावेन भिन्नविषयत्वात् मूलत्वं तंत्रान्तरमनुमे
यं तस्मादाचमनस्य प्राप्तत्वादनग्नताबुद्धिरेव प्राणोपासकं प्रति विधेया॥ ॥समान ए
वं चाभेदात्॥ ॥१९॥ दशमाधिकरणमारचयति॥ शांडिल्यविद्या का[illegible]नां हि विधेऽक
विधमथवा द्विरु[illegible]क्ते रेकत्वात्वायां द्विविध्यमितिगम्यता॥१॥ एकामनोमयत्वादिप्रत्यभिः
ज्ञानतो भवेत्॥ विद्याँविधिरेकत्र स्यादन्यत्र गुणविधिः॥२॥ अग्निरहस्य ब्राह्मणे या
याँ एवा३

ध्य

घ। डिल्यविद्यायामिति स आत्मानमुपासीत मनोमयं प्राणशरीरमिति तथा विद्यामेव बृहदारण्यकेऽन्य
विद्या पठिता मनोमयोयं पुरुषो भाःसत्य इति तत्र पौनरुक्त्यं नया द्विधा भेद इति प्राप्ते ब्रूमः॥ म
नोमयत्वादिकस्य वेद्यरूपस्य प्रत्यभिज्ञानादेकैव विद्या न च पुनरुक्तिः एकत्र विद्यां विधाय प
रत्र तदनुवादेन सत्यत्वसार्वज्ञत्वादिगुणानां विधातुं शक्यत्वात् अग्निहोत्रं जुहोतीति दध्ना जु
होतीति दिवत् तस्मादेकविधिवशात् शांडिल्यविद्या॥ ॥संबंधादेवमन्यत्रापि॥ ॥३।३।२१॥ एकाद न्य
शाधिकरणमारचयति। संहारः स्यादव्यवस्था वाना मोरहरहं त्विति। विद्यैकत्वेन संहारस्या
दध्यात्माधिदैवयोः॥१॥ तस्योपनिषदित्येवं भिन्नस्थानस्थकीर्तनात्। भिन्ना शीनस्वरूपास्त्व
रिव नाम्नो व्यवस्थितिरिति॥२॥ बृहदारण्यके सत्यविद्यायामधिदैविकस्य पुरुषस्यादित्य ८१
स्याहरिति तन्नामध्यात्मयोपदिष्टं अध्यात्मिकस्य त्वक्षिपुरुषस्याहमित्यप तन्नाम तत्र विद्यै

कत्वे द्वयोर्नाम्नोः स्वरूपद्वयस्योपसंहार इति प्राप्ते ब्रूमः॥ य एष एतस्मिन् मंडले पुरुष इत्युपक्रम्य त
स्योपनिषदहरिति तन्नाम्ना मंडलस्थाम्यवपरामृश्यतस्यैव नाम विशेषत उपदिष्टः तथा सायं दक्षि
मिति णेक्षन् पुरुष इत्युपक्रम्य तस्योपनिषदहमिति तन्नाम्ना क्षिनिष्ठाम्यवपरामृश्य नाम विशेषत उपदिष्ट
के ताताविन्न[illegible] कात्वेनावद्यस्य सत्याख्यस्य ब्रह्मण एकत्वेपि स्थानविरोधेण कलहेण नाम विधी
माता अध्यात्माधिदैविकयोर्व्यवस्थे नामनी न तु तयोरुपसंहारोस्ति यथा लोके गुरोरुपास्य
स्यैकत्वेपि तिष्ठतां गुरावर्थ उपचार नासावासीनस्य प्रयुज्यते आसीनस्य तु उपचारः पादाभ्यंगादिर्ना
स्यो तिष्ठतो न वति तद्वत् तस्मान्नाम्नोर्व्यवस्था द्रष्टव्या॥ ॥संभृतिद्युव्याप्त्यपि चातः॥ ॥३।३।२३॥
द्वादशाधिकरणमारचयति। आहार्या वान वान्यत्रयं भृत्या दिर्न्नतयः॥ आहार्या ब्रह्मधर्मत्वा धा२
च्छांडिल्यादावधारणात्॥१॥ अथाधारणधर्माणां प्रत्यभिज्ञात्र नास्यतः॥ अनाहार्या ब्रह्ममात्र

संबंधो ऽनित्यप्रदर्शकः॥ ३॥ राणायनीयानां खिलेषु पठ्यते। ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्ये
ष्ठं दिवमाततानेति। अस्यायमर्थः। यानि लोके वीर्याणि हरिहरकमलासनादीनां ह्युपसिद्धानि ता
नि सर्वाणि ब्रह्मपुरःसराण्येव संभृतानि भवंति न हि स्वर्गा किंकर ब्रह्मानापद्य वीर्याणि संभ
वंति तच्च ज्येष्ठं ब्रह्म पूर्वं दिवं व्याप्यावस्थितमिति। अत्राधिदैविकस्य ब्रह्मणः संभृतिद्युव्या
प्त्यादयो गुणा उपास्यत्वेनावगम्यंते॥ शांडिल्यदहरादिविद्यासु आध्यात्मिकं हृदयांतर्वर्ति
ब्रह्मोपास्यं तथा च तत्र ब्रह्मण एकत्वात् संभृत्यादयो गुणाः शांडिल्यविद्यासूप[illegible]
[illegible] संहर्तव्या इति प्राप्ते ब्रूमः॥ न तावत्संभृत्यादिगुणानामन्यतमोऽपि शांडिल्य
विद्यासु उपलभ्यते अतो विधिकल्पकश्रुत्यभिज्ञानाभावाद्गुणा नोपसंहर्तव्याः ब्रह्मैकत्वमात्रेण ८२
पर्यवसाने न काप्युपसंहार इत्यतिप्रसंगः॥ तस्मात्संभृत्यादीनामनुपसंहारः॥ ७॥ पुरुषविद्यायामपि

वा चेतरेषामनाम्नानात्॥ ॥३।३।१३॥ त्रयोदशाधिकरणमारचयति॥ पुंविद्यैका विभिन्ना वा
तैत्तिरीयकतांडिनोः॥ मरणावभृथत्वादिसाम्यादैकतिगम्यता॥ १॥ बहूनामसाम्यादेन
किंचित्साम्यस्य बाधनात्। न विद्यैक्यं तैत्तिरीये ब्रह्मविद्याप्र[illegible]त्यामनात्॥ २॥ अस्ति तैत्ति
रीये पुरुषविद्या तस्यैवं विदुषो यज्ञस्यात्मा यजमान इति तथा तांडिशा[illegible]खायामपि श्रूयते।
पुरुषो वाव यज्ञ इति तयोर्मात्रे किं च पुरुषविद्यायां मरणं तदवभृथः मरणमेवावभृथः इत्य
न्यत्र समानधर्मश्रवणात् प्रातःसवनादीनां च समानत्वादिति प्राप्ते ब्रूमः॥ वेद्यस्य स्वरूप
स्य भूयानत्र भेद उपलभ्यते तथा हि विदुषो यो यज्ञरूपस्यात्मेति तैत्तिरीयके व्यधिकरणेष
ष्ठी अन्यथात्मा यजमान इति व्याघातात् विद्वानेव यज्ञः॥ स एव यजमान इति कथं नमाह
न्यात॥ तांडिनां तु पुरुषो यज्ञ इत्याः सामानाधिकरण्यं श्रुतमित्येकोरूपभेदः॥ आत्मा यजमा

नादिकं सर्वत्र श्रुतं ताण्डिनो पैङ्गिनस्त्वेतन्न ताण्डिनां तु पठन्त्येदेवं त्रेधा विभक्तस्यायुषः सवनत्रय
त्वमित्यादि न किंचिदपि तित्तिरीयाः कपठन्ति । अतो मरणावभृथत्वाद्यस्याप्यबाधसिद्धि
घ्यो निर्दिष्टे वा चितः । अपि च न तैत्तिरीयकाणामुपासनामिदं किं तर्हि ब्रह्मविद्याप्रशंसा
तस्यैवं विदुष इति ब्रह्मविदोनुकर्षणात् । तस्मान्न विद्यैक्यशङ्काया अप्यवकाशोस्ति ॥ ॥
वेधाद्यर्थभेदात् ॥ ॥३२४॥ चतुर्दशाधिकरणमारचयति । वेधामंत्रप्रवर्ग्यादि विद्याङ्गं
मथवान्नो । विद्यासंनिधिपाठेन विद्याङ्गं मंत्रकर्मणी ॥१॥ लिङ्गेनान्यत्र मंत्राणां वाक्येना
पि च कर्मणां । विनियोगात्संनिधिस्तु बाध्यते नाङ्गता नयोः ॥२॥ आथर्वणिकानामुपनिष
[illegible]दारम्भे सर्वं प्रविध्य हृदयं प्रविध्य धमन्यादय आभिचारिका मंत्राः पठिताः । काण्वानामुप ८३
निषदारम्भे प्रवर्ग्यब्राह्मणं पठितं एवमन्यत्राप्युदाहर्तव्यं । तत्र विद्यासंनिधिवशान्मंत्रकर्म

णां विद्याङ्गत्वमिति प्राप्ते ब्रूमः ॥ हृदयं वेधादिमंत्राणां लिङ्गादभिचारकर्मणि विनियोगः ॥
प्रवर्ग्यस्य पुरस्तादुपसदां प्रवृणक्तीत्यग्निष्टोमे विनियोगो द्रष्टव्यः । लिङ्गवाक्ये च संनिधे
र्बलीयसी इति पूर्वकाण्डे श्रुतिलिङ्गाधिकरणे व्यवस्थापितं तस्मान्न विद्याङ्गत्वं मंत्रकर्मणोः । क
हानौ तूपायनशब्दशेषत्वात्कुशाछन्दस्तुत्युपगानवत्तदुक्तं ॥ ॥३२५॥ ॥पंचदशाधिक
रणस्य प्रथमवर्णकमारचयति ॥ उपायनमनाहार्यहानावाक्षिप्यतेथवा । अश्रुतत्वादना
पेक्षा हि विद्याभेदादनाकृति ॥१॥ विद्यान्तरेप्यर्थवादत्वादाहार्यस्तुतिशाम्यतः ॥ हानस्याप्युत्पत्ति
श्रुतानादद्वं विद्यादिवादवदिति ॥२॥ छान्दोग्यायनिनः पठन्ति तस्य पुत्रा दायमुपयन्ति सुहृदः
साधुकृत्यां द्विषन्तः पापकृत्यामिति अस्यायमर्थः । ज्ञानिनः पुत्रस्थानीयाः सार्वे ये प्राणिनः
तदीयं चित्तस्थानीयं कर्म्म यथायोग्यं गृह्णन्ति । ताण्डिनस्तु पठन्ति अश्व इव रोमाणि विधूय पा

पंचदशवराहाः सुखात्मगुप्ता । महात्मा शरीरमिति तथाथर्वणिकाः पठंति तदा विद्वान् पुण्यपापे
विधूय निरंजनः परमं साम्यमुपैतीति निरंजनो ऽविद्याजन्मकारणरहितः साम्यं ब्रह्मस्वरूप
मित्यर्थः । तत्र तत्वज्ञानिनः पुण्यपापत्यागप्रतिपादिका श्रुतिः परित्यक्तयोः पुण्यपापयो
रितरपुरुषस्वीकारेणोपसंहर्तव्यः त्यागश्रुतिः काण्वस्वीकारस्याश्रुतत्वात् अश्रुतम
प्याक्षिप्यत इति चेत् न । अनुपपत्तेरभावादितरस्वीकारमंतरेणापि ज्ञानिनां परित्यागस्योप
पत्तेः एवं किं च तत्स्वीकारवाक्यं सगुणविद्यायां पठितं । त्यागवाक्यं तु निर्गुणायां तस्मात्के
वलायां हानौ श्रूयमाणायामुपायनं नोपसंहर्तव्यमिति प्राप्ते ब्रूमः । यं तं विद्याभेदो ऽस्ति अत
एव न वयमुपायनमनुष्ठेयधर्मतयोपसंहरामः किं त्वर्थवादत्वेन यथा श्रूयमाणेन पुण्यपा ८४
पपरित्यागेन ब्रह्मविद्या स्तूयते तथा तत्स्वीकारेणापि स्तोतुं शक्यते एवं च नार्थवादत्वम

त्यागहानोपायनश्रुत्योः स्वार्थतात्पर्याभावः मानांतरप्रसिद्धिविरोधयोरभावेन भूतार्थवाद
त्वात् यत्तु हानश्रुतौ नोपायनं श्रुतमित्युक्तं तदसत् कौषीतकिश्रुतौ हानोपायनयो
रुक्तायाश्च गमात् तत्सुकृतदुष्कृते विधूनुवाते तस्य प्रियाः ज्ञातयः सुकृतमुपयंत्यप्रियाः दु
ष्कृतमिति तत्र ब्रह्मलोकप्राप्तिवेलायामित्यर्थः । एवं च सति कौषीतकिश्रुतस्य हानस्याथ
र्वणिकानां शाखायाः न्यनिद्दानात् कौषीतकिप्रोक्तस्योपायनस्योपसंहारो यु
क्तः । न त्वर्थवादानां परस्परोपसंहारो ऽर्थवादानां क्वापि दृष्टचर इति चेन्न सामोपास्तिस्तावकत्वेन श्रुत
स्यैकविंशो वा इतो ऽसावादित्य इत्यस्यार्थवादस्यैकविंशत्वनिर्णयायैते त्रिरीमगत मत्प्र
करणस्थार्थवादापेक्षत्वात् द्वादश मासाः पंच र्तवस्त्रय इमे लोका असावादित्य एकविं
श इति हि तत्र संख्यानिर्वाहाय उक्तः तस्मादर्थवादत्वे ऽप्युपायनमंगीकर्तव्यं ॥ ॥ पंचदशाधिक

क वा

रणस्य द्वितीयवर्णमारचयति॥ विधूननं चालनं स्यात्॥ हानं वा चालनं भवेत्॥ दोधूयं तद्ध
जाशाणीत्यादौ चालनदर्शनात्॥१॥ हानमेव भवेद्वाक्यशेषेणोपायनश्रुतेः वा त॥ कर्म्मनिह
परित्यक्तमन्यस्वीकर्तुमर्हतीति सुकृतदुःहानविधूनुतइत्यत्रविधूननशब्दस्यदोधूयंतेइ
त्यादाविवचालनमर्थः। ननुपरित्यागइतिप्राप्तेब्रूमः॥ वाक्यशेषेश्रूयमाणस्येतरस्वीका
रस्यविनापरित्यागमनुपपत्तेःचालनवाचिनाविधूननशब्देनपरित्यागउपलक्ष्यतां॥ ॥
सांपरायेतर्तव्याभावात्तथाह्यन्ये॥ ॥३।३।२६॥ साधिकरणमारचयति॥ कर्मत्या
गो मार्गमध्ये यद्वा मरणात्पुरा॥ उत्तीर्य विरजां त्यागस्तथा कौषीतकिश्रुतेः॥१॥ कर्म
प्राप्यफलाभावान्मध्ये साधनवर्जनात्॥ तांडिश्रुतेः पुरा त्यागो बाध्यः कौषीतकिक्रमः॥२॥ ८५
पूर्वाधिकरणोक्तः सुकृतदुष्कृतपरित्यागो ब्रह्मलोकमार्गस्य मध्ये भवितुमर्हतीति तद्धि

कसमीपवर्त्तिनद्युत्तरणानंतरं तत्तु वणात्स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदु
ष्कृते विधूनुत इति तस्मान्मार्गमध्ये परित्याग इति प्राप्ते ब्रूमः॥ ब्रह्मलोकमार्गमध्ये ब्रह्मप्राप्ति
व्यतिरिक्तस्य सुकृतदुष्कृतनाश्यस्य प्राप्यस्य फलस्याभावात् तत्रायानदीपर्यंतं नयनं निरर्थकं किं
च मरणात्प्राक्परित्यक्तयोः सुकृतदुष्कृतयोः रंहसा तया मार्गमध्ये परित्यागस्य साधनं नास्ति न वा ते दे
हरहितेन साधनमनुष्ठातुमशक्यत्वान्न च मरणात्पुरा तत्त्यागे प्रमाणाभावः॥ अश्व इव रोमा
८५ णीति तांडिश्रुतौ तदवगमात् तथा च तया श्रुत्या नद्युत्तीर्यपरित्याग इत्यर्थकौषीतकिश्रौ
कः क्रमो बाधनीयः॥ तस्मान्मरणात्प्रागेव उपास्यस्याज्ञानेत एव परित्यागः॥ ॥ गतेरर्थव
त्त्वमुभयथान्यथा हि विरोधः॥ ॥३।३।२७॥ यन्नदृश्याधिकरणमारचयति॥ उपास्ति बोधयोर्मा
र्गः सामायद्वाव्यवस्थितः॥ समयणाद्वातारा मुख्य एतयोः कर्महानवत्॥१॥ दर्शांतरफलप्राप्ते
मा

युक्तो मार्ग उपास्तिषु॥ आरोग्यवद्बोधफलं तेन मार्गो व्यवस्थित॥२॥ चतुर्थाध्यायस्य तृतीयपादे
वक्ष्यमाणोर्चिरादिमार्गः सगुणब्रह्मोपासकस्य निर्गुणब्रह्मतत्त्वविदस्य समान एव स्तुतत्वात्
तत्कर्महानवत्समानत्वं संभवादिति प्राप्ते ब्रूमः॥ उपास्तिप्राप्यस्य ब्रह्मलोकफलस्य देशांत
तं ४ रवर्तित्वाद्युक्तस्तत्र मार्गः ब्रह्मज्ञानफलं तु रोगनिवृत्तिवत् अविद्यानिवृत्तिमात्रमिति किं तत्र
मार्गेण करणीयं स्यात् तस्मादुपासकस्यैव न तु ज्ञानिन इति व्यवस्थितो मार्गः॥ ॥ अनियमः
सर्वेषामविरोधः शब्दानुमानाभ्याम्॥३२१८॥ अष्टादशाधिकरणमारचयति॥ मार्गश्रुतः स्थले
ष्वेव सा वोपास्तिषु वा भवेत्। श्रुतेष्वेव प्रकरणात् बहिः पाठस्य तथान्यथा॥१॥ प्रोक्तो विद्यांतरे
मार्गो यच्च मङ्गतिवाक्यतः॥ तेन बाध्यं प्रकरणं बहिःपाठश्चिंतनाय हीति॥२॥ छांदोग्ये पंचाग्नि ८६
विद्यायामुपकोसलविद्यायां चोत्तरमार्गः पठितः शांडिल्यविश्वानरविद्यासु न पठितस्तथा

प्रकरणवशात्तास्वेव विद्यासु श्रुतस्तास्वेव मार्गो व्यवतिष्ठते नत्वन्यत्रोपसंहर्तव्यः॥ उपसंहा
रस्तु सत्पठितास्वेव सर्वत्रोपसंहर्तुं शक्यः तथा विद्याद्वयबहिःपाठो निरर्थकः स्यात्॥ तस्माच्छ्रु
तस्थलेष्वेव मार्ग इति प्राप्ते ब्रूमः॥ पंचाग्निविद्यावाक्यशेषे पंचाग्न्युपासकानामुत्तरमार्गे
क्रवंती श्रुतिर्विद्यांतरशीलिनां च मुख्यत एवार्चिरादिमार्गमुदाहरति य इत्थं विदुर्ये चेमे
अरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवंतीति अस्यार्थः॥ ये उपासका इत्थं पंचाग्नीउप
सते ये चारण्ये श्रद्धा तप इत्येवमादिधर्मोपेताः संत उपासनांतरेषु प्रवर्तंते ते सर्वेप्यर्चि
रादिमार्गं प्राप्नुवंतीति ततश्च मार्गप्रतिपादकवाक्येन प्रकरणं बाधितं न च बहिःपाठवै
यर्थ्यं उपास्यगुणत्वचिंतनार्थत्वोपपत्तेः॥ तस्मात्सर्वोपास्तिषूत्तरमार्गो वगंतव्यः॥ ॥ याव
दधिकारमवस्थितिराधिकारिकाणाम्॥ ॥३२१९॥ एकोनविंशाधिकरणमारचयति॥ ब्रह्म

तत्त्वविदां मुक्तिः पाक्षिकी नियता वा । पाक्षिक्यपांतरतमः प्रभृतीनां जन्मदर्शनात् ॥ ३ ॥ ज्ञानादे
हापन्नोऽकव्यमोक्षोपाप्तिफलं सुधा ॥ चतुर्थ्यधिकारिपुरुषाणां नियता ततः ॥ ४ ॥ अत्रापांत
रतमा नाम वेदप्रवर्तक आचार्यो विष्णोराज्ञया द्वापरांते कृष्णद्वैपायनरूपेण शरीरांत
रं जग्राहेति स्मर्यते तथा सनत्कुमारः स्कंदरूपेण पार्वतीपरमेश्वराभ्यामजायत एवमन्येऽपि
वसिष्ठादयस्तत्त्वज्ञानिन एव संतस्तत्तत्प्रयोजनावसानावधि स्थित्वा यावच्छरीरांतराणि जगृहु
रिति स्मरणान्मुक्तिस्तत्त्वविदां पाक्षिकीति प्राप्ते ब्रूमः ॥ य एते त्वया उदाहृताः पुरुषास्ते सर्वे जग
न्निर्वाहकारिणस्ते च पूर्वस्मिन्कल्पे महता तपसा परमेश्वरमुपास्यास्मिन्कल्पे तामादे
हापन्नोऽयमधिकारिपदं लेभिरे क्षीणे च प्रारब्धे कर्मणि मोक्षमाप्ताः तथा नारब्धकर्मणां तत्त्व- ८९
ज्ञानेन दाहस्य निवारयितुमशक्यत्वात्तत्त्वविदां मुक्तिर्नियतैव ॥ ॥ अक्षरधियां त्ववरोधः

यतः २ सदृशेत कुत्रा॥३३॥

सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥ ३० ॥ विंशाधिकरणमारचयति । निषेधानामसंहारः संहारो
वा न संहृतिः ॥ आनंदादिवदात्मत्वं निषेधानां समाप्यते ॥ १ ॥ अस्थूलानामाहृतानां च निषेधानां समास
दा ३ तः ॥ आत्मलक्षणतस्तस्माद्दायासूपसंहृतिः ॥ २ ॥ अस्थूलमनण्वह्रस्वमित्यादिना ब्रह्म व
बोधनाय गार्गिब्राह्मणे केचिन्निषेधाः श्रुताः तथा कठवल्लीष्वशब्दमस्पर्शमरूपमव्यय
मिति एवमन्यत्राप्युदाहार्यम् ॥ तत्र निषेधकानां परस्परमुपसंहारो नास्ति आनंदसत्यत्वा
दिधर्मवदात्मस्वरूपत्वाभावेनोपसंहारे प्रयोजनाभावात् इति प्राप्ते ब्रूमः ॥ यथा
स्वशाखायां श्रूयमाणानां निषेधानामात्मस्वरूपत्वाभावेऽप्यात्मोपलक्षकत्वं तथा शा
खांतरस्थोपसंहृतानां निषेधानामपि तत्समानं न च स्वशाखोक्तैरेवोपलक्षणसिद्धा कनाया
वुपसंहारवैयर्थ्यं दार्ढ्यार्थत्वात् अन्यथा स्वशाखायामपि द्वित्रिनिषेधमात्रेण तत्सिद्धेः

५२

वै मननात्

भिन्नरसेऽप्यर्थ्यं प्रसज्येत तस्मान्निषेधा उपसंहर्तव्याः॥ ॥इयदा॥ ॥३३।३४॥ ॥एकविंशाधिक
रणमारभ्यते। पिबंतौ द्वा सुपर्णेति द्वे विद्ये उतैवैकधीः॥ नो भेदोऽभेदकारावितिविद्ये उ
न्नइम॥१॥ पिबंतौ भेदाभेदकारावित्युक्तं हि समन्वये॥ इयत्तात्वन्निशानाद्विद्यैका मंत्रयो
र्द्वयोः॥२॥ ऋतं पिबंतावित्यस्मिन्मंत्रे द्विवचनेन द्वयोर्भोक्तृत्वं प्रतीयते द्वा सुपर्णेत्यस्मिं
न्मंत्रे तु तयोरन्यः पिप्पलं स्वाद्वत्तीत्येकस्यैव कर्मफलभोक्तृत्वं इतरस्य त्वनश्नन्नन्यो अभि
ति भिचाकशीतीत्यभोक्तृत्वं तस्मादवद्यस्वरूपानंदादिविद्याभेद इति प्राप्ते ब्रूमः॥ प्रथमाध्याय
स्य द्वितीयपादे तृतीयाधिकरणे पिबंताविति शब्दस्य जीवब्रह्मपरत्वेन भोक्तृभोक्तारावर्थ
त्युक्तं आत्मना वद्यभेदः॥ द्वित्वसंख्या वाऽनयत्र प्रत्यभिज्ञायानतस्मादेका विद्या॥ ॥अंत ८८
रा भूतग्रामवत्स्वात्मनः॥ ॥३३।३५॥ ॥द्वाविंशाधिकरणमारचयति॥ विद्याभेदोऽथ

तं

विद्यैक्यं स्यादुषस्तकहोलयोः॥ समानस्य द्विराम्नानाद्विद्याभेदः प्रतीयते॥१॥ सर्वांतरत्ववस्तुन
स्यानास्ति विद्यैकता ततः॥ शंका विशेषमत्वोक्तेर्द्विः पाठस्तत्त्वमसीतिवत्॥२॥ यत्साक्षादपरो
क्षात्ब्रह्म य आत्मा सर्वांतर इत्युषस्तेन कहोलेन चायाऽमावापस्तु ब्राह्मणे कहोलब्राह्मणे च
पठितं अपरोक्षादित्यत्र विभक्तिव्यत्ययेनापरोक्षमित्यर्थः॥ तयोरुभयोर्ब्राह्मणयोरन्यूना
तिरिक्ततया पठितस्य वाक्यस्यापौनरुक्त्यपरिहाराय विद्याभेद इति प्राप्ते ब्रूमः॥ द्वाया
रपि ब्राह्मणयोः सर्वांतरत्वं प्रतिपाद्यते तच्चैकस्मिन्नेव वस्तुनि युज्यते भवति द्वयोस्तु वस्तुनो
रेकतरस्य बहिर्भावोऽवश्यंभावी स्यात् सर्वांतरस्य वेद्यकत्वान्न विद्याभेदः न च पुनरुक्तिः॥
यथा ग्रामसर्वांतर तद्धि विशेषशंकापनुत्यर्थं तत्त्वमसीति नवकृत्व उपन्यस्तं तथात्रापुपपत्तेः।
[illegible] ब्राह्मणनाद [illegible] हाल्पशंकापोह्यते कहोलब्राह्मणे नादश्यादिव्यतिरिक्तस्य ब्रह्म

त्मा पद्यते वाक्यशेषयोस्तथा दर्शनात् तस्मादेकैव विद्या ॥ ॥ व्यतिहारो विशिंषंति हीत
रवत् ॥ ॥३।३।३७॥ त्रयोविंशाधिकरणमारचयति । व्यतिहारे स्वात्मरूपोदकधाधीरुता द्वि
धा ॥ वास्तवैक्यादेकधैकस्य द्वाय व्यतिहारगीः ॥१॥ ऐक्येपि व्यतिहारात्मक्याधीर्हि द्विधाय्य
जीवता । मुक्तोत्थापास्त्येवा चिन्तिकी मूर्तिस्तद्दार्ढ्यमार्थिका ॥ ऐतरेयके पठ्यते । तद्योहं सोसौ
योसौ सोहमिति । अस्यायमर्थः । य एवाहं इयमाद्ययो जीवात्मा स एवादित्यमंडलवर्ती
परमात्मा यामंडलवर्ती स एवास्माद्देहादिवर्तीति ततः स्वदेहरविमंडलयोरात्मानं व्य
तिहारेऽश्रूयमाणेपि जीवब्रह्मैक्यलक्षणस्य वस्तुन एकत्वादेकधैव बुद्धिः कर्तव्या । न व्य ८९
तिहाररूपा उभयधा एकस्यापि वस्तुनो दार्ढ्याय तदुपपत्तेरिति प्राप्ते ब्रूमः । नखल्विदं तत्त्व
वाबोधप्रकरणं प्रकरणं उपास्तिश्च व्यथा यानिकत्वप्रतिपत्तिर्दार्ढ्यमापद्यतां किं तर्हि

गुणोपास्तिप्रकरणमनुष्ठेयातो व्यतिहारेण द्विधा बुद्धिः कर्तव्या । नन्वेवं सति जीवस्य ब्रह्म
त्मैक्यं उत्कर्षाय कल्पते ब्रह्मणस्तु जीवैक्यमपकर्षाय स्यादिति । नायं दोषः । यथा दे
मी हादिरहितस्यापि उपासकचित्तस्थैर्यार्थं चतुर्भुजाष्टभुजादिमूर्त्युपादानेनापकर्षः
तथा वचनबलादीश्वरस्य जीवात्मोपायनेनोत्कर्षहानिः यद्यपि सत्यव्यतिहारस्तु श्रीयमा
नर्था जीवब्रह्मणोरेकत्वप्रतिपत्तिर्दार्ढ्यं नावगम्यते हि चरितार्था संपद्यामहे तस्माद्व्यतिहारे
ण द्विधा बुद्धिः कर्तव्या ॥ ॥सैव हि सत्यादयः ॥ ॥३।३।३८॥ चतुर्विंशाधिकरणमारचयति ॥
द्वे सत्यविद्ये एका वा यद्वेदरवादिवाक्ययोः ॥ फलभेदादुर्जेलोकजया स्यात् पुनरुक्तता द्वयं कृ ॥१॥
प्रकृताकर्षणादेका पापघातिं गधी फलं ॥ अर्थवादो ऽथवा सत्यमुक्तो भीरिति कल्पकः ॥२॥
बृहदारण्यके श्रूयते । स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमांल्लोकान्

प १ तिपद्यमनूद्यं तदर्थं हिरण्यगर्भरूपेण प्रथममुत्पन्नमित्यर्थः॥ अनेन वाक्येन सत्यविद्याप्र
तिपाद्य पश्चादिदं प्रतिपाद्यते॥ त[illegible]द्यत्सत्य[illegible]योसावादित्यो य एष एतस्मिन्मंडले पुरुष
इति तत्तात्पर्यं॥ एवं वाक्यद्वयात्सत्यविद्यावगम्यते कुतः फलसंदर्शनात्। यच्च वाक्ये
लोकद्वयः फलमुक्तं रव्यादिवाक्ये तु हंति पाप्मानं जहाति च तिपापघातलक्षणं पृथक्फ
लं श्रूयते तस्माद्विद्याभेद इति प्राप्ते ब्रूमः॥ यत्तत्सत्यमिति प्रकृतं सत्यं ब्रह्मानूद्यादित्यो मंडला
दिरूप इति रविरूपत्वदर्शनात् न चात्र फलाभावादस्ति पापघातस्य अंगफलत्वेना
र्थवादत्वादंगस्तु च फलश्रुतिरर्थवाद इति न्यायेन विवक्षितत्वात् अथवात्रोपासनायाम
धिकार्यश्रवणात् श्रूयमाणफलस्यैव काम्याप्यवंध्यमध्यस्थत्वाधिकारिणि कल्पयितव्ये ५०
प्रतिपापघातलोकजयकाम उपासीतेति वक्तृ शक्यत्वात् विशिष्टफलस्याविवक्षितत्वं

तस्मादेकैवेयं सत्यविद्या॥ ॥कामादीतरत्र तत्र चायतनादिभ्यः॥ ॥३३॥ पुनः पंचविंशाधि
करणमारचयति॥ असंकृतिः संकृतिर्वा व्योम्नोर्दहरहार्दयोः॥ उपास्यद्वयभेदेन तद्गुणाना
मसंकृतिः॥१॥ उपास्त्यैक्यचिदन्यत्र स्तुतये वास्तु संकृतिः। दहराकाशश्चाभिवरूदाकाशोपि
नतरः॥२॥ छांदोग्ये दहरास्मिन्नंतराकाश इति हृदयाद्यंतर्गतत्वेन श्रुतस्य दहराकाशस्य
सत्यकामत्वादयो गुणा उक्ताः बृहदारण्यके तु य एषोंतर्हृदय आकाश इत्युक्तस्य हार्दाकाश
९ स्य वशित्वादयो गुणा उक्ताः तत्र न परस्परमुपसंहारः दहरहार्दाकाशयोरुपास्यत्वेन हार्दाकाश
स्य चाद्वयत्वेन विद्याभेदादिति प्राप्ते ब्रूमः॥ तत्र वशित्वादीनां दहराकाश उपसंहार उपास्ये
न त्रिष्वपि सत्यकामत्वादीनां तु हार्दाकाश उपासनार्थमुपसंहारः न तत्प्रयोजनवत्त्वेपि विद्या
भेदोद्भेदः परिहर इति वाच्यं विद्याभेदे पुनर्यत्राकांक्षा वाच्ययाप्त नैकत्वात् दहराकाशस्य

तावदात्मत्वं [illegible] दहराधिकरणे निर्णीतं हार्दाकाशस्यापि सदात्म
आत्मत्वेनोपक्रमादात्मत्वमनवगंतव्यं तस्मादुक्तयत्रोपसंहारः॥ ॥आदरादलोपः॥ ॥३३३९॥
प्रवृत्त्यधिकरणमारचयति॥ ॥न लुप्यात् लुप्यते वा प्राणाहुतिरभोजने॥ न लुप्यते अति
थेः पूर्वं च भुंजीतेत्यादरोक्तितः॥१॥ तदुपर्यर्थित्वोपजीवित्वात्तद्धोमे लोप इष्यतां। तदुक्तिपदेपू
र्वं तु न्यायादेशे प्रपद्यते॥२॥ वैश्वानरविद्यावाक्यशेषे प्रथमामाहुतिं जुहुयात्तां जु
हुयात् प्राणाय स्वाहेति प्राणाहुत[illegible]यः पक्ष्यंते। तत्राकन्नचिन्निमित्तेन भोजनलोपे पृष्ठपा
तकस्य प्राणाहुति[illegible]र्न लुप्यते॥ पूर्वोऽतिथिभ्योऽश्नीयादिति [illegible]अतिथिभोजनात्पूर्वं द्रष्टुपासक चा
स्य यजमानस्य भोजनं प्रतिपादयन्त्याः श्रुतेः प्राणाहुतावादरदर्शनात् तमादरं परस्यापयि ९१
तुमनतिथिभोजनस्य प्राथम्यं निंदति यथाह विश्वेयमडुवा विहाततं परस्य जुहुयात्

दहुतस्यादिति तस्मात्प्राणाहुतेरलोप इत्याप्रसिद्धमः॥ तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमिति भो
जनार्थानस्य होमद्रव्यत्वश्रवणात् भोजनलोपे द्रव्याभावादाहुतिर्लुप्यात आदरस्तु भाज
नपक्षे प्राथम्यविधानाय न विध्यति तस्माद्भोजनलोपे प्राणाहुतिर्लुप्यात्॥ ॥तन्निर्धार
णानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबंधः फलं॥ ॥३३४१॥ अंगावबद्धाधिकरणमारचयति।
नित्या अंगावबद्धाः स्युः कर्मस्वनियता उतः पर्णवत् क्रतुसंबंधा वाक्यान्नित्यास्ततो मताः॥१
पृथक्फलश्रुतेर्नित्यान्नित्या गोदोहनादिवत्॥ उक्तौ क्रतु [illegible] तत्स्तु तः कर्मोपास्त्युपाधिनो
रिति॥२॥ उद्गीथादिषु कर्मांगेषु प्रतिमादिवत्प्रतीकत्वेन विधीय[illegible]नादेवतोपास्त्य मा ३
अंगावबद्धास्ताश्च कर्मस्वनुष्ठीयमानेषु कर्मांगवन्नियमेनानुष्ठेयाः तस्मात् कर्मप्रकरणमार
भ्याधीयमानावपि वाक्यात् क्रतुसंबंधोपपत्तेः॥ यथा यस्य पर्णमयी [illegible] जुहूर्भवतीनास्या

यः

तस्याव्यभिचरितगुरूद्वारावाक्यात्क्रतुसंबंधस्तथायएवंविद्वानुद्गायतियएवंविद्वान्सा
मगायतीत्यादिषुअव्यभिचरितक्रतुसंबंधित्वामोजीयादिद्वारातउपासनानांक्रतुसंबंधःप्रती
यतेतस्मात्कर्मवत्तुनियताउपास्तयइतिप्राप्तेब्रूमः॥गोदोहनादिवदनियताउपास्त[illegible]यथाच
मसेनापःप्रणयेद्गोदोहनेनपशुकामस्येत्यत्रापःप्रणयनमाश्रित्यविधीयमानमपिगोदो
हनंनक्रत्वर्थत्वादेतिकंनतुप्रणयनादिवन्नियतंतथाकर्मांगान्याश्रित्यविधीयमानाउ
पास्तयोनक्रत्वर्थाःकिंतुपुरुषार्थाःकर्मफलात्पृथक्फलश्रवणात्तथाचेतिहास्माइतिपंच
विधस्याम,निहृत्विद्दवतानुपासनस्यकामसृष्टिस्तुफलात्कर्मफलात्पृथक्फलात्वन
श्रूयात्किंचातेनानानोकरोतयश्चैनादेवंवेदयश्चनावेदेत्यस्मिन्नंगावबद्धोपास्तिवाक्ये ५२
त्रापिउपासकानुपासकयोःरूपाप्रमाभारत्चातनातनागनक मनिष्ठानविसृष्टमास्त्रा

यतेतस्मात्कर्मस्वनियताउपास्तयः॥ ॥प्रदानवदेवतदुक्तं॥ ॥३।३।४३॥ अष्टाविंशाधि
करणमारचयति॥ ॥एकीकृत्यपृथग्वास्याद्वायुप्राणानुचिंतनं।तत्वाभेदात्तयोरेकी
करणेनानुचिंतनं॥१॥अवस्थाभेदतोध्यात्ममधिदैवंपृथक्ततः।प्रयोगा[illegible]दा[illegible]ादि द्रा ३
गुणकेंद्रप्रदानवत्॥२॥संवर्गविद्यायामधिदैवंवायुरूपास्यात्वनमतःअ[illegible]मंच ध्या ४
प्राणःतत्रप्राणस्यवायुकार्यात्वनतत्वभेदाभावात्उभयोरेकीकरणेनचिंतनमिति
प्राप्तेब्रूमः।तत्वभेदाभावेपिकार्यत्वनकारणत्वेनवावस्थाभेदस्यसद्भावादित्यधिदै
वमध्यात्ममितिविविच्यपृथगनुचिंतनायस्मानिर्दिविनक्तितस्मादिंद्रप्रदानवत्पृथ
गनुचिंतनादिष्टव्यःयथेंद्रायराज्ञेपुरोडाशमेकादशकपालंइंद्रायाधिराजायइंद्रायस्व
राज्ञइतीन्द्रस्यैकत्वेपिराजादिगुणभेदान्पृथक्पुरोडाशप्रदानंतद्वत्तथैकस्यापिवायु

तत्त्वमस्यादिनेनेदानुष्टस्य चिंतनं न विरुध्यति॥ लिंगं च यस्मात्तद्धि बलीयस्तदपि॥ ॥३३२९॥ ॥
एकान्नत्रिंशाधिकरणमारचयति॥ कर्मबाधा स्वतंत्रा वामनश्चित्त्वच्छरवाश्रयः॥ कर्मशे
षाः प्रकरणाल्लिंगत्वन्यार्थदर्शनं॥१॥ उत्तरेयविधिमाह्लिंगादेवस्कत्याच वाक्यतः॥ बाध्यं
प्रकरणं तस्मात्स्वतंत्रे वह्निचितनं॥२॥ अग्निरहस्यके स्मिंश्चिद्ब्राह्मणे श्रूयते षट्त्रिंशत्सह
स्राण्यपश्यत्तदात्मानाग्नीनकर्म्मिणो मयान्मनश्चित इति अस्यायमर्थः॥ पुरुषसंघातस
वत्सरमध्ये चि तत्रायुषि षट्त्रिंशत्सहस्राणि दिनानि भवंति तत्रैकैकस्मिन्दिवसे यामः
नोवृत्तिः तस्या एकाधिलनश्चन्तेस्य तिथ्यमनवा अन्ययः षट्त्रिंशत्सहस्राण्युपपद्यंते ते च
प्रत्यगात्मस्वरूपत्वेन ध्येयाः॥ एत एवार्चनीयाः मनसा चीयंत संपद्यंत इति मनश्चितः ए ७३
वं वाक्चितः प्राणाश्चितश्चक्षु श्चित इति तान् इतरे चान्ययोमिचयनप्रकरणपठितत्वात्कर्म
के ३

प्रापानन्तस्वतंत्रविद्यात्मकाः नन्तु लिंगबलात्स्वतंत्रा विद्यात्मका न विरुध्यति तथा हि नाहि ने
वं विदे सर्वदा सर्वाणि भूतानि चिन्वंति अपि स्वपत इति वाक्यशेषः पठ्यते॥ तस्यायमर्थः॥ उ
पासकस्य स्वपतोपि अन्ययोक्लिन्नाः स्वकीयमनोवागादिवृत्तिषु परमेश्वरबुद्धपुरुषमनोवा
गादिवृत्तीनां प्रवर्त्तमानत्वात् अशेषपुरुषमनआदिवृत्तीनामपि लेन वर्त्तनात्तस्मादेवं
विदः स्वपतेपि तान्येतानग्नीन्सर्वदा सर्वाणि भूतानि चिन्वंतीति तत्र यावज्जीवमग्नीनाम वि
च्छेदेन निरंतर्यं प्रतीयते तच्च विद्यास्वातंत्र्यलिंगं कर्मांगत्वे हि कर्माणो यावज्जीवं नैरंत
र्याभावात् तेषाणां मनश्चिदादीनां कथं निरंतर्यं स्यात् तच्च लिंगं प्रकरणाद्बलीयस्तस्मात्स्व
तंत्रविद्यात्मका इति च न्यायं दोषः॥ अन्यार्थदर्शनरूपत्वेन लिंगस्येतस्य दुर्बलत्वात्॥ त
था हि द्विविधं लिंगं सामर्थ्यमन्यार्थदर्शनं चेति तत्र विद्युदुद्देशागतं लिंगं सामर्थ्यं तत्रास्या

तंश्रेणप्रमाणंअर्थवादगतंत्वन्यशेषवाक्येदृश्यमानत्वादन्यार्थदर्शनेनचतात्पर्यरहित
त्वान्नस्वातंत्र्येणप्रमाणंकिंतुप्रमेयस्यावाक्प्रमाणांतरात्केवलमुपपादकंभवतिएवंच
सतिअत्रोदाहृतस्यपूर्वलत्वात्प्रकरणात्कर्मांगतायामनश्चिदादयइतिप्राप्तेब्रूमः।।नतावद
त्रशाह्येविधिरूपत्वंस्यात्लिङादेरश्रवणात्किंतर्ह्यर्थवादस्यासामर्थ्यादन्योयाविधिस्तथाच
कलप्रतिपादकस्यावकवाक्यानांरात्रिसत्रन्यायेनाधिकारिसमर्पणपर्यवसानादत्रोपम
प्येनश्रावणंविधिरूपंनविष्यतिततोविध्युद्देशगत्वेनलिंगस्यप्राबल्यं।किंचतेह्येवेतविद्या
विनएवत्वेवस्थया।क्रमांगत्वमावर्त्ततेतथाविद्ययाहिवितएवंविदश्चितानवंतीतिवाः
क्यमपिस्यानन्यगमकंतस्माच्छ्रुतिलिंगवाक्यैःप्रकरणस्यबाधितत्वात्स्वातंत्र्यविद्यात्वम एध
निश्चिदादीनामप्युपगंतव्यं॥ ॥एकआत्मनःशरीरेभावात्॥ ॥३४॥२०॥ ।त्रिंशाधिकर

णमारचयति।आत्मादेहस्तदन्योवाचैतन्यंमदशक्तिवत्।भूतमेलनजंदेहेनान्यत्राभावपु:
स्ततः।।१।।भूतोपलब्धिर्भूतेभ्योविभिन्नाविषयित्वतः।सएवात्मान्नोनिकाद्देहादन्योयोपरलो
क का।।२।।मनश्चिदादीनांक्रत्वर्थतानास्तिकिंतुपुरुषार्थत्वमित्युक्तेसतिकासौपुरुषइति
प्रसंगाद्विचार्यतेतादनदधिकरणंपूर्वोत्तरायारुभायामीमांसायाःशेषभूतादेहव्यतिरिक्त
स्वर्गमोक्षभोगिनआत्मनःप्रतिपादकत्वात्।तत्रलोकायतिकादेहएवात्मेतिमन्यंतेतत्र
यव्यतिरेकाभ्यांचैतन्यस्यदेहधर्मत्वोपलंभात्सतिहिदेहेचैतन्यमुपलभ्यतेनत्वसतिनचैतन्य म
स्यजात्यंतरतयादेहव्यतिरिक्तात्मत्वंशंकनीयंक्रमुकनागवल्लीचूर्णानांसंयोगान्मदश
क्तिरिवदेहाकारपरिणतेभ्योभूतेभ्योजायमानंचैतन्यंकथंनामजात्यंतरंस्यात्तस्माच्चै
तन्योदेहआत्मेतिप्राप्तेब्रूमः।।दृष्ट्यादीनांभूतानांभूतानामुपलब्धिर्नतेभ्योव्यतिरिक्ता

नवितुमर्हतिविषयित्वात्‌यद्यद्विषयितत्तद्विषयाद्व्यतिरिक्तंयथारूपाच्चक्षुस्तथा[या]सतिनाद
शचैतन्यस्यात्मत्वंवदंतंप्रतिकथंनोतिकदेहत्वमापद्येत अस्येवदेहाचैतन्यमुपलभ्यतेनो
सतीतियावदन्वयव्यतिरेकावुक्तौतत्रव्यतिरेकोसिद्धः अदृष्टमपिदेहात्परलोकगामिनश्चि
दात्मनःशास्त्रेणोपलंभात्‌॥शास्त्रस्यचप्रामाण्यंसमर्थनीयं॥ ॥अंगावबद्धास्तुनशा का
खासुहिप्रतिवेदं॥ ॥३३३१॥ ॥एकत्रिंशाधिकरणमारचयति॥उद्गीथादिधीःस्वशाखांगेष्वि
वान्यत्रापिवाभवेत्‌॥सांनिध्यात्स्वस्वशाखांगेष्वेवासौव्यवतिष्ठते॥१॥उद्गीथादिधियाम
न्यंतत्राद्रेष्टःप्रतीयते॥श्रुत्याचसंनिधेर्बाधःस्ततोन्यत्रापियात्यसौ॥२॥अंगावबद्धोपा
सनेषुउद्गीथादिष्वेकमंगिष्टथिव्यादिदृष्टिरैतरेयोपनिषदिश्रूयते॥उक्तंतुकौषीतक्या १५५
दिशाखांतरेष्वपिविहितंतत्रप्टथिवीदृष्टिरैतरेयकगतोक्थएवव्य[illegible]वतिष्ठतेउतकौषीत

क्यादिगतेषुवर्तेतइतिसंदेहेऽनियमनिहितत्वात्‌॥स्वशाखायामेवव्यवतिष्ठतेइत्येवंप्राप्तेब्रूमः॥उ
द्गीथादिश्रुतीनांमुख्यार्थवृत्त्या॥सर्वशाखागतमुद्गीथसामान्यमाचष्टेततउद्गीथादिवत्सर्व
शाखागतोद्गीथेषुधियोऽपिभवन्तिप्रासांनिध्यान्निधेर्बलीयस्त्वात्तस्मात्क्वचिद्विहिताधीःशा
खांतरेप्यनुगच्छति॥ ॥भूम्नःक्रतुवज्ज्यायस्त्वंतथाहिदर्शयति॥ ॥३३३२॥द्वात्रिंशाधिक
रणमारचयति॥ध्यायाविश्वानरः[illegible]शापिध्यातव्यःसमस्तएववा॥अंशोपास्तिफलयोरु
क्तेरस्तुंशधीरपि॥१॥उपक्रमावसा[illegible]नाभ्यांसमस्तस्यैवचिंतनं॥अंशोपास्तिफलेत्व
प्येकोपास्ति[illegible]निंदनात्‌॥२॥वैश्वानरविद्यायांविराड्रूपस्यवैश्वानरस्यद्युलोकसू
र्यवाय्वाकाशोदकष्टथिव्योमूर्द्धचक्षुःप्राणमध्यशरीरमूलस्थानपादरूपेणध्यातव्यां
शानिरूपिताः॥तेषामंशानामपिप्रत्येकंध्यातंक्रमेणोपासनंविधत्तेउपास्तिरहस्यफलक

यनस्य च प्रत्येकमुपलभ्यमानत्वात् तथाहि उपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव स
भगवो राजन्निति होवाचेति प्रभ्यो नरान्सर्वांल्लोकमात्रोपास्तिरिति रवगम्यते तस्मात्तव द्युतं
प्रसुतं आसुतं कुले दृश्यत इति स्तुतादिवाक्यानां सोमयागविशेषाणां संपत्तिः फललिंगा
वगम्यते। एवमंशांतरेष्वप्युदाहर्तव्यं सर्वावयवसमष्ट्युपासनं तु तस्य ह वा एतस्यात्मनो वैश्वा
नरस्येति वाक्यशेषे विस्पष्टं प्रतीयते तस्माद्व्यस्तोपासनं समस्तोपासनं चोभयं विवक्षित
मिति प्राप्ते ब्रूमः। समस्तोपासनमेव विवक्षितं न तु व्यस्तोपासनं। कुतः उपक्रमोपसंहार
योरेकवाक्यत्वावगमात्। उपक्रमे तावत् को न आत्मा किं ब्रह्मेति समस्तमेव ब्रह्मोपास्य
त्वेन विचारयितुं प्रक्रांतं उपसंहारेऽपि तस्य ह वा इत्यादिना समस्तोपासनं विस्पष्टमभि ५६
धीयते तथा च समस्तोपासनस्य प्रत्येकमुपलभ्यमानास्तु वाक्यभेदः प्रसज्येत पृथगुपास्ति

फलकथनं तु क्वचित् श्रुतिकन्यायेन स्तुत्यर्थं भविष्यति अथ व्यस्तोपास्तिलाभाय वाक्यभेदोऽभ्य
सुपगम्येत तदा प्रत्येकोपास्तिनिंदावचनानि कथं समर्थयाया निंद्यात दिग्नप्रकोपा
स्त्वयः मूर्धा ते व्यपदिष्यतीति शिरोमात्रोपासनं निंद्यते तस्मात्समस्तोपासनमेव विव
क्षितं॥ ॥नानाशब्दादिभेदात्॥ ॥३३२३॥ अत्र संस्त्रिंचाधिकरणमारचयति नानैव
तन्निद्यं तेषां शांडिल्यदहरादयः। समस्तोपासनं श्रेष्ठा ब्रह्मैक्यादप्यभिन्नता॥१॥ दस्तौ
पास्येश्यैकत्वात् गुणैर्ब्रह्म पृथक्त्वतः। दहरादीनि भिन्नानि प्रथकूपक्रमात्॥
२॥ छांदोग्ये दहर[illegible]विद्यायां शांडिल्यविद्यामधुवि[illegible]दयः पठिताः॥ तथा शाखांत वमा
रेष्वपि तत्र पूर्वाधिकरणन्यायेन समस्तोपासनस्य श्रेष्ठत्वाद्वेद्यस्य ब्रह्मण एकत्वा
च्च सर्वासामेकविद्यात्वमिति प्राप्ते ब्रूमः॥ आनेतासु विद्यास्वेकीकरणे नानुष्ठातुं नाव

टे

दहराकं इति विद्याभेदोप्यस्तुपगंतव्यः न च वेद्यस्य ब्रह्मण एकत्वं शंकनीयं गुणभेदेन भेदो
पपत्तेः। न चैकस्या विद्याया ध्येयत्वानि श्रुतं मश्राक्याल्पैकस्तुपक्रमोपसंहारयोस्त्वनि
प्रायकत्वात् तस्माद्विद्यानां नानात्वं॥ ।विकल्पोविशिष्टफलत्वात्॥ ॥३३५८॥ चतुस्त्रिं
शाधिकरणमारचयति। अहंग्रहेषु नियमो विकल्पनियमोथवानियामकस्याभावे
नयाथाकाम्यं प्रतीयतां॥१॥ ईशसाक्षात्कृतेस्त्वेकविद्ययैव प्रसिद्धितः। अन्यानर्थक्य
विक्षेपौ विकल्पस्य नियामकौ॥२॥ द्विविधास्तूपासनानि अहंग्रहाणि प्रतीकानि चेति।
आत्मनः सगुणोपासनं अहंग्रहे चतुर्थाध्याये वक्ष्यमाणत्वाद् अहंग्रहणं पुनात्मत्वं निदि
वताद्ध्यायं त्वं लोपास्यमानानि प्रतीकानि तत्राहंग्रहेषु शांडिल्याद्युपासनेषु एकं द्वे ८७
त्रीणि च बहूनि चोपासनानि यथाकाम्येनानुष्ठेयानि विकल्पस्य च नियामकाभावात्

नहि शांडिल्योपासनं दहरोपासनमन्यद्वा एकमेवानुष्ठेयं नेतरदिति विकल्पनियमे किंचि
त्कारणमस्ति तस्माद्यथाकाम्यमिति प्राप्ते ब्रूमः। अन्यानर्थक्यं तावदुक्तं नियामकं तथाहि
ईश्वरसाक्षात्कार उपासनस्य प्रयोजनं तच्चैकेनैवोपासनेन सिध्यतीति ततोऽन्योपासनं वै
यर्थ्यं किं चोपासनं न प्रमाणजन्यः साक्षात्कारः किं तर्हि निरंतरभावनया ध्येयं तदा
त्माभिमानः स चाभिमान एकमुपासनमनुष्ठाय तत्परित्यज्यान्यत्र वर्तमानस्य पुनः प्र
चित्तविक्षेपकत्वं नाम महदीनत्वं ततो अनर्थक्यविक्षेपयोर्नियामकत्वाद्विकल्पो नियम्यते॥ ॥
काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ॥३३६०॥ पंचत्रिंशाधिकर
णमारचयति। प्रतीकेषु विकल्पः किं यथाकाम्येन वा मतिः। अहंग्रहेष्विव तन्न्या
यात्तेनैव विकल्पनं॥१॥ दैवो नूत्नेति वनान्नकाचित्साक्षात्कृतौ मितिः। यथाकाम्यमतो

मीषां समुच्चयविकल्पयोः ॥ २ ॥ प्रतिकोपासनेष्वपूर्वाधिकरणन्यायं इति प्राप्ते ब्रूमः । अस्म
त्वमहंग्रहोपास्यं देवो भूत्वा देवानप्येतीति श्रुतिवचनेन भावनाप्रकर्षवशात्तादात्म्यसाक्षात्कारं
प्राप्य मुक्तो देववत्प्राप्नोतीति यथाहंग्रहेष्ववगम्यते न तथा प्रतीकेषु साक्षात्कारफलत्वे किं
चिन्मानमस्ति साक्षात्कारफलत्वाभावे च तत्र तत्रोक्ता अन्यवस्तुप्राप्तयः फलत्वेनाभ्युप
गंतव्याः तर्ह्यस्ति भिन्नफलत्वान्नान्यानर्थक्यं विद्येपरांकाद्वइरापेता एकप्रतीके केषु
चिद्गुणरूपस्य लक्षणांतरप्रतीकांतरोपासनेष्वावापास्तिजन्यस्यापूर्वस्याविनाशात्त
स्माद्विकल्पेनैकमेव वा वहूनि समुच्चित्य वा यथाकाम्येन प्रतीकमुपासितव्यं ॥ ॥ अं
गेषु यथाश्रयभावः ॥ ॥ ३३ ॥ ६१ ॥ षष्ठिंशाधिकरणमारचयति । समुच्चयोंगबद्धेषु यथा एद
काम्यं न वा मतिः । समुच्चितत्वादंगानां तद्बुद्धेः समुच्चयः ॥ १ ॥ ग्रहं गृहीत्वा स्तोत्रस्यार

महत्वादिवन्न हि ॥ श्रूयते समुच्चावोत्र यथाकाम्यं तथा नवेरोद्धि विधानि प्रतीकानि लौकिका
नि कर्मांगानि च । तत्र लौकिकस्तु निर्णयः पूर्वत्रोक्तः । अत्र कर्मांगेषु समुच्चयो यथाकाम्यं वि
चार्यते तत्र कर्मणि कर्मांगानि समुच्चित्यैवानुष्ठेयं तथा प्रयोगविधिप्रापितानि तथा चांगतंत्र
त्वादंगावबद्धोपासनानामपि समुच्चयनियम इति प्राप्ते ब्रूमः । ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तो
त्रमुपाकुर्यात्स्तुतमनुशंसतीत्यादौ यथा ग्रहस्तोत्रचमसोन्नयनादीनां नियतपौर्वापर्येण सह
भावः श्रुतः न तथोपासनेषु श्रूयते तस्माद्विकल्पसमुच्चययोर्यथाकाम्यं ॥ ॥ इति श्रीवैयासि
कन्यायमालाविस्तरे तृतीयाध्यायस्य तृतीयः पादः ॥ ॥ पुरुषार्थोतः शब्दादिति बादरायणः ।
चतुर्थपादस्य प्रथमाधिकरणमारचयति ॥ ३ ॥ ४ ॥ १ ॥ ॥ कर्त्रर्थमात्मविज्ञानं स्वतंत्रं वात्म
नो यतः देहातिरेकमज्ञात्वा न कर्याक्रतुगं त[illegible]तः ॥ १ ॥ नाद्यस्तद्धीः कर्माहेतुर्हि इति प्रस्तुतकर्म

म

या॥ आचारो लोकसंग्रहार्थस्तत्त्वाबलाधीमता॥ ॥२१॥ आत्मनो देहादिव्यतिरिक्तज्ञानमंतरेण प
रलोकगामित्वानिश्चयात् ज्योतिष्टोमादिप्रवृत्तिरवश्यापादितिकत्वर्थत्वमुपसंस्कारकत्वेनोप
निषदमा[illegible] तत्वज्ञानं कर्मांगमिति प्राप्ते ब्रूमः। द्विविधाद्देहव्यतिरिक्तात्मज्ञानं परलोकगामिकर्त्रा
त्मविज्ञानमेकमद्वितीयं ब्रह्मात्मतत्वज्ञानं चेति तत्र कर्त्रात्मज्ञानस्य प्रवर्तकत्वेपि नाद्वितब्रह्म
तत्वज्ञानं प्रवर्तकं प्रत्युत क्रियाकारकफलनिवर्तकमेव ननु तत्वविदामपि जनकादीनां कर्मप्र
वृत्तिलक्षण आचारो दृश्यते। बाढं लोकसंग्रहार्थोयमाचारस्मात् यदि तत्वविदामपि मुक्तये क
र्माण्यनुष्ठेयानि स्युः कथं तर्हि प्रजादिविषयेर्थ्यश्रुतिरुपपद्येत किं प्रजया करिष्यामो येषां नोय
मात्मायं लोक इति आत्मतत्वरूपस्य लोकस्यापरोक्षत्वे सत्यनात्मलोकसाधनभूतायाः प्रजाया एए
आ विषयेर्थ्यस्तुयात एवं किमर्था वयमध्ये[illegible] महे किमर्था वयं यक्ष्यामहे[illegible] करादरणीयं

षा॰ सा

तस्मात्[illegible]त्मतत्वज्ञानं स्वतंत्रं पुरुषार्थसाधनं न तु कर्मांगं॥ ॥परामर्शं जैमिनिरचोदना चाप
वदति हि॥ ॥३४२॥ अ॰ द्वितीयाधिकरणस्य प्रथममवांतरं रचयति॥ ॥नास्त्यूर्ध्वरेताः
किं वास्ति नास्त्यभावविधानतः। वीरघाती वा विधत्ते[illegible]मावं धपंग्वादिमास्ति हि ॥१॥ अस्य
पूर्वविधेः स्त्वेद्वीरहानग्निको गृही। अंधादेः पृथगुक्तत्वात्स्वस्थानां श्रूयात विधिः ॥२॥ पूर्वाधि
करणे स्वतंत्रमात्मविज्ञानमित्युक्तं तस्य चात्मज्ञानस्योर्ध्वरेतस्सु आश्रमस्य नैष्ठिकब्रह्मच
र्यस्य परामर्शमात्रं गम्यते न तु विधिः[illegible]न्यते न चापूर्वार्थत्वेन विधिः कल्पयितुं शक्य
ते वीरहा वा एष देवानां यो अग्निमुद्वासयते इत्यग्न्युद्वासनलक्षणस्य ऊर्ध्वरेतस्काश्रमे तुल्यत्वा
दाश्रमप्रज्ञावच्छिंत्यूर्ध्वरेता इति प्राप्ते उच्यते विधिर्जावात त्रयो धर्मस्कंधा यज्ञोध्ययनं
दानमिति प्रथमः। तप एव द्वितीयः ब्रह्मचार्याचार्यकुलवासी तृतीयः इत्यत्र यज्ञाद्युपलक्षि

नगार्हस्थ्यपरित्यागस्यनिंदितत्वात् चत्वार आश्रमा इति स्मृतिस्तु गार्हस्थ्यकर्मानधिकृतांध
पंग्वादिविषया न विष्यति नष्टधवया ज्यावेक्षणोपेते कर्मणि अधिकारास्ति नापि पंगो विष्णु
क्रमाद्यनुपातकर्मण्यधिकारः तस्माच्चतुरादिपाटवयुक्तस्य ऊर्द्धरेता आश्रमो नास्तीति प्रा:
से ब्रूमः। ऊर्ध्वरेता आश्रमः विध्यश्रवाणप्यपूर्वार्थात्वनविधेः कल्पयितुं शक्यत्वात् न च
वीरघातदोषः उत्सन्नाग्निकगृहस्थविषयत्वाद्वीरहत्यायाः यत्पंग्वादिविषयत्वं प्रतिपादितं तन्न
दृश्यते अथ पुनरव्रती वा व्रती वा स्नातको वा स्नातको वा उत्सन्नाग्निरनग्निको वा यदहरेव वि
रजेत्तदहरेव प्रव्रजेदिति गार्हस्थ्यानधिकृतानां पृथक् संन्यासविधानात् [illegible] च चतुरादिपाटव
वतां आश्रमांतरविधिः प्रकल्पनीयः जाबालश्रुतावप्युक्तः विधिः प्रत्यक्षं ब्रह्मचर्यं समाप्य १००
गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेदिति तस्मादस्त्याश्रमांतरं॥ ।द्वितीयवर्ण

रो २ क्

कमारचयति॥ ॥लोककाम्याश्रमी ब्रह्मनिष्ठामर्हति वा न वा। यथावकाशं ब्राह्मवद् ज्ञानमर्ह
त्यवारणात्॥१॥ अनन्यचित्तता ब्रह्मनिष्ठासौ कर्मठैः कथं। कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति ने
तरः॥२॥ [illegible] त्रयो धर्मस्कंधा इत्याश्रमानधिकृत्य सर्व एते पुण्यलोका भवंति [illegible] त्या
मानुघायिनां पुण्यलोकमभिधाय ब्रह्मसंस्थोऽमृतत्वमेतीति मोक्षसाधनत्वेन ब्रह्मनिष्ठाप्र
तिपाद्यते स्मर्यं ब्रह्मनिष्ठा पुण्यलोककामिन आश्रमिणोपि संभाव्यते आश्रमकर्माण्यनुष्ठा
य यथावकाशं ब्रह्मनिष्ठायाः कर्तुं शक्यत्वात् नहि लोककामी ब्रह्म न जानीयादिति निषेधो
ऽस्ति तस्माद्भवति सर्वस्याश्रमिणो ब्रह्मनिष्ठेति प्राप्ते ब्रूमः। ब्रह्मनिष्ठा नाम सर्वव्यापारपरित्या
गेनानन्यचित्ततया ब्रह्मणि समाप्तिः न चासौ कर्मठे संभवति कर्मानुष्ठानतत्त्यागयोः
परस्परविरोधात् तस्मात् कर्मत्यागिन एव ब्रह्मनिष्ठा॥ ॥स्तुतिमात्रमुपादानादिति चेन्न॥

पूर्वत्वात्॥ ॥३।४।३॥ ॥तृतीयाधिकरणमारचयति॥ स्तोत्रं रसतमत्वादि ध्येयं वा गुणवर्णना
त्। जुहूरादित्य इत्यादाविव कर्म्मांगसंस्तुतिः॥१॥ विच्छिन्नप्रकरणस्थत्वान्नांगं विध्येकवाक्यता।
उपासीतेति निर्युक्ते ध्येयं रसतमादिकं॥२॥ उद्गीथावयवस्योंकारस्य रसतम आदयो गुणाः
श्रूयंते स एष रसानां रसतमः परम इत्यादिना तत्र रसतमत्वादिकमोंकारस्य स्तुतिः न तु ध्यात
व्यं यथेयमेव जुहूरादित्यः कूर्म्मः स्वर्गो लोक इत्यादौ कर्म्मांगभूताया जुह्वा आदित्यादिरूपे
ण स्तुतिः तथा रसतमत्वादिगुणैरोंकारस्य स्तुतिरिति प्राप्ते ब्रूमः। विषमो दृष्टांतः। जुहूरादि
त्य इत्यादिकं जुहूविधिप्रकरणे पठि[...]तत्वात् स्तोत्रमस्तु रसतमत्वादिकं तूपनिषदि पाठप्र
तीतत्वेन कर्म्मप्रकरणपठितोद्गीथविधिनैकवाक्यत्वाभावान्न स्तावकं किं त्वोमित्येतदक्ष १०१
रमुद्गीथमुपासीतेति नियुक्तेन विहितेन विधिनैकवाक्यत्वाद्रसतमत्वादिकं ध्यातव्यं॥ ॥[...]५॥

स्तुर त्वा

परिप्लवार्था इति चेन्न विशेषितत्वात्॥ ॥३।४।४॥ चतुर्थाधिकरणमारचयति॥ पारिप्लवार्थमाख्या
नं किं वा विद्यास्तुतिः [...]तिः॥ आद्यायानुष्ठानाभावत्वंतन पारिप्लवार्थता॥१॥ मनुर्वैवस्वतो
राजेत्येवं तत्र विशेषणात् तत्र विद्यैकवाक्यत्वमानाद्विद्यास्तुतिर्नावत॥२॥ अथ ह याज्ञव
ल्क्यस्य द्वे भार्ये बभूवतुः॥ जनको ह वैदेह आसांचक्रे इत्यादिकमुपनिषच्छ्रूयमाणमा
ख्यानं पारिप्लवार्थं न भवितुमर्हति अश्वमेधयागे रात्रिषु राजानं पंक्तेडं बहूपाविश्य तस्या
ध्वावेदिकाख्यपाख्यानानि समानानि अध्वर्युणा वक्तव्यानि तदिदं पारिप्लवाख्यं कर्म्म पा
रिप्लवमाचक्षीतेति वाक्येन विहितं तदर्थत्वे [...]सर्वोपनिषदाख्या[...]नानि अनुष्ठाना
प्याप्युज्येरन् उपायोऽनुष्ठानं विद्यास्तुतेः तस्मात्पारिप्लवार्थमिति प्राप्ते ब्रूमः॥ प्रथमे ह
नि मनुर्वैवस्वतो राजा इत्यादिदिष्ट एव नियमो वैवस्वतो राजेत्याद्याख्यानानां परिप्लवार्थानां

नि॰ [illegible] स्प तृ॰२ [illegible] तस्वा२

चित्राशित्वादोप[illegible]षदानामाख्यायिकानामंगत्वं न संभवति यं निहित विद्यास्तावकत्वे
तु [illegible]विद्यावाक्यैकवाक्यतालाभात् तस्माद्विद्यास्तावकमाख्यानं॥ ॥आ[illegible]ीधनाद्य
नपेक्षा॥ ॥३४॥ पंचमाधिकरणमारचयति॥ आत्मबोधः फले कर्माण्यपेक्षते नो वाप्यपे
क्षाते अंगिनोंगसापेक्षयाप्य जादिषु दर्शनात्॥१॥ अविद्यातमसो ध्वस्तौ दृष्टं हि
न दीपयोः निरपेक्षं ततोत्रापि विद्याकर्मानपेक्षिणी॥२॥ वि[illegible]तोयं तत्त्वाबोधः स्वफल म
दाने स्वांगत्वेन कर्माण्यपेक्षते अंगित्वान्यथा [illegible] दर्शपूर्णमासवत्॥ यद्यपि प्रथम अ[illegible] यं२
करणे विद्यायाः स्वतंत्रपुरुषार्थत्वप्रतिपादनेन कर्मांगत्वं निवारितं अतो नास्ति देहे[illegible]
अतः कर्माण्यपेक्षो बोध इति प्राप्ते ब्रूमः॥ विमतं ब्रह्मज्ञानं स्वविरोधिनिवर्तने न्यापेक्षं १०२
भवति प्रकाशकत्वात् दीपवत् घटज्ञानवत् [illegible] अयत्वं गित्वहस्तु तत्र कर्मणः कीदृशमंगि

त्पा१

त्वमभिप्रेतं किं प्रयाजादिवत् [illegible]लोपकार्यंगत्वं उतावघातादिवत् स्वरूपोपकार्यंगत्वं नाद्यः फले
कर्मजन्यत्वेनानित्यत्वप्रसंगात् द्वितीयसाध्यविकलो दृष्टांतः प्रयाजादीनां स्वरूपोपकार्यं
गत्वाभावात् तस्मादुत्पन्ना विद्या स्वफलप्रदाने कर्माणि नापेक्षते॥ सर्वापेक्षा च यज्ञादि
श्रुतेरश्ववत्॥ ॥३४६॥ षष्ठाधिकरणमारचयति॥ उत्पत्तावनपेक्ष्यमुत कर्माण्यापेक्षते
फले यथा नपेक्षैवमुत्पत्तावनपेक्षता॥१॥ यज्ञशांत्यादिसापेक्षं विद्याजन्म श्रुतिर्ब्रूयात्॥
हलेनपेक्षितोप्यश्वो रथेपेक्ष्यतां॥२॥ ब्रह्मविद्या स्वफले यथा कर्माणि नापेक्षते तथ
स्यां चोत्पत्तावपि अन्यथा कचिदपेक्षते कचिन्नेत्यर्धजरतीयन्यायः प्रसज्यत इति प्राप्ते ब्रूमः
नर्धजरतीयादोषोऽस्ति योग्यताविशेषेण कस्मिंश्चित्कार्ये विद्यायाः स्वरूपे सापेक्षत्वयोः संभव
त्वात् यथा लांगलवहनेऽनपेक्षितोप्यश्वो रथवहनापेक्षते तद्वत् न च विद्यायाः स्वोत्पत्तौ

कर्माङ्गपदाय्याश्रमाणामाज्ञानः ॥ तमेतं वेदानुवचनादीनां विविदिषोत्पादनद्वारा बहिरंगसा
त धनत्वावगमात् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति निदिध्या
मा३ सनाणां शमद दीनां विद्यात्यन्तिकालेप्यनुवर्तमानतयांतरंगसाधनत्वावगमात्तस्मा
घ।४ ज्ञादीनि शमादीनि च विद्यास्वोत्पत्त्यावापेक्षात् ॥ ॥ सर्वान्नानुमतिश्च प्राणा त्यये तद्द
र्शनात् ॥ ॥ ३४७ ॥ ससमाधिकरणमारचयति ॥ सर्वा ज्ञानविधिः प्राणविदानुज्ञाय वा
पदि श्चपूर्वाल्लनयसर्वान्नस्तुक्तिर्यदनुर्विधीयते ॥१॥ श्वाद्यन्नभोजनाशंकेः शास्त्राचापो
ज्ञावारणात् ॥ आपदि प्राणरक्षार्थमेवानुज्ञायतेखिलं ॥२॥ प्राणविद्यायां श्रूयते । न ह
वा एवंविदि किंचनानन्नं भवतीति । प्राणोपासके नेनोक्तमयोग्यं न किंचिदस्तीत्यर्थः । त १०३
त्र सर्वान्नानुज्ञानस्य मानांतरेणप्रामत्वात् प्राणोपासकस्य तद्विधीयत इति प्राप्ते ब्रूमः ॥

मि
यदिदं किंचाश्वभ्य आ भ्य आकीटपतंगभ्यस्तत्तेन्नमिति श्वादिभोज्यमन्नमुपासकस्य
भोज्यतया विधीयते न च तद्विधातुं शक्यं यतो नरस्य नरस्य विनाशशास्त्रं सर्वान्नविधेर्बाध्य
व तत्तस्मादापदि यावता प्राणरक्षा भवति तावन्मात्रं निषिद्धान्नमभ्यनुज्ञायात् अत एव चाक्र
यणो मुनिः प्राणात्यये प्राप्तपरं पितामहगजपालको ढिष्टान् कुल्माषान् भक्षयित्वा शू
द्वानां उच्छिष्टमुदकं न पपौ । तत्रोच्छेष्टकारणं चावोचत् । न वा अजीविष्यमिमा खादन्नि
ति कामो म उदकपानमिति च तस्मादापदि सर्वान्नभक्षणाभ्यनुज्ञानं ॥ ॥ विहितत्वाच्चाश्र
मकर्मापि ॥ ॥ ३४८ ॥ अत्र माधिकरणमारचयति । विद्यार्थमाश्रमार्थं च द्विप्रायागो ऽ
थवा सहता प्रयाजनवि दे न प्रयोगोपि विनिद्यते ॥१॥ आद्य तु कार्यान्न स्याद्विध न २
र्थनाश्र त्वया । अनित्यनित्यसंयोगत्व कीर्त्यांस्वादि रमतः ॥२॥ यानियज्ञादीनि वि
म

द्याहेतुत्वेन विविदिषावाक्ये विहितानि तान्येवाश्रमधर्मत्वेन पूर्वकांडे विहितानि तेषां प्र
योजनार्हविद्या तद्धि स्तुष्टात्मिति प्राप्तं ब्रूमः ॥ यथाश्रमादानाज्जानंतदृप्तिर्नांतरीयकतया
सिद्ध्यति तथा विद्यार्थमनुष्ठितैः कर्मभिराश्रमकर्मसिद्ध्यतु न च विद्याहेतूनां काम्यत्वात्
आश्रमधर्माणां च नित्यत्वात्सहत्वयोगे नित्यानित्यसंयोगविरोध इति वाच्यं वचनद्वय
बलेनैकस्य कर्मण आकारद्वयोपपत्तेः ॥ यथा खादिरो यूपो भवति खादिरं वीर्यकामस्य
यूपं कुर्वीत यत्र वचनद्वयेनैकस्य नित्यत्वं काम्यत्वं च तद्वत्तस्मादुभयविधमनायशारी
नां सहनाद्वप्रयोगः ॥ ॥ अंतरा चापि तु तद्दृष्टेः ॥ ॥३४०॥ नवमाधिकरणमारचयति ।
नाम्य नाश्रमिणो ज्ञानमस्ति वाथ नैव विद्यते ॥ धीशुद्ध्यर्थाश्रमित्वस्य ज्ञानहेतोरभावतः ॥ १०८
१॥ अस्त्येव सर्वसंबंधि जपादेर्धीविशुद्धितः ॥ श्रुता हि विद्या रैक्वादेराश्रमेत्वतिष्ठतः ॥२॥

पूर्वमाश्रमं परिसमाप्य केनापि कारणेनोत्तरमाश्रममप्रतिपन्नो नाश्रमी स्नातकविधुरादि
तस्य तत्त्वज्ञाने न संन्यासात् बुद्धिशुद्धिहानाराश्रमस्याभावादिति प्राप्तं ब्रूमः ॥ संभवत्येवा
नाश्रमिणामपि ज्ञानं आश्रमनिरपेक्षस्य जपादेर्बुद्धिशुद्धिहेतुत्वात् जप्येनैव तु संसिद्ध्ये
त् ब्राह्मणो नात्र संशय इति स्मृतेः ॥ श्रुतिश्च संवर्गविद्यायामधिकामानाश्रमिणां विवा
हार्थिनो रैक्वस्य ॥ एवमाश्रमरहिता गार्ग्यादय उदाहार्याः ॥ नचैवं सत्याश्रमवैयर्थ्यं शुद्ध्याति
शयार्थत्वात् तस्मादनाश्रमिणामपि संभवत्येव ज्ञानं ॥ ॥ तद्भूतस्य तु नातद्भावो जैमिने
रपि नियमातद्रूपाभावेभ्यः ॥ ॥३४१॥ दशमाधिकरणमारचयति ॥ अवरोहोस्त्याश्रमिणां
न वा रागात्स विद्यते ॥ पूर्वधर्मश्रद्धया वा यथाचारात्त्वतोत्थिकः ॥१॥ रागस्यातिनिषिद्धत्वा
द्विहितस्यैव धर्मतः ॥ अवरोहनियमोक्त्यादेर्नावरोहो स्मृत्याचारतः ॥२॥ ब्रह्मचर्यं समाप्य गृ

हीनवेजरादक्षीभूत्वा प्रव्रजेत् इत्याश्रमाणामारोहस्य श्लाघनीयत्वान्न वनित्वापारिव्राज्या
द्वनस्थ इ ॥ यद्यवरोहेपि कश्चिद्रागवशात् कश्चित्पूर्वाश्रमकर्मश्रद्धावशाच्च प्रवृत्त इति प्राप्ते
ब्रूमः ॥ रागस्तावन्मिथ्याज्ञानमूलत्वादतिनिषिद्धः न च पूर्वाश्रमधर्मश्रद्धा युज्यते उत्तरा
च श्रमिणं प्रति अविहितत्वेन धर्मत्वाभावात् न हि यायावरत्वानुष्ठानं वाक्यात् कश्चिदीयते च स
तस्य धर्मो भवति किं तर्हि यायावरं प्रति विहितः स तस्य धर्मः किं च ततो न पुनरारत्यादिप्तवरोह
निषेधेनारोहो नियम्यते न चारोहवदवरोहः शिष्टाचारादवगम्यते तस्मान्नास्त्यवरोहः ॥ न
चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ॥४१॥ ॥ एकादशाधिकरणमारच
य …तेति । चन्द्रोर्ध्वरेतसां नास्ति प्रायश्चित्तमथास्ति वा । अदर्शनात्कर्णास्य वक्ष्यतीनोगर्हनः १०५
…॥१॥ उपपातकमस्त्वितरवृत्तिनो मधुमांसवत् ॥ प्रायश्चित्तात् संस्काराच्छुद्धेर्यत्नप

पञ्चः२

त

रं वचः ॥२॥ नैष्ठिकब्रह्मचर्यादूर्ध्वरेतस्त्वं प्राप्य पुनः स्त्रीसंगेन च्युतस्य प्रायश्चित्तं नास्ति । आ
रूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः प्रायश्चित्तं न पश्यामि येन शुद्ध्येत् स आत्महेति प्रा श्री
यश्चित्तादर्शनवचनात् अथाप्यब्रह्मचारी स्त्रियमुपेयात् स गार्दभं पशुमालभेतेत्यस्ति प्रा
श्चि यश्चित्तमिति उच्येत तन्न तस्य प्रतिविषयत्वात् उपकुर्वाणकस्यायं वेदाध्ययनांगत्वेन
ब्रह्मचर्यव्रतमनुतिष्ठति तद्विषयमिदं प्रायश्चित्तवचनं तस्मादूर्ध्वरेतसां च्युतस्य न प्राय
श्चित्तमिति प्राप्ते ब्रूमः ॥ यथोपकुर्वाणकस्य मधुमांसभक्षणमुपपातकं इति प्रायश्चित्त
पुनः संस्कारो विधीयते तदूर्ध्वरेतसां गुरुदारादिभ्योऽन्यत्र प्रवृत्तिरुपपातकमेव न तु म
हापातकं ततः प्रायश्चित्तात्पुनः संस्काराच्च शुद्धिर्भवति यदि महापातकेषु परिगणितं
त्वेनोपपातकत्वमाश्रित्य प्रायश्चित्तमुच्यते तर्हि अदर्शनवचनस्य का गतिरिति चेद्यत्र

त

परंतद्वाक्यं इति ब्रूमः ॥ अत एव प्रायश्चित्तं न पश्यामीत्याह ॥ न नु नास्तीति प्रायश्चित्तं गर्द
भपशुरवब्रह्मचारित्वस्य संभवात् तथा वनस्थपरिव्राजकयोरपि त्वाद्या प्रायश्चित्तं स्म
र्यते वा न आरूढादीनां नादन्सवृद्धादशरात्रं चरित्वा महाकृच्छ्रं वर्द्धयेत् इति स्मृर्व नस्थवत्यो
महृद्विवर्धमिति कस्तद्विर्वनावापः सोमवृद्धिरपि स्याएच ॥ ॥ वहिस्सूत्र[illegible] यथापि स्मृते रा
वाराद्य ॥ ॥ ३।४।१२॥ द्वादशाधिकरणमारचयति ॥ शुद्धः शिष्टैरुपादेयस्मानोवादोषहानि
तः ॥ उपादेयोऽन्यथाशुद्धिः प्रायश्चित्तं नवदृश्या ॥१॥ आमुष्मिक्येव शुद्धिः स्यात्ततः शिष्टात्यजं
तितं प्रायश्चित्ते चाहाहृष्टिवाक्यादशुद्धिस्तेहिकी मता ॥२॥ पूर्वोक्तप्रायश्चित्तेनापादितशुद्ध
स्याप्यनुपपन्ना तत प्रायश्चित्तस्य व[illegible]शिष्टैः सह व्यवहारोऽस्तीति प्राप्ते ब्रूमः आमुष्मिक १०६
शुद्धिसद्भावेऽपि प्रायश्चित्तादर्शनवचनादैहिकशुद्ध्यभावाच्छिष्टैरपि न व्यवहार्यः ॥ ॥८॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ॥३।४।१३॥ त्रयोदशाधिकरणमारचयति ॥ अंगध्याने यजमा
नमार्त्विज्यं वा यतः फलं ॥ ध्याने तु एवं स्तुते तस्माद्यजमानमुपासनं ॥१॥ ब्रूयादेवंविदुद्गाता ला
र्त्विजत्वे स्तुतं श्रुतं ॥ क्रीतत्वादृत्विजास्तेन तत् स्वामिकृतं भवेत् ॥२॥ अंगावबद्धेषूपासनेषु
यजमान एवानुष्ठाता न त्विजः ध्याने तु फलश्रवणात् फलं तु यजमानस्यैवोचितं स्वामिलाभ
लिनो यजमानस्य वेषसार्थत्वमिति प्राप्ते ब्रूमः एवंविदुद्गाता ब्रूयादिति वाक्यशेषे उद्गातृः
पासकत्वं स्पष्टं श्रूयते ॥ ॥ उक्तं चैतत् तत्त्विजामेष कर्तव्यानुष्ठाना यत्र मानेन क्रीतत्वात्त ज ४
स्मादृत्विग्भिः कृतमपि यजमानेनैव कृतमिति फलत्वोपपत्तेरुपासनमृत्विजां [illegible] कर्म ॥ ॥ ज
सहकार्यन्तरविधिः पाक्षिकेण तृतीयेन ज्ञानाविध्यादिवत् ॥ ॥३।४।१४॥ चतुर्दशाधिकरणमार
चयति ॥ अविधेयं विधेयं वा मौनं तन्न विधीयते ॥ प्राप्तं पांडित्यतो मौनं ज्ञानव[illegible]न्मयं यत ॥१॥ यु १

निरंतरज्ञाननिष्ठामौनं पांडित्यतः पृथक् [illegible] विधेयं तद्वदुक्तिश्चाद्वल्येतन्निदर्शनाय ॥२॥ कहोल

ब्राह्मणे श्रूयते तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन [illegible] तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्या

थ मुनिरिति ॥ अस्यार्थः ॥ यस्मात् ब्रह्मज्ञानावगमः परमपुरुषार्थस्तस्माद्ब्रह्मवुच्छ [illegible] पुरूपनिष्पा

द्य निर्णयरूपं पांडित्यं च निःशेषेण संपाद्य बालवद्वीरागादूषिताद्बलेन युक्तः अयं जावनानि

त्या निराकरणाय मुक्तीरन्तु चिंतयन्नवस्थातुमिच्छेत् । तत्पांडित्यबाल्ये निःशेषेण संपाद्य

[illegible]र्थं [illegible] निरिति तत्र संदेह इति विध्यश्रवणान्मुनित्वं न विधेयं न च विधिः कल्प्यमिंतुंश्चाकः

पांडित्यशब्देन ज्ञानस्य मौनस्यापूर्वत्वाभावात् पंडितस्य विद्याभावः पांडित्यमिति ज्ञान

वाचकत्वं शब्दः तथा मुनिशब्दोपि मननज्ञानवृत्तिस्वत्वाद्दानोस्तन्निष्पत्तेः तस्मान्मौनस्य मौन १०१

स्य न विधिकल्प[illegible]नमिति प्राप्ते ब्रूमः ॥ बाल्यादिवत्पांडित्यस्य तु न मुनिशब्देनाभिधानमस्त्येव

मु ४

ब्दे

नात्मज्ञानविनिरंतरज्ञाननिष्ठापूर्वोर्थो मुनिशब्देन विवक्षितः ततस्तिष्ठासेदिति पदानुवृत्त्या विधिर्लभ्य

ते अतिज्ञाननिरंतरत्वेन प्रयोजनप्रबलभेदवासनावारितस्य तन्निवृत्त्यर्थत्वात्तस्मान्निदिध्यास

नात्मकं मौनं विधेयं ॥ ॥अनाविष्कुर्वन्नन्वयात् ॥ ॥३।४।५०॥ पंचदशाधिकरणमारचयति ॥ ॥

बाल्यं वयः कामचारो धीशुद्धिर्वा स्विदिति ॥ वयस्तस्याविधेय[illegible]त्वे कामचारस्तु नेष्यते ॥१॥ म

न नास्यापशुक्तं [illegible] चारस्तावच्छुद्धिर्विवक्षिता ॥ अत्यंतानुपयोगित्वाद्विरुद्धत्वाच्च न द्वयं ॥२॥ बाल्ये

न तिष्ठासेदित्यत्र बालस्य भावो बाल्यमिति व्युत्पत्त्या वयो न वेत अथ तस्य विधानं तर्हि बा

लस्य कामचारित्वं तथा कामचारवादादि कर्म तु सर्वथापि न धीशुद्धिर्बाल्यमिति प्राप्ते ब्रूमः । पां

डित्यमौनाभ्यां श्रवणनिदिध्यासनयोर्मोक्षमनननतिधेयत्वे न तु तुल्यविवक्षितं तस्माच्च नाव

शुद्धिरुपयुक्ता रागद्वेषमानापमानादिराहित्येन बहिःप्रकटनरूपं परित्यज्य मनोऽभिमानशाकल्यात् बा

तुम

म२७

त्वस्य कर्मभिस्तूत्पत्तिस्तु यथेच्छाचारेणावस्थितो चयमानावयः कामचारोऽनुमननं स्यात्पंतमनुप्रसक्तौ
प्रस्तुतविरोधिनो मूढस्य बहिःप्रवृत्तस्य कामचारः मननविनाशकत्वात् तस्मान्नावस्तुद्विरस्वबा
त्येनतरऽजयं॥ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात्॥ ॥३।४।१६॥ षोडशाधिकरणमारभ्यति
ॐ इहैव नियतज्ञानं प्राप्तिर्वा नियम्यते। तथानिसंधेयज्ञादिःदीनां विविदिषा जनौ॥ १॥ अस्ति
प्रतिबंधे न ज्ञानं जन्मांतरेऽन्यथा॥ श्रवणायेत्यादिशास्त्राद्वामदेवाद्भवादपि॥ २॥ श्रवणमनन
निदिध्यासनैरनुष्ठीयमानेषु अस्मिन्नेव जन्मनि ज्ञानं जायत इति नियमस्तेन न्विहवा जन्मांतरे चै३
वेति कालविकल्पः कुतः श्रवणादिषु प्रवर्तमानस्य पुरुषस्य तत्काया हि कज्ञानविषयत्वात् ऐहि
कमेव विद्या जायतामित्यभिसंधाय पुरुषः प्रवर्तीत न चाहष्टफलानां यज्ञादीनां तत्साधनत्वेन १०८
स्वर्गवज्जन्मांतरज्ञानोत्पत्तिः शंकनीया श्रवणादिप्रवृत्तेः प्रागेव विविदिषामुत्पाद्य यज्ञादी

नि३ लक्ष्म:२

नां चरितार्थत्वात् तस्मादैहिकत्वेन ज्ञानोत्पत्तिर्नियम्यत इति प्राप्ते ब्रूमः॥ असति प्रतिबंधे ज्ञान
मिहैव संभवति सति प्रतिबंधे त्वनुष्ठितैः श्रवणायापि बहुनिर्यानि दिग्भिः जन्मांतरपि ज्ञानमु
त्पद्यते प्रतिबंधश्च बहुविधः श्रूयते श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोऽपि न विद्युरिति आ
श्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति न च पूर्वजन्मानुष्ठितैः श्र
वणादिभिर्जन्मांतरज्ञानोत्पत्तिर्न दृष्टचरी वामदेवस्य गर्भ एवावस्थितस्य ज्ञानोत्पत्तिश्रवणा
त् गर्भे एवैतच्छयानो वामदेव एवमुवाचेति श्रुतेः तस्मादिह जन्मांतरे वा ज्ञानोत्पत्तिः॥ ॥
एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥ ॥३।४।१७॥ सप्तदशाधिकरण
मारचयति॥ मुक्तिः सातिशया नो वा फलत्वाद् ब्रह्मलोकवत् स्वर्गवत् ... नांतरेण मुक्तिः सातिश
या वहि॥ ब्रह्मैव मुक्तिर्न ब्रह्मकविस्यातिशयं श्रुतं॥ अत एकविधा मुक्तिर्वेधसा मनुजस्य वा॥ १

धा२

यथा ब्रह्मलोकाख्यं फलं सालोक्यसारूप्यसामीप्यसार्ष्टिभेदेन चतुर्विधं तत्र सार्ष्टिर्नाम चतुर्मुख
समानैश्वर्यवत्त्वं यथा वा कर्मभूयस्त्वात्फलभूयस्त्वमिति न्यायेन स्वर्गो बहुविधः तथा मुक्ते
रपि फलत्वाविशेषात्सातिशयत्वमिति प्राप्ते ब्रूमः । मुक्तिर्नाम निजसिद्धब्रह्मस्वरूपमेव न स्वर्ग
वदागन्तुकं किंचिद्रूपमिति वक्ष्यते ब्रह्मचैकविधत्वेन श्रुतं निर्णीतं च तस्मादन्तर्मुखस्य मनुष्य
स्य मुक्तिरेकविधैव सालोक्यादिविशेषस्तु जन्मरूपत्वात्तदुपासनातारतम्येन सातिशयो
भविष्यति मुक्तिस्तु न तादृशीति सिद्धं ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थ
मुनिप्रणीतायां वेदान्ताधिकरणमालायां तृतीयाध्यायस्य चतुर्थः पादः ॥ ॥ तृतीयाध्यायः समा
प्तः ॥ ॥ आवृत्तिरसकृदुपदेशात् ॥ ॥४।१।१॥ चतुर्थाध्यायस्य प्रथमपादे प्रथमाधिकरणमार १०९
चयति ॥ ॥ श्रवणाद्याः सकृत्कार्या आवृत्त्या वा सकृद्यतः । शास्त्रार्थस्तावता सिद्धः प्रयाजादे

रसकृत्कृतेः ॥१॥ आवृत्त्या दर्शनान्तास्तु तण्डुलानामवघातवत् । दृष्टेऽत्र संभवत्यर्थे नादृष्टं कल्प्यते बुधैः
॥२॥ सकृत्कृते कृतः शास्त्रार्थ इति न्यायेन श्रवणादीनां प्रयाजादिवत्सकृदेवानुष्ठानमिति प्राप्ते
ब्रूमः । उक्तन्यायस्यादृष्टफलविषयत्वादत्र ब्रह्मसाक्षात्काररूपस्य दृष्टफलस्य संभवाद्दृष्ट
संभवत्यदृष्टं न कल्पनीयमिति न्यायेनावघातवत्फलपर्यन्तं श्रवणाद्या आवर्तनीयाः ॥ ॥ आत्मे
ति तूपगच्छन्ति ग्राहयन्ति च ॥ ॥४।१।३॥ द्वितीयाधिकरणमारचयति ॥ ज्ञातुः स्वात्मतया ब्रह्म ग्राह्य
मात्मतयाऽथवा । अन्यत्वेन विजानीयाद्दुःखित्वादिविराधितः ॥१॥ औपाधिको विरोधोऽत आत्मत्वे
नैव गृह्यतां गृह्णन्त्येवं महावाक्यैः स्वशिष्यान्ग्राहयन्त्यपि ॥२॥ यच्छास्त्रप्रतिपाद्यं ब्रह्म तज्जीवे
न स्वात्मत्वस्य [illegible] तिरिक्ततया गृहीतव्यं दुःख्यदुःखिनोर्जीवब्रह्मणोरेकत्वविरोधादिति प्राप्ते ब्रूमः ।
वस्तुनो ब्रह्मरूपस्यैव सतो जीवस्यान्तःकरणोपाधिकृतो दुःखित्वादिः संसारिधर्म इति वि[illegible] ज्ञो

वाविचारेऽप्रपंचितेऽतो वास्तवविरोधाभावादात्मत्वेनैव ब्रह्मग्रहणं। अत एवाहं ब्रह्मास्मि अ-
यमात्मा ब्रह्मेत्यादिमहावाक्येष्वात्मविदश्चात्मत्वेनैव ब्रह्मग्रहणं। तथा तत्त्वमसीति महावाक्ये ः
स्वशिष्यान्ग्राहयंत्यपि तस्मादात्मत्वेन ब्रह्मग्रहीतव्यं॥ ॥न प्रतीके न हि सः॥ ॥४।१।४॥ इती
याधिकरणमारचयति। प्रतीकेऽहंदृष्टिः स्यान्नवा ब्रह्माविभेदतः। जीवप्रतीकयोर्ब्रह्मद्वारा हं-
दृष्टिरिष्यतां॥१॥ प्रतीकत्वोपास्यकत्वहानिर्ब्रह्मैक्यवीक्षणे। अवीक्षणे तु भिन्नत्वान्नाहंदृ- ब्रा
ष्टिर्यायुज्यतां॥२॥ मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादिषु ब्रह्मदृष्ट्यायं स्तं तं मनः आदित्या-
दिप्रतीकमुपास्यं तच्च प्रतीकमुपासकेन स्वात्मतया ग्रहीतव्यं प्रतीकस्य ब्रह्मकार्यत्वेन ब्र-
ह्मणा सहाभेदाज्जीवस्य ब्रह्माभिन्नत्वात् ब्रह्मद्वारोपास्यप्रतीकस्योपासकजीवस्य ११०
चैकदा जीवैनिकत्वयंजवादिति प्राप्ते ब्रूमः। यदि ब्रह्मकार्यस्य प्रतीकस्य ब्रह्मैक्यमवलो-

क्यते तदा प्रतीकस्वरूपमेव विलीयते घटस्य मृद्रूपेणैक्ये विलयदर्शनात्। यदि च जीवस्य ब्रह्मै-
क्यमवलोक्येत तदा जीवत्वापायेनोपासकत्वं हीयेत आश्रयापायस्यापासकस्वरूपालोपे
न कार्यकारणत्वं जीवब्रह्मैक्यं च न पर्यालोच्यते गोमहिषवदत्यंतभिन्नयोः प्रतीकोपा- जो
सकयोर्नास्त्येकत्वयोग्यता। तस्मान्न प्रतीकेऽस्मदहंदृष्टिः॥ ब्रह्मदृष्टिरुत्कर्षात्॥ ॥४।१।५॥ ॥
चतुर्थाधिकरणमारचयति। किमन्यधीर्ब्रह्मणि स्यादन्यस्मिन्ब्रह्मधीरुत। अन्यदृष्ट्योपास-
नीयं ब्रह्मात्र फलदत्वतः॥१॥ उत्कर्षेति परत्वान्न्याब्रह्मदृष्ट्यान्यचिंतनं। अन्योपास्यं फल-
दं तु ब्रह्मातिथ्याद्युपास्तिवत्॥२॥ मनो ब्रह्मेत्यत्र ब्रह्मरूपमनादृष्टिं ब्रह्मणि कृत्वा ब्रह्मो-
पासनीयं ब्रह्मणः फलप्रदत्वान्नापाद्यतरत्वादिति प्राप्ते ब्रूमः। महद्ब्रह्मण उत्कृष्टत्वात् ८
निकृष्टमनसि कर्तव्या लौकिका निकृष्टे ह्युत्कृष्टराजदृष्टिं कृत्वा राजवत्तं पूजयंति। किंच म

मो ब्रह्मेत्युपासीतेति अत्र ब्रह्मशब्द इतिशब्दपरत्वेन दृष्टिलक्षको [ ]न विष्यति मनःशब्दश्चा
तिपरत्वात्तु स्वार्थवाची यथा स्थाणुश्चोर इति प्रतीत्य[ ]त्र स्थाणुशब्दात्तु स्वार्थवाची चोर
शब्दाद्दृष्टिलक्षकस्तद्वत्। न चाब्रह्मरूपस्य मनस उपास्यत्वे ब्रह्मणः फलप्रदत्वानुपपत्तिः अ
ब्रह्मरूपस्यातिथिरूपास्यत्वे कर्माध्यक्षत्वेन यथा फलं प्रयच्छति तद्वदत्रापि संभवात् तस्माद
ब्रह्मणि प्रतीके ब्रह्मधीः कर्तव्या॥ ॥आदित्यादिमतयश्चांग उपपत्तेः॥४।१।६॥ पंचमाधिक
रणमारचयति॥ आदित्यादावंगदृष्टिरंगे रव्यादिधीः कृता नो कर्मणां ब्रह्मजत्वेन ह्यायात्तेन हि की
मतिः॥१॥ आदित्यादिधियांगानां संस्कारैः कर्मणः फलोत्कृष्ट्यातिशयस्तस्मादंगेष्वादित्यादि
दृष्टयः॥२॥ य एवासौ तपति तमुद्गीथमुपासीत अत्रादित्यदेवतां प्रतीकं कृत्वा कर्मांगभूतोद्गी १०१
थ[ ]दृष्टिः कर्तव्या विपर्ययेण वा कर्मांग आदित्यदृष्टिरादित्यो उद्गीथाया ब्रह्मकार्यत्वमपूर्ववा उ०भा०
१

घ

धिकरणे ऽपकर्षन्यायानवतारेण नियामकाभावादिति प्राप्ते ब्रूमः॥ आदित्यदृष्ट्या कर्मांगं संस्क
र्तव्यं तथा सति दृष्टिभिः संस्कृतस्य कर्मणः फलातिशयसंभवात्। विपर्यये तु कर्मांगैरादित्ये दे
वतायां संस्कृतायां किं तत्फलं भवति न हि क्रियात्मिका देवता फलस्य साधनं भविष्यति अन्यथा
देवतायाः साधारणत्वेन यजमानाय[ ]जमानयोः साधारणफलत्वप्रसंगात्। तस्मादंगेष्वा घा
दित्यादिदृष्टयः कर्तव्याः॥ ॥आसीनः संभवात्॥ ॥४।१।७॥ षष्ठाधिकरणमारचयति। नासा
सनस्य नियम उपास्त्यामु तत्र विद्यते। न देहस्थितिरप्यत्र मनो ऽतो नियमो न हि॥१॥ शयनोत्थानग
मनैर्विक्षेपस्यानिवारणात्। धीसमाधानहेतुत्वात्परिशिष्यत आसनं॥२॥ आसीनानिवाप
स्थितत्वमिति नास्ति नियमः। मानसव्यापारत्वाद्दृष्टितिविचारस्यानुपयुक्तत्वादिति प्रा
प्ते ब्रूमः। परिशेषादासनं नियम्यते तत्र हि भगवता बादरायणेनोपासितुं शक्यं अकस्मान्निद्रया

न्तिस्मृतिसंभवात्।नाप्युत्थितेनगच्छतावादेहधारणमार्गनिरूपणव्यापारेणचित्तस्यविक्षिप्
त्वात्अतआसीनेनैवोपासितव्यं॥ ॥यत्रैकाग्रतातत्राविशेषात्॥ ॥४९७॥सप्तमाधिकर
णमारचयति।दिग्देशकालनियमोविद्यातथनविद्यते।विद्यतेवैदिकत्वेनकर्माङ्गत्वस्यदर्श
नात्॥१॥एकाग्र्यस्याविशेषेणदिगादिर्ननियम्यते।मनोऽनुकूलइत्युक्तेर्दृष्टार्थत्वाद्दशानापूर्णं॥
२॥ब्रह्मयज्ञेनयक्ष्यमाणःप्राच्यांदिशिइतिदिङ्नियमःप्राचीनप्रवणेवैश्वदेवेनयजेतेति
यमः देशनि[यमः]अपराह्णेपिंडपितृयज्ञेनचरंतीतिकालनियमःतद्वत्नियमत्रयंयथाकर्मणिदृ
श्यतेतथोपासनेपिद्रष्टव्यंवैदिकस्याविशेषात्इतिप्राप्तेब्रूमः।एकाग्र्यंहिध्यानस्यप्रधा
नसाधनंनचतस्यदिगादिनियामकंकिंचिदस्तिशास्त्रेविद्यतेअतोनास्तिनियमःअतएव ११२ दिगा० दि
श्रुतिः।योगाभ्यासायप्रदेशंनिर्दिशंतीमनोऽनुकूलइत्येवाहयस्मिन्देशेसौमनस्यंतत्रै

वयुंज्यात्नतुशास्त्रेणनियमितःकश्चिद्देशोऽस्तीत्यर्थः।समेशुचौशर्करावह्निवालुकाविवर्जित
इतियाशाखान्यासायदेशविशेषणात्निश्चीयते।तस्मान्नास्तिदिगादिनियमः॥ ॥आप्रायणा
त्तत्रापिहिदृष्टं॥ ॥४९८॥अष्टमाधिकरणमारचयति।उपास्तीनांयावदिच्छमावृत्तिःयावदु
तामृति॥उपास्त्यर्थाज्जनिष्पत्तेर्यावदिच्छंनतूपरि॥१॥अंत्यप्रत्ययतोजन्मगम्यतस्तत्प्रसिद्धये
आमृत्यावर्तनंन्याय्यंसदातद्भावभावितः॥२॥विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्र
वाहरूपास्मृतिःशास्त्रार्थःसचकियतापिकालेनसंपद्यते।अतोयावदिच्छमावृत्तिःनत्वामरणमि
तिप्राप्तेब्रूमः।नाविजन्मनःप्रयोजकोंत्यःप्रत्ययःआमरणावृत्तिमंतरेणनसुलभःअतएव
स्मृतिःसदातद्भावभावितइत्याहकथंतर्हिज्योतिष्टोमकर्मणास्वर्गगमनांत्यप्रत्ययःकर्मजन्या
पूर्ववदितिब्रूमः।उपासनेष्वप्येवमस्त्वितिचक्षाणैस्तावतानिरंतरावृत्तिलक्षणोद्वेषापायः
२

परित्याज्यो नवत्यन्यथासर्वस्यसुखदुःखादेरपूर्वजन्यत्वेन मोक्षनाशप्रसंगः प्रयत्नस्त
उपेततत्तोऽदृष्टोपायत्वादामरणमावर्तनं कर्तव्यं यद्यप्यतान्यष्टावधिकरणानि साधनविचार
त्वात्पूर्वाध्यायस्यैव योग्यानि तथापि फलसंबंधात्तन्नसाधनत्वात्फलाध्याय चिंतानि॥ ॥तदधि
गम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥ ॥४।१।१३॥ नवमाधिकरणमारचयति।
ज्ञानिनः पापलेपोऽस्ति नास्ति वानुपभोगतः। अनाश इति शास्त्रेषु पापलेपस्य विद्यते॥१॥
अकर्त्रात्मधिया वस्तुमहिम्नैव न लिप्यते। अश्लेषनाशावप्युक्तो तेषोषस्तु मार्थकः॥२॥
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति पापाविनाशस्य सर्वशास्त्रप्रसिद्धत्वात् ब्र
ह्मज्ञानिनाप्यस्ति पापलेप इति प्राप्ते ब्रूमः। तत्र तावन्निर्गुणब्रह्मात्मतत्त्वविदः पापलेपशं
कापि नोदेति नाकार्षं न करोमि न करिष्यामीति कालत्रयेप्यकर्तृब्रह्मस्वरूपत्वेन निश्चि

चारि

शोभाजू व

११२

तत्वात् न ह्यकर्त्रात्मपं मंत्राऽपि लिंके तेनापि सगुणविदो लेपोऽस्ति अश्लेषविनाशयोः श्रुतत्वात्।
ब्रह्मसाक्षात्कारात् हृदा हृदि यव्यवहार व्यात् संभावितस्य पापस्याश्लेषः श्रूयते। तद्यथा
पुष्करपलाश आपो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यत इति दहाकारात्पूर्वं लिह जन्म
निजन्मांतरेषु च संचितस्य पापसंघस्य विनाशः श्रूयते तद्यथेषीकातूलमग्नौ प्रोतं प्रद
यतेवं हास्य सर्वे पाप्मानः प्रदूयंत इति नाभुक्तं क्षीयत इत्यादि शास्त्रं तु सगुणनिर्गुणब्रह्म
ज्ञानरहितविषयं तस्मान्नास्ति ज्ञानिनः पापलेपः॥ ॥इतरस्याप्येवमसंश्लेषः पाते तु॥ ॥
४।१।१४॥ दशमाधिकरणमारचयति॥ पुण्येन लिप्यते नावा लिप्यते स्यशुभत्वतः। न हि श्रो
तं न पुण्यनाशोक्तं ज्ञानं न विरुध्यते॥१॥ अश्लेषा वस्तुसामर्थ्यात्समानः पुण्यपापयोः। श्रु
तं पुण्यं पापतया नै ...णं च समं ... तं॥२॥ मा भूत् पापालेपः पुण्यालेपस्तु विद्या पुण्यस्य

ते श्रु१ ते१

श्रोतत्वेन श्रोतब्रह्मज्ञानेन सह विरोधाभावादिति प्राप्ते ब्रूमः। अकर्तात्मवस्तुसामर्थ्यात्पा
पवत्पुण्येनापि न लिप्यात्सगुणज्ञानिनस्तूपासनव्यतिरिक्तकाम्यपुण्यं पापवदधर्मजन्म
हेतुत्वात्पापसमाभावतिमत्वा पापानिवदहरविद्यावाक्यगा अपश्रुतिः पराग्रह इति सर्वे
पाप्मानोऽतो निवर्तन्त इति। अस्यायमर्थः। सुकृतदुष्कृतं तत्फलं च सर्ववाक्येयथदनुक्रां
तानसार्वपाप्मानोस्मादुपासकान्निवर्तन्त इति किं च उभेउहैविषएततरतीति पुण्यपापयो
रुभायाज्ञानिनान्तरणं समानमवगूतलस्मात्पापवत्पु नापि न लिप्यात्॥ ॥अनारब्धका ब्र ४
र्यएव तु पूर्वे तदवधेः॥४।१।१५॥ एकादशाधिकरणमारचयति॥ आरब्धेनक्षयावानाकूसं ब्रे ३
चितइव नश्यतः। उभयत्राप्यकर्तृत्वतद्बोधौ सदाशोरवल्लु॥१॥ आदेहपातसंसारश्चे ११५
रत्तु नवादपि॥ इषुचक्रादिदृष्टान्तात्सिवारब्धं विनश्यतः॥२॥ ज्ञानाहवसंचितेपुण्यपाप

ब्रे २ लप

दि द्विविधे आरब्धे अनारब्धे च तयोर्द्विविधयोरप्यकर्तृत्वमात्मनः। समानं तद्बोधश्च समः। ततो अ
रब्धवदारब्धायारपिज्ञानादयसमयएव विनाश इति प्राप्ते ब्रूमः॥ अस्तु नाम वस्तुतोक्तिप्यआर
ब्धायारविनाशो गम्यते तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतिः। अयमर्थः। त
ल्प स्य तत्त्वविदो मुक्तिर्विलंबमानापि नात्यंतं विलंब्यते किंतु गर्भाधानकालन्हस्याप्रारब्धं स्या
नावनयावाद्देहः प्राणैर्न विमोक्ष्यते तावदेव विलंबात अथ देहप्राणवियोगे सति ब्रह्म
संपद्यत इति यथातथापि अस्मात्तत्त्वविदोप्यादेहपातं संसारो रागी न ततः तथा विद्वदनुभ
वाप्यस्मिन्नर्थे सति स्फुटः॥ मुक्तिश्चेच्यते यथालोके लक्ष्यनिष्ठबाणेषु धानुष्कस्य सं
कारपरित्यागयोः स्वातंत्र्यमपि मुक्तबाणस्वातंत्र्यं न दृश्यते तेन तु बाणो वेगक्षीणः स्वयं पतः
ति एवं कुलालचक्रभ्रमणमुदाहर्तव्यं। तथा दार्ष्टान्तिकस्य ब्रह्मज्ञानस्यापि अनारब्धकर्म

सुनाशकत्वस्यातश्यमस्तु न त्वारब्धकर्मणि आरब्धस्य प्रवृत्तफलत्वात् यद्योतेः आते अत्यानि
रारब्धस्थितिर्नाभ्युपगम्येत तदोपादद्युस्ताचाद्विद्यासंप्रदाय उच्छिद्येत न तावद विद्वानुपदि
ष्टेति शक्यं वक्तुं विद्वांस्तावदनस्यमय एवमुच्यत इति कानामापादतासंभवति तस्मात्रा
रब्धयोर्नाशः॥ ॥अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥ ॥४।१।१६॥ द्वादशाधिकरणमा
रचयति। नश्येन्नो वाग्निहोत्रादि नित्यं कर्म विनश्यति। यतो यं वस्तुमहिमा न क्वचित्त्वविह
न्यते॥१॥ अनुषक्तफलांशस्य नाशाप्यानिर्नश्यति। विद्यायामुपयुक्तत्वात् नाव्यस्येषस्तु
काम्यवत्॥२॥ ज्ञानात्पूर्वमिहजन्मनि [illegible] जन्मांतरवाविहितं यदग्निहोत्रादि नित्यं
कर्म तस्यापि काम्यकर्मवदकर्तात्मवस्तुमहिम्ना नाशः स्यादयतः इति प्राप्ते ब्रूमः द्वाव ११५
शो। नित्यकर्मणः पाकांशः पापक्षयेन चित्तशुद्धिप्रदः अपरो वा। नुषंगेण स्वर्गादिफल

प्रदः तस्य नाशोऽस्तु नाम चित्तशुद्धिप्रदस्य तु विद्यायामुपयुक्तत्वान्न नाशो वर्णयितुं शक्यः न हि
लोकाग्निना पक्वीणां ब्रीह्यादिकं नष्टं मन्यते युक्तं ज्ञानाद्वद्धं नित्यं कर्म न तस्य काम्यवन्नाशः॥
यात्वविद्यश्चेति हि॥ ॥४।१।१७॥ त्रयोदशाधिकरणमारचयति। किं मांगापास्तिसंयुक्तमेव वि
द्यापायाश्च तो केवलं च प्रशस्तत्वात् सा पश्चिमो पयुज्यात॥१॥ केवलं वीर्यवद्विद्यासंयु
क्तं वीर्यवत्तरं इति श्रुतेस्तारतम्यादुभयं ज्ञानसाधनं॥२॥ विद्यासाधनं नित्यं कर्म द्विविधं संना
व्यातं गावबाह्योपास्तिसहितं तद्रहितं च तत्रोपासनस्य कर्मणः प्रशस्त[illegible]त्वात्तदेव वि
द्यासाधनं न त्पास्तिरहितमिति प्राप्ते ब्रूमः। यदेव विद्यया करोति तदेव वीर्यवत्तरं भवती
ति श्रुतिः सोपासनस्य कर्मणोऽतिशायनं वीर्यमस्तीति वदंती निरुपासनस्यापि वीर्यमा
त्रमभ्यनुजानाति अन्यथा तरप्प्रत्ययानुपपत्तेः तस्मात्सोपासनं निरुपासनं वा स्तां त २

म्येन विद्यार्थत्वात्॥ ॥भोगेन त्वितरे क्षपयित्वाथ संपद्यते॥ ॥४।१।१९॥ चतुर्दशाधिकरणम्
रचयति॥ बहुजन्मप्रदारब्धयुक्तानां नास्त्यतो मुक्तिः॥ विद्यालोपश्च तत्कर्मफलदानेन नास्ति
मुक्तिः॥ १॥ आरब्धं नाजन्यादेव न तु विद्यां विलोपयेत्। सुप्तवत्तद्वदाप्रलयतादवस्थ्याद्दृक्तत्त्वो मु
क्तः॥ २॥ अधिकारिपुरुषाणां मुक्तिर्नास्ति विद्यारब्धकर्मणामाभोगाय बहुजन्मसु स्वीकृतेषु तत्र
प्रवर्जीत विद्यायां लुप्तायां यत्कर्म क्रियते तस्य फलप्रदत्वे सत्युत्तरोत्तरजन्मपरंपराया अवश्यं
भावित्वादिति प्राप्ते ब्रूमः॥ आरब्धं कर्म स्वफले सुखदुःखे नोऽजयेत् तदर्थामेव प्रवृत्तत्वात्
न हि विद्यालोपार्थं किंचित्कर्म सर्वमनुष्ठितं। अयनं कर्मवशात् विद्याविलोप आशंक्येत न च म
रणव्यवधानमात्रेण विद्याविलोपः सुप्तस्त्विव व्यवधानेन तदुपोपादर्शनादतो विद्यायामवस्थि ११६
तायां बहुभिरपि क्रियमाणैः कर्मभिर्नाशाभावादस्मदधिकारिणां मुक्तिः॥ यद्यप्येतद्गुणोपसंह

रपादनिर्णीतं तथापि तस्यैवाक्षेपसमाधाने इत्यनवद्यं॥ ॥इति चतुर्थाध्यायस्य प्रथमपा
दः॥ ॥वाङ्मनसि दर्शनाच्छब्दाच्च॥ ॥४।२।१॥ द्वितीयपादे प्रथमाधिकरणमारचयति॥ वागा
दीनां स्वरूपेण वृत्त्या वा मनसि लयः॥ श्रुतिर्वाङ्मनसीत्याह स्वरूपविलयस्ततः॥ १॥ न ल
यात् अनुपादानकार्यं हि स्फुलिंगविलीयात्॥ वह्निदग्धजलेशांतर्वा कुत्राप्याद्वृत्तिलयः कः॥ २॥ उ
त्क्रांतिक्रमः छांदोग्ये श्रूयते। अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्रा
णस्तेजसि तेजः परस्यां देवतायामिति तत्र म्रियमाणस्य वागादीनि दानीमिंद्रियाणि मनसि वि
यन्ते स च लयः किं स्वरूपेण वृत्त्या वेति संशये सति वाङ्मनसीति श्रुतौ वृत्तिवाचकाश्रवणात् स्व
रूपलय इति प्राप्ते ब्रूमः। मृद्घटादौ वा ह्निदर्शनादन्योन्यां वागादीनां स्वरूपेण विलयः वृत्तिस्त्वनुपादानेऽपि
लयमर्हति अंगारस्तु जलमध्ये प्रक्षिप्तस्तु वह्निदाहाद्दाहकात्मिकाया अनुपादाने ज

ालल्लयदर्शनात्स्मृतेनुवाक्यशेषेण वृत्तिर्लक्ष्यते वृत्तिवृत्तिमतोरभेदोपचारात्तस्माद्वागा
दीनां मनसि वृत्तिविलयः ॥ ॥ तन्मनः प्राण उत्तरात् ॥ ३ ॥ द्वितीयाधिकरणमारचयति ॥ म
वा नः प्राणे स्वयं वृत्त्या [illegible] लीयते स्वयं यतः कारणान्नादकद्वारा प्राणे ॥ हेतुः मनः प्रति ॥ १ ॥ सा
न्नात्त्वाहतो लीयेत कार्यं प्राणोडिकनं तु ॥ प्राणाः प्राणोडिकाद्धेतुस्तासां वृत्तिलयाधियः ॥ २
वागादिवृत्तिमनसि दृष्टा प्रलीनास्तत मनः प्राणे स्वरूपेण लयमर्हति मनः प्रति प्राणस्योपाद
नत्वं नावगतं तथाहि अन्नमयं हि सोम्य मन इति श्रुतेर्मनसोऽन्नं कारणं आपोमयः प्रा
ण इति श्रुतेश्च प्राणस्यापः कारणं तथा सति मनःप्राणयोर्यान्नं तत्कारणे अन्नोदके उपल १२७
क्ष्य मनः प्राणे लीयत इति वाक्यस्यान्नमप्सु लीयत इत्यर्थो व्याख्यातव्यः तथा च कार्यस्य
स्वोपादानलयाज्जविष्यति तस्मान्मनसः स्वरूपेण लयः इति प्राप्ते ब्रूमः ॥ द्विविधमुपादानं

मुख्यं प्राणोडिकं चेति तत्र प्राणमनसोर्मृद्घटयोरिव न मुख्यमुपादानोपादेयभावोऽस्ति किं तर्हि त्वदन्ने
न्नकारणेन संबंधे परंपरया प्राणोऽन्नदिप्राणोडिकमुपादानं कार्यस्य लयं क्वचिल्लयामः ॥ तस्मा
न्मनसः प्राणे साक्षादनुपादाने वृत्तेः प्रविलाया उष्टव्यः ॥ ॥ सोऽध्यक्षे तदुपगमादिभ्यः ॥ ॥४॥
तृतीयाधिकरणमारचयति ॥ अक्षोर्द्धानसु जीवे वा लायाद्भूतेषु तद्भुजाः ॥ स प्राणस्तेजसीत्याह
न तु जीव इति क्वचित् ॥ १ ॥ एवमेवेममात्मानं प्राणा यंतीति च श्रुतिः ॥ जीवे लीत्वा सहितेन
तु भूतेषु लीयात ॥ २ ॥ अंतकाले निकादशेंद्रियसंयुक्तस्य प्राणस्य तेजोवादिभूतेषु वृत्ति
प्रविलयो न तु जीवे प्राणस्तेजसीति श्रुतेरिति प्राप्ते ब्रूमः ॥ एवमेवेममात्मानमंतकाले सर्वे
प्राणा अभिसमायंतीति श्रुतेर्जीवे प्राणलयः यथा राजानं प्रयियासंतं सर्वे सूताः
समायंतीति तद्वदिति श्रुतेरर्थः ॥ न च प्राणस्तेजसीति श्रुत्या विरोधः जीवेन सहितः प्राणस्य

स्तज आदिभूतेषु लीयत इति व्याख्यातुं शक्यत्वात्तस्मात्प्राणो जीवे प्रथमं लयं प्राप्य पश्चात्
द्वारा भूतेषु लीयत इति ॥ ॥समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ॥अथ चतुर्थाधिकर
मा णमारचयति ॥ ज्ञान्यज्ञोत्क्रांतिरसमा समा वा न हि सा समा ॥ मोक्षसंसाररूपस्य फलस्य विषमत्व
तः ॥१॥ आसृत्युपक्रमं जन्मवर्त्मानमतेः समा ॥ पश्चात्तु फलवैषम्यादसाम्यात्क्रांतिरेतयोः ॥२
निर्गुणब्रह्मज्ञानिनस्त्ववतुत्क्रांतिरेव नास्तीति वक्ष्यति या तु सगुणब्रह्मज्ञानिन उत्क्रांतिर्न सा
वज्ञान्युत्क्रांत्या समाना ब्रह्मलोकरूपस्य मोक्षस्य तद्विपरीतसंसाररूपस्य फलस्य च विषम विपरित
म्य त्वेन तस्मादिह द्वारभूतायामुत्क्रांतौ वैषम्योचितत्वादिति प्राप्ते ब्रूमः ॥ सगुणज्ञानिनो मूर्द्धन्य
नाडीप्रावण्यादुत्तरमार्गोपक्रमः ज्ञानरहितस्य नाड्यंतरप्रावण्यान्मार्गांतरोपक्रमः ॥ मार्गोप
र्यंतमिदामववर्त्मानं जन्म अत एहिकसुखदुःखवदुत्क्रांतिरपि समाना उपक्रांतं तु मार्गे

त्वउक्तफलजनदाद्वैषम्यमस्तु ॥ ॥तदापीतेः संसारव्यपदेशात् ॥ ॥अथ पंचमाधिकरण
मारचयति ॥ स्वरूपेणाथवा तत्त्वाद्भूतानां विलयः परे ॥ स्वरूपेण लयो युक्तः सर्वापाद
नपरात्मनि ॥१॥ आत्मज्ञस्य न तत्त्वात्पि हीयंते वान्यस्य तु लयः ॥ न चेतकस्यापि जीवस्य न स्या
तजन्मांतरं क्वचित् ॥२॥ तेजः परस्यां देवतायामित्यत्र तेजः प्रभृतीनां भूतानां परमात्मनि स्व
रूपेण लयो युज्यते परमात्मनो भूतोपादानत्वादिति प्राप्ते ब्रूमः ॥ आत्मतत्त्वज्ञानिनस्तत्त्वउत् दिति
मर पाकारणभूतानां स्वरूपेण लयोस्तु तस्य निःक्षिप्यमाणत्वात्तदुपासकस्य कर्मणा जन्मां
तरस्य हि द्वायहत्व लयएवाभ्युपगंतव्यः ॥ ॥प्रतिषेधादिति चेन्न शारीरात् ॥ ॥अथ षष्ठाधि
करणमारचयति ॥ किं जीवाद्देहाद्वा देहात्प्राणोत्क्रांतिर्निवार्यते ॥ जीवान्निवारणं युक्तं जी
वो हि देहोऽन्यथा सदा ॥१॥ न तास्म जलवदाहप्राणानां विलयः स्मृतः ॥ उत्क्रम्यत्पन्नाद्देहोऽतो

देहात्साऽपि निवार्यते ॥१२॥ न तस्य प्राणा उत्क्रामन्तीति तत्त्वविदः प्राणानामुत्क्रान्तिर्निषिध्यते तस्य
निषेधस्यापादानं जीवः ननु देहः । अन्यथा देहादनुत्क्रान्तौ मरणाभावाविष्कम्पात इति चेत्
नि ब्रूमः । तप्ताश्मनि क्षिप्तं जलं यथा नान्यत्र गच्छति नापि तत्रापि दृश्यते किन्तु स्वस्वरूपेण विलीयते तत्
तत्त्वविदः प्राणा देहादनुत्क्रान्ता अपि न देहेऽवतिष्ठन्ते किन्तु विलीयन्ते अतो जीवनाऽसंभवान्मृता
देह इति व्यवहारः अनुत्क्रान्तानां प्राणानां देहेऽवस्थानाभावाद्देहस्याशूनत्वाभावलिंगं नत्वि
यतः अयमाह स्पष्टं देहादुत्क्रान्तिरस्तु प्रतिषेधस्तु जीवापादानका न विवक्षितेति भेदो देहादुत्क्रा
म्य जीवेन सहावस्थितं तस्य प्राणाः देहान्तरग्रहस्यावश्यकत्वात् मुक्तिरेव न स्यात् अतः
उत्क्रान्तिप्रतिषेधस्य देह एवापादानं न जीवः ॥ तानि परे तथा ह्याह ॥ ॥ध१॥ ॥सम्मा ११९
धिकरणमारचयति ॥ इत्थं तत्त्वविदो यः स्वदेहे तौ लीनाः परस्य वा [illegible]
गताः कला इति श्रुता [illegible]

गताः कलाः पञ्चदश प्रतिष्ठा [illegible] इति कलाशब्दवाच्यानां प्राणानां प्रतिष्ठाशब्द
यस्य स्वस्वकारणप्राप्तिप्रतिपादकं [illegible]

गता इत्याद्यु [illegible]
[illegible] स्वस्वाहेतुषु तल्लयः ॥१४॥ नद्यब्धिलयसाम्योक्तेर्विदुद्वाग्लयः परे । अत्र दृष्टिपरं शास्त्रं
[illegible] दाकृते ॥१५॥ तत्त्वज्ञानिना वागादयः प्राणा विलीयमानाः प्रातिस्विकं स्वस्वमादि
ब्र धिकरणेषु विलीयन्ते ननु परमात्मनि एषामस्य पुरुषस्याग्निं वागप्येतीति वाते प्राणाश्च हेतु
रादित्यमित्यादिश्रुतेरिति प्राप्ते ब्रूमः । तत्त्वविदोऽपि दृष्ट्या परमात्मन्येव लय इति श्रूयते
निश्चीयते यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपा
द्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति श्रुतौ नद्यब्धिलयदृष्टान्त उपपन्नः स्यात् अथ दार्ष्टा
न्तिकः परमात्मनि लय इत्ययमर्थो न विवादः नहि स्फुलिंगतारकिणादागम्यतेऽवाप्यमानः
स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्य
ते एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते ना

सांनामरूपेषु रूपत्वइत्येवंप्रोच्यतइतिनिर्गच्छंति विलीयंते तस्मयं श्रुतिस्तत्त्वविद्दृष्टिविषया॥ अ प्र
वागपो न्नि वागप्येतीति शास्त्रं तु तटस्थपुरुषप्रतीतिविषयं ध्रियमाणे तत्त्वविदि समीपस्थैर्न निःसरु प २
षाः स्वस्वदृष्टांतेन तदीयवागादीनामप्यग्न्यादिषु लयं मन्यंते अतः कल्पनाविरोधः तस्मात्प
रमात्मनि तत्त्वविदः प्राणानां लयः॥ ॥अविभागो वचनात्॥ ॥४२८॥ अष्टमाधिकरणमा
रचयति॥ तत्त्वयः शक्तिशेषेण निःशेषेण वा मनि॥ शक्तिशेषेण पुनः सावशेषानिवृत्तेः द
र्शनात्॥१॥ नामरूपविभागात्कृतनिःशेषतो वसंलयः अतः जन्मांतरार्थं तद्वत् निःशेषत्वमि नि
ष्यते॥२॥ पूर्वाधिकरणे कलयो न निःशेषः किंतु सावशेषो न विन्तुमर्हति॥ वागादिलयवदि
ति प्राप्ते ब्रूमः॥ निर्धाततन्तां सां नामरूपे इत्यत्र जीवस्य याः षोडशकलाः संसारहेतवस्तासां क १२०
लानां नामरूपांतः श्रूयते कलाश्च वाक्योत्क्रमे संक्रांताः संप्राणमस्तु अतः प्राणा ब्रह्मांखंव

गुर्व्यापीतिरापः पृथिवीमिंद्रियं मनोऽन्नमन्नाद्वीर्यं तपो मंत्राः कर्म [illegible] लोकेषु नामति चयदिग्रा
णादीनां नामांतानां नामरूपे शक्त्यवशेषे लीयते तदा नामरूपविभागश्रुतिः पुरुषो न शक्त्य
त्मना नामरूपयोः सूक्ष्माद्यारवस्थानाद्ज्ञानिनस्तु जन्मांतरसिद्धाय शक्त्यवशेषत्वमिष्यते त
त स्मात्तत्त्वविदो वागादीनां निःशेषेण लयः परमात्मनि॥ ॥तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो
विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया॥ ॥४२९॥ नवमाधि
विरो करणमारचयति॥ अविद्वद्विदुषोर्वास्यादुत्क्रांतिरुपासितुः॥ हृत्प्रद्योतनसाम्येऽतिरविशेषोऽपुन
र्गमात्॥१॥ मूर्ध्न्यायैव नाड्या सोऽग्रजन्नाडी विचिंतनात्॥ विद्यासामर्थ्यतः [illegible]षापि स्रिताषे
ष्वन्यनिर्गमात्॥२॥ उपासकस्याप्ययमुत्क्रांतिः देयमितरा क्रांला मार्गोपक्रमपर्यंतं सामग्र
कं॥ अथ मार्गोपक्रमपि सामिव न विन्तुमर्हति हृत्प्रद्योतनादेः समत्वश्रवणात् तथाहि त

स्यहितस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्द्ध्नो वाऽन्येभ्यो वा
शरीरदेशेभ्य इति श्रूयते अस्यायमर्थः वाङ्मनसि संपद्यत इति क्रमेण सजीवलिंगशरीरं श
क्यवाशार्थं परमात्मनि यदा लीयते तदा पूर्वं उत्क्रमसमाप्तं भवति अथ उत्क्रांतरायतल्लिंगं तु न हृ
दायग्रउर्ज्वलति तस्मिन्न वस्था रहृदयाग्रवस्थितस्य लिंगस्य गंतव्यता विद्युन्माला च नात्मको
सत्यत्वयात्वन लोकप्रसिद्धः क[illegible]श्चित्प्रद्योतो भवति तेन युक्तः स नाडीभ्यो निर्गछतीति एत
दस्मार्वपां समानं तस्मान्नोपासकस्येतरस्यो विशेष इति प्राप्ते ब्रूमः॥ मूर्द्धन्यायैव नाड्यो
पासको निर्गच्छति इतरास्य एव नाडीभ्य इतरस्ततः उपासकेन मूर्द्धन्या नाड्या अभिनिर्गत्वात्॥
सगुण ब्रह्मविद्यासामर्थ्यात् उत्क्रमणं तदा च अयमर्थः स्पष्टमवगम्यमाना तत्रैव काव हृदयस्य १२५
नाड्यस्तासां मूर्द्धानमभिनिःसृतैकातयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवं
गन्या

न्ति अन्यया नाड्या उत्क्रमणं योपासुज्यात ननु अमृतत्वप्रापनयइत्यर्थः तस्मादुपासकस्य
विशेषः॥ ॥रश्म्यनुसारी॥ ॥४२१०॥ इदानीमाधिकरणमारचयति॥ अहान्यवगतारश्मि
याति न रथं दिवा निशि॥ सूर्यरश्मेर्भावनमतो हान्यवयाति तं॥१॥ यावदेह रश्मिनाड्यो
युक्ते ग्रीष्महयासवपि॥ बृहदारण्यक तत्वात्रश्मीणि रथपिया त्वासि॥२॥ अथ विनारवं रश्मि
निरुद्धमाक्रमतीति मूर्द्धन्यया नाड्या निर्गतस्य रश्मीसंबंधः श्रूयते॥ सचाहन्येव भूतस्य संभव
ति न तु रात्रौ रश्म्यभावादिति प्राप्ते ब्रूमः॥ रश्मिनाड्याः संबंधो यावद्देहभावी अत एव श्री
मत्रपास्तुदेह दहउपलभ्यात तत्पं तासुतु पतिबंधत्वाद्दत्तपलंभः॥ श्रुतिश्च रश्मिनाड्योरवि
संयोगंदर्शयति अमुष्मादादित्यात्प्रतायंते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायंते ते
मुष्मिन्नादित्ये सृप्ता इति तस्मान्निश्यपि मृतो रश्मिं याति॥ ॥अतश्चायनेपि दक्षिणे॥ ॥४२१॥

एकादशाधिकरणमारचयति॥ अयने दक्षिणे मृत्वा धीफलं नित्यायेति वा॥ निरुत्तरायणाद्भो
क्तृ भीष्मस्यापि प्रतीक्षणात्॥१॥ आतिवाहिकदेवोक्तेर्वरस्मात्यप्रतीक्षणात्॥ फलिकाल्पा
च विद्यायाः फलं प्राप्नोत्युपासकः॥२॥ दक्षिणायने मृतस्योपासकस्य न विद्याफलं ब्रह्मलो
कप्राप्तिः संभवति उत्तरायणस्य ब्रह्मलोकमार्गस्य श्रुतिस्मृत्योः प्रागतदक्षिणायने मृतस्या
पि विद्याफलांगीकारे भीष्मस्योत्तरायणप्रतीक्षणं निरर्थकं स्यादिति प्राप्ते ब्रूमः॥ नोत्तराय
णशब्देन कालो विवक्षितः किं त्वातिवाहिका देवतेति वक्ष्यति भीष्मप्रतीक्षणं तु पितृप्रसाद
लब्धस्वच्छंदमरणत्ववरख्यापनाय यदि कालविशेषमरणपराधीनफलं नाप्नुयात्तत्पाक्षिक
फला विद्या स्यात् तस्माद्दक्षिणायने मृतोऽपि विद्याफलं प्राप्नोति॥ ॥ चतुर्थाध्याये द्वि १२२
तीयः पादः॥ ॥ अर्चिरादिना तत्प्रथितेः॥ ॥४।३।१॥ चतुर्थाध्यायस्य तृतीयपादस्य प्रथमा

धिकरणमारचयति॥ नानाविधो ब्रह्मलोकमार्गोयद्वार्चिरादिकः॥ नानाविधः स्यादेको वा प
तु वर्णनादन्यथान्यथा॥१॥ एक एवार्चिरादिः स्यान्नानाश्रुत्येकपूर्वकः॥ यतः पंचाग्निवि
द्यायां विद्यांतरवर्ती श्रुतः॥२॥ ब्रह्मलोकमार्गश्छांदोग्यबृहदारण्यकयोः पंचाग्निविद्याय
मर्चिरादिकः प्रख्यातस्तेऽर्चिषमभिसंभवंति अर्चिषोऽहरिति विद्यांतरे तु वाय्वादिकः स
वायुमागच्छतीति कौषीतकिनः पर्यंकविद्यायामग्निलोकादिकमामनंति स एतं देवयानं पं
थानमापद्याग्निलोकमागच्छतीति एवमन्यत्रापि द्रष्टव्यं तस्माद्बहुविधो मार्ग इति प्राप्ते ब्रू
मः॥ अर्चिरादिरेक एव मार्गः कुतः पंचाग्निविद्यावाक्ये यतः पंचाग्निविदो विद्यांतरोपा
सकांश्चार्चिरादिमार्गस्यैव पठितत्वात् य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपास
त इति तेऽर्चिरभिसंभवंतीति श्रुत्यंतरोक्तानां तु वाय्वादीनां गुणोपसंहारस्यायनार्चिरा

त्प। दि श्री२भ

दिमार्गप्रवेशोऽवलितः पूर्वत्वप्रसंजनात् तस्मादर्चिरादिमार्ग एक एव ॥ ॥वायुमब्दादविशेष
विशेषाभ्यां ॥ ॥४।३।२ द्वितीयाधिकरणमारचयति ॥ संनिवेशयितुं वायुरर्चीनाशक्य
पशक्यते । अशक्यो वायुलोकस्याश्रुतक्रमविवर्जनात् ॥१॥ वायुरब्दादिति निष्क्रम्य सश्रो
दित्यं व्रजेदिति ॥ अन्तरं वायावर्वायुर्देवलोकस्तत्पृथक् ॥२॥ तत्र विषमनियं न वत्वर्चिषो
ऽहरह्न आपूर्यमाणपक्षं अपूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं सं
मा वत्सरादादित्यं चंद्रमसो विद्युतं तत्पुरुषो मानवः स एतान् ब्रह्म गमयतीति श्रूयमाणेः
र्चिरादिमार्गशाखांतरे श्रुतो वायुः केनापि संनिवेशनां तर्नवियितुमशक्यः अस्माप
रि वायुरिति क्रमस्याश्रुतत्वात् ॥ कल्पकाभावादिति प्राप्ते ब्रूमः ॥ श्रुत्यंतरं कल्पकं तथाहि १२६
स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आ

चंद्रम ४

दित्यमागच्छतीति श्रुता निर्गत्यापाशाकायदा वायुमागच्छति तदा वायुमंडलं छिद्रितं भवति येन
चरथचक्रछिद्रप्रमाणेन वायुछिद्रेण वायुमंडलमुल्लंघ्यादित्यमंडलं प्राप्नोतीत्यर्थः ॥ ए
वं सति वाय्यारादित्यात्पूर्वत्वप्रतीतेः क्रमविशेषावगंतुं शक्यते मासेभ्यः संवत्सरं संवत्स
रादादित्यं वा वाय्यारादित्यमित्येवं संनिवेशः कर्तव्यः बृहदारण्यके तु मासानंतरं संवत्सरं परित्य
ज्य तस्य स्थाने देवलोकः पठितः स च संवत्सरानंतरं वाय्यार्वाक् निवेशयितव्यः मासंसंवत्स
रयोः संसंबंधित्वेन प्रसिद्धाया आनंतर्यस्यानिवारणीयत्वात् ततो देवयं संवत्सरादित्याया मध्ये रा
देवलोकवाय्वोराकाशो संनिवेशयितुं शक्यो ॥ ॥तडितोधि वरुणः संबंधात् ॥ ॥४।३।३॥
तृतीयाधिकरणमारचयति ॥ ॥वरुणादेः संनिवेशो नास्त्युतास्ति तडितो विद्युतः ॥ नास्ति वायौ
रिवैतस्य व्यवस्थाश्रुत्यभावतः ॥१॥ विद्युत्संबंधि वृष्टिस्थनीरस्याधिपतित्वतः ॥ वरुण

द्वं

विद्युतस्तूर्ध्वं तत इंद्रप्रजापती ॥३॥ कौषीतकिनः पठंति स वरुणलोकं स इंद्रलोकं स प्रजाप
तिलोकमिति तत्र वरुणादयस्त्रयो लोका अर्चिरादिमार्गे संनिवेशयितव्याः वायोरि
व व्यवस्थापकाभावादिति प्राप्ते ब्रूमः ॥ विद्युल्लोकस्योपरि वरुणलोकः संबंधवशाद्व्यवस्था
प्यात विद्युत्पूर्वकवृष्टिगतनीरस्य वरुणोऽधिपतिः विद्युद्वरुणयोः संबंध इंद्रप्रजापत्योस्तु
स्थानांतरासंभवात्पाठगतक्रमेनामंते तारसंनिवेश इति न्यायेन वरुणलोकस्योपरि संनिवेशः
तदेवं वरुणादीनां संनिवेशादर्चिरादिमार्गो व्यवस्थितः ॥ ॥ आति[illegible]वाहिकास्तल्लिंगा
त् ॥ ॥४३४॥ चतुर्थाधिकरणमारचयति ॥ मार्गचिह्नं भोगभूर्वा नेतारो वार्चिरादयः ॥ आ १२४
द्यो स्यातां मार्गचिह्नत्वारूप्यात् लोकशब्दतः ॥१॥ अंतगमयतीत्युक्तेर्नेतारस्तेषु वा द्वयोः ॥
निर्देशात्स्मृतलोकास्त्वप्यत्र निवासिजनाभ्रमात् ॥२॥ य एतेऽर्चिरादयः श्रुतास्ते मार्गचि

ह्नानि न चितुमर्हंति लौकिकमार्गचिह्नरूप्येण निर्दिश्यमानत्वात् लोके हि मार्गज्ञानायैवं
निर्दिशंति ग्रामान्निर्गत्य नदीं प्रवृज ततः पर्वतं ततो ग्राममिति तद्वदत्राप्यर्चिषोऽहरह्न आ
पूर्यमाणपक्षमिति निर्दिश्यंते तस्मान्मार्गचिह्नानि यद्वा ब्रह्मलोकं जिगमिषोर्विश्राम
स्थानानि भोगभूमयो वार्चिरादयः कुतः वायुलोकं वरुणलोकमिति प्रयुक्तस्य लोकशब्दस्य ने
गच्छूमौ प्रसिद्धत्वादिति प्राप्ते ब्रूमः ॥ तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयतीत्यंते श्रूयमाणस नू
मानवस्य विद्युत्पुरुषस्यानेतृत्वावगमात्तत्साहचर्येणार्चिरादयोप्यातिवाहिकदेवता इत्यु
गम्यंते यत्तु निर्देश्यसाम्यमुक्तं तदातिवाहिकदेवतास्वपि समानं गच्छ त्वमितो बलवर्माणं तत द्वि
जयसुन्तं ततो देवदत्तमित्यादिनिर्देशदर्शनात् लोकशब्दस्तूपासकानां भोगाभावेप्यातिवाहिकदे
वानां तत्रागमपेक्ष्योपपद्यते तस्मादातिवाहिका अर्चिरादयः ॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥४३५॥
५२

वे॰

पंचमाधिकरणमारचयति ॥ परं ब्र[ह्म] ह्माथवा कार्यं तदुमार्गेण गम्यते । मुख्यत्वादमृतत्वोक्ते
र्गम्यते परमेव तत् ॥ ७ ॥ कार्यस्य गतिव्याप्यत्वात्परस्मिंस्तदसंभवात् ॥ सामीप्याद्ब्रह्मशब्दोक्ति
रमृतत्वं क्रमात्स्फुटम् ॥ ८ ॥ स एनान् ब्रह्म गमयतीति श्रूयमाणं यदुत्तरमार्गप्राप्यं वस्तु तत्पर
ब्रह्म भवितुमर्हति कुतः ब्रह्मशब्दस्य मुख्यत्वात् तथा ह्यमायन्नमृतत्वमेतीत्यमृतत्वकथना
च्चेति प्राप्ते ब्रूमः ॥ सत्यलोकाख्यं कार्यं ब्रह्मोपासकव्यतिरिक्तत्वात्परिच्छिन्नत्वाच्च गतिश
ब्दप्रातिपाद्यं नतु तथा परं ब्रह्म तस्य सर्वगतत्वादुपासकस्वरूपत्वाच्च ब्रह्मशब्दस्तु मुख्यार्थ मु
संभवेनत्सामीप्यसंबंधात्सत्यलोकमाचष्टे समीपे हि सत्यलोकः परब्रह्मणः तल्लोकवा
५ सिनां तत्वज्ञानेऽवश्यंभाविनि सति तु नर्जन्मिव्यवधानमंतरेण मोक्ष्यमाणत्वात् अत एव स्मृ १२५
तिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमिति ॥

एवं च सत्यमृतत्वश्रुतिः क्रममुक्त्यभिप्राया । तस्मादुत्तरमार्गेण प्राप्यं कार्यं ब्रह्म ॥ ॥ अप्रती
ता कालंबनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च ॥ ॥ ४।३।१५ ॥ षष्ठाधिकरणमारचयति ॥
प्रतीकोपासकान् ब्रह्मलोकं नयति वा न वा । अविशेषश्रुतेरेतान् ब्रह्मोपासकवन्नयेत ॥
९ ॥ ब्रह्मक्रतोरभावेन प्रतीकार्हफलश्रवात् । नैतान्नयति पंचाग्निविदो नयति तत्क्रतुः ॥ १० ॥ स ए
नान् ब्रह्म गमयतीति श्रूयमाणोऽमानवः पुरुषो ब्रह्मोपासकवत्प्रतीकोपासकानपि सत्य
लोकं प्रापयति अविशेषश्रवणादिति प्राप्ते ब्रूमः ॥ तं यथा यथोपासते तदेव भवतीति
श्रुतो ब्रह्मभावनारूपः क्रतुर्ब्रह्मप्राप्तिरित्यवगम्यते । न हि प्रतीकोपासकानां ब्रह्मक्रतुरस्ति
यन्निति सत्यलोकं गच्छंतु । किं च यथा प्रतीकमवधीनानि फलानि श्रूयंते यावन्नाम्नो गतं
तत्रास्य यथाकामचारो भवतीति नाम ब्रह्मेत्युपासितुः शब्दयाथात्म्यादिलक्षणे नामविषये स्या

तंत्र्यं न वक्ती[illegible]त्यर्थः॥ कथं तर्हि पंचाग्निविदां प्रतीकोपासकानां सत्यलोकप्राप्तिर्वचनबला
दिति सूत्रमः॥ तस्मात्मायतनात्प्रतीकोपासकान् सत्यलोकं प्रापयति॥ ॥चतुर्थाध्याये तृतीय
पादः॥ ॥संपद्याविर्भावः स्वेन शब्दात्॥ ॥४।४।१॥ चतुर्थे चतुर्थपादे प्रथमाधिकरणमा
रचयति॥ नाकवच्छूतनं मुक्तिरूपं यद्वा पुरातनं। अभिनिष्पत्तिवचनात् फलत्वादपि नूत
नं॥ ॥१॥ स्वेन रूपेणेति वाक्ये स्वशब्दात्पुरातनं॥ आविर्भावोऽभिनिष्पत्तिः फलं चाज्ञानह
तिः॥ ॥२॥ एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्प
द्यत इति श्रूयते। अस्यायमर्थः॥ सम्यक् प्रसीदत्यस्मात्सुषुप्तावस्थायामिति संप्रसादो जीवः
सं स च शरीरस्याभिमानं परित्यज्य परं ब्रह्म प्राप्य मुक्तिरूपेणावतिष्ठत इति। तत्र मुक्तिरू १२५
पं न जीवस्य पूर्वरूपं सिद्धं किंतु स्वर्गवदागंतुकं कुतः। अभिनिष्पद्यत इत्युत्पाद्यत्वश्रवणा

त् पूर्वसिद्धत्वे संसारदशायामपि तद्भावेन फलत्वं न स्यात् तस्मात्स्वर्गवदिदं नूतनं मुक्तिरू
पमिति प्राप्ते ब्रूमः॥ स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्देन विशेषितत्वात् पूर्वमपि विद्य
त एवेदं मुक्तिरूपं न चात्र स्वशब्दः स्वकीयत्वमभिधत्ते विशेषणवैयर्थ्यप्रसंगात्। यद्यद्
यं तु का वार्ता दत्ते तत्तत्स्वकीयमात्मविक्रयवादेतदविशेषात्। तत आत्मवाचित्वं तु स्वश
ब्दस्य स्वकीयत्वव्यावृत्तिः प्रयोजनं। न चाभिनिष्पत्तिरुत्पत्तिः पूर्वसिद्धस्यापि तत्संभवात्
किं तर्हि तत्त्वज्ञानेन ब्रह्मत्वाविर्भावोऽभिनिष्पत्तिः॥ न चैवं सत्यपि संपद्य अभिनिष्पद्यत इत्य
आमि नायाः पुनरुक्तिरिति शंकनीयं संपत्तिशब्देन तत्पदार्थावाधनस्य विवक्षितत्वादभिनिष्पत्ति
स्तु वाक्यार्थावाधः। न च पूर्वसिद्धस्य मुक्तिरूपस्य फलत्वविरोधः निवृत्ताज्ञानत्वाकारेण
पूर्वसिद्धत्वाभावात् तस्मात्पुरातनमेवास्य मुक्तिरूपं॥ ॥अविभागेन दृष्टत्वात्॥ ॥४।४।४॥

ति ३ द्वितीयाधिकरणमारचयति ॥ मुक्तिरूपाब्रह्मणोऽभिन्नं भिन्नं वा चिन्त्यते । संपद्य ज्योतिरित्ये
व कर्मकर्तृत्वदोषितः ॥१॥ अभिनिष्पन्नरूपस्य सतत्त्वमःश्रुमानिति ॥ ब्रह्म[illegible]लोकत्वि
न्नं तद्वद्वाक्तिरूपचारतः ॥२॥ पूर्वाधिकरणनिर्णीतं स्वरूपं यदेतन्मुक्तिस्वरूपं तत्परस्माद्ब्र
ह्मणोऽभिन्नं न विभुमर्हति । कुतः कर्मकर्तृत्वव्यपादेशात् । एष संप्रसादः परं ज्योतिरुपसं
पाद्यत्वमत्र सादशाद्वादितो जी॥ वउपसंपत्तौ कर्तृत्वेन व्यपदिश्यते ज्योतिषः प्राप्यत्वाच्च
व ब्रह्मकर्मत्वेन तस्मान्मुक्तस्य जीवस्य स्वरूपं ब्रह्मणोऽभिन्नमिति प्राप्ते ब्रूमः । ज्योतिरुप
संपद्येत्य[illegible]वाक्यं तत्पदार्थशुद्धिविषयं मुक्तं अतत्त्वमसीत्यादौ स्तुना मतं ते उपरि स्वेन
रूपेणाभिनिष्पद्यत इति वाक्यं वाक्यार्थदशापन्नं मुक्तस्वरूपं प्रतिपादयति न च तस्य ब्र १२७
ह्मणा सह भेदोऽस्ति स तत्त्वमसि दुरूप इति वाक्येन तद्भेदेनाभिनिष्पन्नरूपं मुक्तिस्वरूपं परात्

स्यतस्यो न मस्तु तद्वरा ह्यस्यां व्यवस्थानस्वरूपत्वाभिधानात्तस्मान्मुक्तस्वरूपं ब्रह्मणोऽभिन्नम् ॥ ॥ ब्राह्मे
णजैमिनिरुपन्यासादिभ्यः ॥४४॥४॥ तृतीयाधिकरणमारचयति ॥ ॥ क्रमेण युगपद्वास्य सवि
त्वापाविशेषाक्तो ॥ विरुद्धत्वात्कालभेदाद्यवस्थासंभूतयोस्तयोः ॥१॥ मुक्तामुक्तदशोर्भेदाद्य
वस्था संभवसति । अविरुद्धं युगपद्यमस्मृतं क्रमकल्पनं ॥२॥ मुक्तस्य स्वरूपभूतं ब्रह्मस्मृति
शुद्धिधर्मवत्त्वाद्यते कविसविशेषं कचिन्निर्विशेषं तथाहि य आत्मा अपहतपाप्मा विजरो वि
मृत्युर्विशोको ऽविजिघत्सोऽपिपासः सत्यसंकल्प इति सविशेषत्वं स्मृतिः । यथा सैंधवघनो
ऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरे ऽयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति
निर्विशेषत्वं स्मृतिः ॥ ते एते सविशेषत्वनिर्विशेषत्वे मुक्तिदशायां न ब्रह्मणो युगपत्संभव
तः ॥ परस्परविरुद्धत्वादतः कालभेदेन व्यवस्थापनीयेति प्राप्ते ब्रूमः ॥ प्रतिपदमदाद्युगप

दिवसविशेषत्व[illegible]निर्विशेषत्वेउपपद्यतेऽतउक्तश्रुत्या निर्विशेषत्वमेव ब्रह्म प्रतिपन्न(
तुमुक्तस्वरूपं ब्रह्म सर्वज्ञत्वादिगुणविशिष्टं यज्जगत्कारणत्वेनाभासतेन हि मुक्ताः पुरुषाः
कदाचिदपि सर्वज्ञत्वसत्यसंकल्पत्वादिगुणयुक्ता वयमिति प्रतिपद्यंते तत्प्रतिपत्तिर्हेतुत्व
तायाश्च अविद्याया विनाशितत्वात् बद्धमुमुक्षुभिस्त्वर्विद्यायुक्ताः सन्तो निर्विशेषमेव ब्रह्म सर्वज्ञ
त्वादिगुणविशिष्टमिति कल्प्यं यत्तः प्रतिपत्तिभेदाद्यवस्थासिद्धौ किमनेन कालभेदकल्पनेन
तस्माद्युगपदेव सविशेषत्वनिर्विशेषत्वे॥ ॥संकल्पादेव तु तच्छ्रुतेः॥ ॥४४८॥ चतुर्थाधि
करणमारचयति॥ नोपसृष्टा वह्निबाह्योहेतुः संकल्प एव वा॥ आद्यो मोदकविषप्राप्तिवद्वो
ह्याग्निलोकवत्॥ १॥ संकल्पादेव पितर इति श्रुत्यावधारणात्॥ संकल्प एव हेतुः स्यादि १२८
च्छयं वा तु चिंतनात्॥ २॥ पूर्वाधिकरणत्रयेण विद्वन्मुक्तौ विचारितायां ब्रह्मलोकलक्षणा

स्य चतुर्थाध्यायः समाप्तः॥ ॥समाप्ता वेदांताधिकरणमाला समाप्ता॥ ॥परमहंसपरिव्रा
जकश्रीमाधवतीर्थास्येदं पुस्तकं॥ ॥संवत् १८५८ वर्षे फाल्गुनमासे [illegible]पक्षे [illegible] गुरुवा
रे इदं पुस्तकं लिखितं॥ ॥छ॥ ॥यादृशं पुस्तके दृष्टं तादृशं लिखितं मया। यदि शुद्धमशुद्धं
वा मम दोषो न दीयते॥ ॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥ ॥[illegible]॥
श्रीराधिकावल्लभो जयति॥छ॥ ॥श्रीजगवल्लिनमः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥

श्री[illegible]

वेदांताधिकरणमाला

२८